# रसगङ्गाधरः

## 'मधुसूदनी-विवृतिः' संस्कृत-हिन्दीव्याख्योपेतः

शास्त्रानुभूतिपरिपूर्ण-पदार्थसार्थां काले कलासुकलनात्सकला कलाढ्या॥
विद्यासमुद्यतसमाधिधृतात्मतत्त्वा गाङ्गाधरी जयति वाक् रसनिर्भराद्या ॥

श्रीमद्विद्वत्तल्लजरामजिलालान् पितॄनहं नौमि ।
येषां लालन - पालन- शिक्षाद्यैरेधितो वर्त्ते ॥
स्निग्ध-परिष्कृत-वचसा झटिति दुरूहार्थबोधने दक्षान् ।
रक्षामणीन्निजान्ते-वसातांस्तांस्तौमि बालकृष्णगुरून् ॥
यत्नैर्ज्ञातेऽपि -जटिले-रसगङ्गाधरे मम ।
साहसं सफलं कुर्युर्गुरोश्चरणरेणवः ॥
शेमुषी दोषमोषा न, युक्तिमुक्ता न धारिता ।
आगमस्यापि विगमः, कस्मादस्माकमाप्तता ॥
तथापि गुरुगीर्नीरैः सरसे हृत्सरोरुहे ।
सम्फुल्लानां सुमनसां समुदायार्थमुद्यते ॥

अथ प्रारिप्सितस्य प्रबन्धस्य निरन्तरायपरिसमाप्तिनाथो जगन्नाथः प्रबन्धसंज्ञाया रसपदघटिततया रसेषु च श्रृङ्गारस्य (एकीयमते) प्राधान्यात्, कृष्णस्य च तदधिष्ठातृत्वेन समुचितां देवतां सभाजयन्, वस्तुनिर्देशस्वरूपं मङ्गलं सम्प्रदायविशुद्धये वक्तृश्रोतृ-भावुकानामनुषङ्गतो माङ्गल्यलाभाय च प्रबन्धघटकीकरोति-स्मृतापीति ।

ननु ग्रन्थमारिरचयिषोः ग्रन्थकारस्य प्रकृतमारब्धव्यपदार्थमुपेक्ष्य यदेतदप्रकृतस्य मङ्गलादेः प्रथमतो निबन्धनं तत् किं लेखने लेखनीमस्यादिवत् प्रागपेक्षितमस्य अङ्गम्, उत साहित्यादिनियतविषयोपयोगिकाव्यप्रकाशादिज्ञानवत् तत्कालनियतमर्थसाधकं किञ्चित् प्रधानम् कर्मेति, चेदङ्गम्; तर्हि करणशरीरनिवर्त्तनद्वारा उपकारकलेखन्यादिद्रव्यवत् सन्निपत्योपकारकत्वेनाभिमतम्, अथवा द्रव्याद्यनुद्दिश्य विधीयामानकेवललेखनकर्मवत् आरादुपकारकत्वेनाभिमतम् ।

तत्र नाद्यम्, शब्दार्थकनिष्पाद्ये शास्त्रे द्वाराभावात् । न च प्रतिबन्धकदुरितोच्छेदमन्तरा

शास्त्रस्य अनिष्पत्त्या तदुच्छेद एव द्वारमिति वाच्यम्, उच्छेद्यसन्देहे उच्छेदकप्रयोजनाभाव–प्रसङ्गात्; अर्थात् प्रतिबन्धकपापानां कार्यैकज्ञेयतया सम्प्रति तदनिश्चये मङ्गलार्थं प्रवृत्तिरेव न सङ्गच्छते इति मूले कुठाराघातः।

न च द्वितीयम्, आचाराच्च स्मृतिं बुद्ध्वा स्मृतेश्च श्रुतिकल्पनमिति सिद्धान्तात् सदाचारानुमितस्मृतिकल्पितया अप्रतिबन्धं समाप्तिकामो मङ्गलमाचरेदिति श्रुत्या सिद्धतया मङ्गलस्य अलौकिकत्वम्। यशोऽर्थादिकामनया विधीयमानस्य शास्त्रारम्भस्य रागतः प्राप्तत्वेन लौकिकत्वम् । ततश्च न लौकिकालौकिकयोः साक्षादङ्गाङ्गिभावः इति ।

ननु प्रधानमेवास्तु इति चेत्तर्हि, इदं मङ्गलाकलनं कर्म नित्यं, नैमित्तिकं, काम्यं वा। तत्र न पूर्वम्, ''यावज्जीवमग्निहोत्रं जुहोति, यावज्जीवमधीते विप्रः' इत्यादिवदस्य नित्यत्व–साधकप्रमाणाभावात् । यद्यपि यन्निमित्तफलसम्बन्धमन्तरेण विहितं कर्म तत् नित्यं, मङ्गले च तदभावात्तथात्वमिति चेदस्तु, तथापि यथा नित्यस्य अग्निहोत्रादेः ग्रन्थारम्भे नावश्यकर्त्तव्यता तथैव तादृशस्य अस्यापि अत्र नावश्यानुष्ठेयताप्रसक्तेः ।

न मध्यम् । उपरागे स्नायादितिवत् शास्त्रारम्भे मङ्गलं कुर्यादित्यादिनिमित्तस्य असङ्कीर्तनात्। ननु आचाराच्च स्मृतिं बुद्ध्वा स्मृतेश्च श्रुतिकल्पनमिति सिद्धान्तात् सदाचारा–नुमितस्मृत्या तादृशी श्रुतिः परिकल्प्यते इति चेत् न, दृष्टान्ताभावात्। सदाचारबलादेवमन्नीतस्य दृष्टान्तस्य क्वापि अनुपलम्भात्। अस्तु वा तथा। परन्तु तत्र अन्यस्य निमित्तस्य अनुपलम्भात् शास्त्रारम्भस्यैव निमित्तत्वं ततश्च निमित्तानन्तरं नैमित्तिकमितिनयात् शास्त्रारम्भोत्तरकालिकत्वं तस्य स्यान्नतु पूर्वकालिकत्वमिति तस्य नैमित्तिकत्वं नोपयुज्यते ।

न चाप्युत्तरम्। तथाहि – काम्यत्वं फलाभिसम्बन्धाद् भवति। फलञ्च राजसूयादिवत् श्रुतम्[१], रात्रिसत्रवदार्थवादिकम्[२], विश्वजिन्न्यायेन साधारणम्[३], नमस्कार्यदेवतामहिम–समालोचनया स्वेच्छाप्राप्तं, सामर्थ्यकल्पितञ्चेति पञ्चप्रकारम् ।

तत्र न प्रथमम् – असम्भवात् । यत्र विधिरेव मृग्यः तत्र का फलश्रुतिप्रत्याशेति भावः। न द्वितीयम्–असति कार्पासे उद्धूलककलहवदसति विधौ अर्थवादस्यानवकाशे दुराशामात्रत्वात्तदुपगम्यफलविषये । नापि तृतीयम् – स्वर्गादिफलस्य शास्त्रारम्भे अप्रयोजकत्वात् । न चतुर्थम्–अयोग्यत्वात् । नमस्कार्यदेवतायाः निरङ्कुशशक्तिकतया यो

यत्कामयते पुत्रादिकमन्यद्वा तत्सर्वं फलं स्वेच्छाप्राप्तम्, कीदृशः पुमानिदं कुर्यादिति अधिकारिणो नियमस्यानुक्तेः । ततोऽप्रकृतस्य पुत्रादिफलार्थस्य नमस्कारस्य शास्त्रारम्भे अनुष्ठानायोग्यत्वमेवेति भावः ।

अथोच्येत सर्वोऽपि जनः नियमतः शास्त्रारम्भे मङ्गलमाकलयति इति तदाकलनान्यथा–नुपपत्या शास्त्रसमाप्तिप्रतिबन्धकदुरितोच्छेदे फलेऽवश्यं कल्पनीये सामर्थ्यात्तत्कामनैव फलमिति सामर्थ्यकल्पितं पञ्चममेवास्तु इति चेन्न । प्रतिबन्धकसन्देहे अधिकारिसन्देह इति मङ्गलाचरणप्रवृत्त्यभावप्रसङ्गात् । अर्थात् प्रतिबन्धकादृष्टस्य कार्यैकसमधिगम्यतया सम्प्रति सन्दिग्धत्वात् तदुच्छेदकानुष्ठाने पाक्षिकवैफल्यशङ्काकवलिते प्रवृत्तिरेव न स्यात् । एवञ्च उच्छेद्यस्य प्रतिबन्धकस्य सन्देहे तदुच्छेदकामनाया अधिकारिविशेषणभूताया सन्दिग्धत्वम् तस्माच्च तद्विशिष्टोऽधिकार्यपि सन्दिग्ध इति प्राप्ते सिद्धान्तं ब्रूमः–

काम्यमेवेदं मङ्गलाकलनं कर्म, न नित्यं, न नैमित्तिकम्, तर्हि किमधिकारिविशेषणमिति चेत्, अप्रतिबन्धं समाप्तिकामनैवेति गृहाण । एषोऽस्मिन्निर्यासः– दृष्यते हि लोके चौरव्याघ्रादिसन्देहेऽपि केवलं सम्भावनयैव तन्निवारकोपायप्रवृत्तिः, तद्वदिहापि प्रतिबन्धकसन्देहेऽपि केवलं सम्भावनयैव तन्निवारकोपायप्रवृतिः, तद्वदिहापि प्रतिबन्धकसन्देहेऽपि केवलं सम्भावनयैव तदुच्छेदकामनाया अविरोधादधिकारिविशेषणसिद्धौ तदुच्छेदार्था प्रवृत्तिरुपपद्यत एवेति न पाक्षिकवैफल्यशङ्कालेशोऽपि सर्वप्रायश्चित्तार्थप्रवृत्तिवत्। तदुदीरितमुदयनाचार्यैः किरणावल्याम्; तत्सन्देहेऽपि तदुपादानस्य न्याय्यत्वात्, अन्यथा अनुपस्थित– परिपन्थिभिः पार्थिवैः द्विरदयूथपतयो नाद्रियेरन् । इति ।

ततश्च यत्र प्रबन्धे मङ्गलं न दृश्यते तत्र समाप्तिरूपकार्यावसेयतया न कृतमिति न, किन्तु न लिखितं, लेखनस्य अतन्त्रत्वात् । क्वचित् कृते तस्मिन् समाप्त्यभावस्तु क्रियावैगुण्यात्। अवैगुण्येऽपि क्रियायाः, प्रतिबन्धकप्रचयोऽवसेयः । यतः प्रचितस्यैव तस्य तदुच्छेदकत्वसम्भवात्, अतीक्ष्णानां कुठारधारापातानां सारवद्दारुच्छेदासामर्थ्येऽपि तीक्ष्णानामेव तेषां तादृशसामर्थ्यदर्शनात् । तथा च नेदं निर्मूलमेवाचरणं, दीपावलीमह इव आचारमूलत्वात् । आचाराच्च स्मृतिं बुद्ध्वा स्मृतेश्च श्रुतिकल्पनमिति वृद्धपरम्परायाः।

कापीति । कापि विलक्षणा । अत्र किंशब्दोत्तरापिशब्दः स्वजातिमध्योत्कर्षम्,

अनिर्वचनीयत्वम्, अद्भुतत्वञ्च प्रकाशयति । तच्च समभिव्याहृतपदार्थतावच्छेक– धर्मावच्छिन्नावधिकं वैलक्षण्यम् । स्वं किंशब्दोत्तरः अपिः, तत्समभिव्याहृतः तत्समीपोच्चरितः पदार्थः कादम्बिनी, पदार्थतावच्छेदको धर्मः कादम्बिनीत्वं, तदवच्छिन्ना कादम्बिनी, तदवधिकं वैलक्षण्यं प्रसिद्धकादम्बिन्यपेक्षया स्वस्मिन् व्यतिरेकः इति सङ्गतिः । कादम्बिनी मेघमालात्वेन अध्यवसिता कृष्णमूर्तिः। अत्र रूपकातिशयोक्तिरलङ्कारः। उपमानवाचकपदज्ञानकरण–कमुपमानतावच्छेदकरूपेण उपमेयस्य तादात्म्यज्ञानं रूपकातिशयोक्तिरिति लक्षणात् । विषयितासम्बन्धेन तस्य ज्ञानस्य अर्थनिष्ठतया अर्थालंकारत्वम् । अध्यवसायहेतुश्च विलक्षणश्यामत्वं यावन्मेघकार्यकर्तृत्वञ्च ।

मदीयमतिचुम्बिनी मम मतिविषयः भवतु जायताम्, प्रार्थने लोट् । मदीयेत्यत्र तद्धितप्रत्ययः निरर्थकः अतः मदन्तरवचुम्बिनीति समीचीनः पाठः प्रतिभाति । यद्यपि मदीयेति पाठे मम ग्रन्थकर्त्तुः मदीयानाञ्चेत्येवमुभयार्थलाभे सङ्गतिः स्यात्तथापि ग्रन्थकर्त्तुरेव प्रकृततया तथोक्तमिति ध्येयम् । नन्दिनी, लम्बिनी, इत्यादि चतुर्षु स्थानेषु इनीत्युपादानात् पदान्त्यानुप्रासः।

पादत्रयोपात्तविशेषणत्रयेण प्रकृतकादम्बिन्याः प्रसिद्धकादम्बिनीतो वैलक्षण्यमाह– स्मृतापीति । अत्र स्मृतेति भूतकालिकक्तप्रत्ययेन कादम्बिनीकर्त्तृकातपहरणस्य स्मरणोत्तरकालिकत्वं प्रकाश्यते तच्च नोत्कर्षाधायकम् । यदैव स्मर्यते तदैव तापोऽपोह्यत इति वैलक्षण्यस्य विवक्षणात् । न च धातुसम्बन्धे प्रत्यया इत्यनेन प्रधानक्रियाकाल एव गौणक्रियाबोधकधातूत्तरं प्रत्ययस्य विधानात् । 'वसन् ददर्श' 'सोमयाजी अस्य पुत्रो भविता' इतिवत्समाधातुं शक्यमिति वाच्यम्, समानकर्त्तृकत्वाभावात् । तत्र यथा वसिदृश्योः भुजिभुव्योश्च एकः कृष्णः, पुत्रश्च कर्त्ता तथा प्रकृते नास्ति, स्मरतेर्नरः हरतेः कादम्बिनी कर्त्रेति भिन्नकर्त्तृकत्वात्तथा समाधानमसम्भवमिति भावः । अतः स्मर्यमाणापीति युक्तः पाठः । अथवा 'आदि कर्मणि निष्ठा वाच्या' इति वार्तिकेण क्रियाया आदिक्षणे क्तप्रत्ययः। तथा च स्मरणप्रथमक्षण एव तापनिवारकत्वं सिद्धं भवति । प्रसिद्धा सा तु वृष्टा कृताच्छादना वा इयं तु स्मर्यमाणापि किमुत साक्षात्क्रियमाणा स्पृश्यमाना वेति ।

करुणयेति । प्रसिद्धायां तस्यां तु जडत्वात् करुणागन्धोऽपि नास्ति । इयं करुणया

एकयैव न तु बहुभिः करुणाभिः; वारमेकमपि कारुण्येनालोकितमिदं जगत् सकलसम्पदो भूमिर्भवति इति भावः । तरुणं घोरमातपम् आध्यात्मिकाधिदैविकाधिभौतिकं दुःखम् । प्रसिद्धा तु वृषराशिसंक्रान्तसूर्यातपापेक्षया भिन्नमातपम् । नृणां सर्वेषां मनुष्याणां न तु प्रसिद्वावत् एकस्य कस्यचिन्नरस्य । नृणामित्यत्र जन्मिनां प्राणिनामिति वा सम्यक् पाठः । गजगृध्रादीनामप्युद्धरणात् भगवत्पक्षे । मेघपक्षेऽपि वर्षणेन सर्वेषां तापोपशमः। हरन्ती न तु जहार हरिष्यति वा । अभङ्गुरेति । प्रसिद्धा तु क्षणिक – कान्तिविद्युता एकया सम्पर्कमात्रवती इयन्तु अभङ्गुरत्विषां विद्युतां शतैरनेकैः वलयिता परिमण्डलवती । अत्र तनुशब्दोऽधिकः । अभङ्गुरपदेन स्वभावगतभङ्गुरत्वराहित्यं द्योत्यने तेन नित्यत्वं भगवत्सहचरीणां विद्युत्वेन अध्यवसितानां गोपाङ्गनानां प्रकाश्यते । शतशब्दोऽनेकार्थः। यद्यपि विद्युत्कान्तेः क्षणिकत्वमेव, भङ्गशीलत्वं तु तृणादिपर्वतान्तेष्वपि इति विद्युतोऽसाधार–णधर्माभावात्तदुपादानानर्हं तथापि क्षणस्य आब्रह्मकीटं सापेक्षतया इयान् कालः क्षणपदाभिधेय इति वक्तुमशक्यतया उक्तमपि साधु । कलिन्देति 'अत्र गिरिस्थाने नगेति सानुप्रासः पाठः । कालिन्दी भगवतः कृष्णस्य प्रिया, तदुक्तं भागवते प्रथमस्कन्धे–

कालिन्द्युवाच

'अहं देवस्य सवितुर्दुहिता पतिमिच्छती ।
विष्णुं वरेण्यं वरदं तपः परममास्थिता ।'
'कालिन्दीति समाख्याता वसामि यमुनाजले"

सा च जलरूपेण आधिभौतिकशरीरेण प्रवहमाना मर्त्यलोकमध्यास्ते ततश्च तत्तटोत्पन्नद्रुमाणां स्वसङ्गिनीसृजां सुरद्रुमत्वेनालम्बनसुचितम् । कालिन्दीत्यनुक्त्व तथा कथनं तस्याः प्रशस्त्यै अनुप्रासाय च ।

कादम्बिनीति रूपकातिशयोक्तिः; सा च कापीति निर्दिष्टेन व्यतिरेकेण, स च पादत्रयोपात्तविशेषणैः, अथ च तद्गतैः; स्मर्यमाणाऽपि किमुत साक्षात्क्रियमाणा, आतपम् आसमन्तात्तप्यतेऽनेनेति त्रिविधं दुःखं न तु केवलमुष्णत्वं, करुणया न तु करुणाभिः, नृणामिति स्थावरजङ्गममात्रस्योपलक्षणं, हरन्ती न तु जहार हरिष्यन्तीतिरूपैः परिसंख्यानुप्राणितः व्यतिरेकैः पोष्यते । एवं व्यतिरेकातिशयोक्त्योरङ्गाङ्गिभावसङ्करः । व्यतिरेकाणां व्यतिरेकेण

सहाप्यङ्गाङ्गिभावः । अतिशयोक्तेः वृत्त्यनुप्रासस्य च एकस्मिन् श्लोकरूपवाक्ये अवस्थानात् तिलतण्डुलन्यायात् शब्दार्थालङ्कारयोः संसृष्टिः।

श्रीमदिति । अन्वयस्य सरला सरणिः । अत्र स्वरूपस्य, अन्वयस्य, क्रमस्य, परस्मैपदस्य च प्रक्रमभेदः । तद्यथा–ज्ञानेन्द्रभिक्षुः गुरुः श्रीसहितो निर्दिष्टः, अन्ये च त्रयः महेन्द्रदेवशेषाङ्का गुरवः श्रीरहिता अतः स्वरूपस्य । आदावन्ते च गुणीकृता क्रिया, मध्ये प्रधानीभूता इत्यन्वयस्व । पूर्वं वेदस्य व्याकरणस्य पश्चान्न्यायवैशेषिकयोरन्ते च ब्रह्मविद्याया इत्येनमध्ययनस्य क्रमः आवश्यकः सचात्र भेदं नीतः । तथा अधिगतेति अध्यगीष्टेति अधिपदयोः पुनरुक्तिः । परस्मैपदस्य च प्रक्रमभेदः तस्मादित्थमस्य रचना विधेया –

श्रीशेषाङ्कादविन्दत्सुविमलभणितीः पाणीनेः शेषसिद्धाः ।
काणादीराक्षपादीरपि गहनगिरः श्रीमहेन्द्रादवेदीत् ।
श्रीदेवादध्यवापत्स्मरहरनगरे शासनं जैमिनीयं
यः श्रीज्ञानेन्द्रभिक्षोः सकलसुचितिविद् ब्रह्मविद्यामचर्चीत् ।

शेषाङ्कः तादृशोपनामा वीरेश्वरपण्डितः। शेषः पतञ्जलिः तेन सिद्धाः व्याख्याताः। एतेन स्वविद्यायाः साम्प्रदायिकत्वं सूचितं तेन च मदुक्तौ श्रद्धा विधेयेति प्रकाश्यते ।

पाषाणादपीति । यस्य सर्वविद्याधरस्येत्यर्थः । एतन्महागुरुणा अन्वेतव्यम् । पाषाणादपि जडात् कठोरादपि किमुत चेतनात् सरसात् । एतेन स्वगुरोः माहात्म्यातिशयः उद्घोषितो भवति । तेन तत्प्रभावात् पाषाणसदृशस्य मम उक्तीनां पीयूषत्वं तदास्वादयितृणां विदुषामविद्यातमोराहित्येन देवत्वं सुलभम् । अमृतान्धसो हि देवा इति श्रुतेः । कारणमुखेन कार्ये उत्कर्षद्योतनादप्रस्तुतप्रशंसालङ्कारः। पे भट्टेति पण्डितराजस्य पितुर्नाम । लक्ष्मीति तन्मातुः । गुरौ महत्त्वं च सर्वविद्यानामेकत्रावस्थानात् । अनयोरुभयोः पद्ययोरुदात्तालङ्कारः। यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेदिति लक्षणात् ।

''पाषाणादपि पीयूषं स्यन्दते'' इत्यस्य वचसः प्रस्तुतप्रबन्धसम्बद्धं फलं विज्ञापयितुमिच्छुराह – निमग्नेनेति । स्वस्य पाषाणदृसदृशत्वात् क्लेशैरिति बहुतराः क्लेशाः सोढाः न तु एको द्विको वा क्लेशः सोढः। किन्तु गुरुप्रभावान्मणिरुद्धृत्य प्राकाश्यं नीतः। गलितगर्वानिति । एतदध्येतृणामन्यप्रणीतालङ्कारशास्त्रीया काठिन्यप्रयुक्ताऽस्पष्टता

न भविष्यति इति भावः । अलङ्कारान् भूषणानि अथ च अलङ्काराभिज्ञानित्यर्थः । क्वचित् विषयमुखेनाऽपि विषयिणो निर्देशो भवतीति सिद्धान्तात् । ततश्च परप्रणीतालङ्कारवेत्तॄणां यो हि गर्वः वयमेव आलङ्कारिकाः इति एतद्विदुषां गुणिनां समक्षं गलितो भविष्यति इति भावः । ननु अत्र जलधौ क्लेशैर्निमग्नेन मया उन्नीत इति क्लेशबाहुल्यमुच्यते, उत्तरत्र रसगङ्गाधरनाम्नीं करोति कुतुकेनेति पदद्योत्यः, क्लेशलेशोऽपि नादरिष्यते । एवमामुख एव परस्परविरुद्धोक्त्या अप्रामाणिकत्वं ग्रन्थस्य, तत्कर्तुश्च सूच्यत इति चेन्न । प्रथमोक्तिः स्वस्य प्रस्तावोचितविषयाणां मननेनोन्नायने क्लेशबाहुल्यसूचनाय । चरमोक्तिश्च मननादुन्नीतस्य परस्मै बोधने आयासाभावप्रकाशनाय । अत एव करोति इति परस्मैपदस्य, मननतरितीर्णविद्यार्णवस्येत्यत्र भूतकालिकतीर्णपदस्य च प्रयोगः । मया स्वेन तु दुस्तरविषयाणां मननेन उन्नायने क्लेशोऽवश्यमनुभूतः परं मननोत्तरं दृढमुन्नीतानां परस्मै बोधने मम क्लेशलेशोऽपि नास्तीति । अस्य ग्रन्थस्य लोकोत्तरकार्यकारित्ववर्णनादुदात्तालङ्कारः। प्रसिद्धमणेरपेक्षया अस्मिन् मणौ वैलक्षण्यम् । स तु मणिः मूर्खाणामपि, अयं तु गुणवतामेव हृदयमधिरोहति । तत्रापि स बहिःस्थं ध्वान्तमयन्तु अन्तःस्थम् । इति व्यतिरेकः । सर्वान् गर्वान् इति छेकानुप्रासः।

ननु भवानपि प्राचीनाचार्यप्रणीतप्रबन्धाध्ययनोत्तरमेव अलङ्कारान् सर्वानपि गलितगर्वान् रचयतु इति कथनसमर्थः तथा परेऽपि भविष्यन्तीति किन्ते नवीनग्रन्थप्रणयनप्रयासेनेत्यत आह–परिष्कुर्वन्त्विति । यथा तिमीन्द्रसङ्क्षुब्धरत्नाकरात् न हि केऽपि रत्नान्यवापुः प्रत्युत भयात्ततः सर्वोऽपि लोको विद्रवत्येव एवमेव कतिपयसहृदयधुरीणकर्तृकपरिष्कारसद्भावेऽपि विषमात्साहित्यपाथोनिधेः नहि केनाऽपि रत्नानि प्राप्तुं शक्यन्ते । अतः मन्दराचलीयप्रयासवत् लोकहितकारी मदीयप्रयासः आवश्यकः सफलश्चेति भावः । अत्र गतार्थो व्यर्थो न भविता अर्थात् सफलः, विफलः किम् विफलो न भविष्यतीत्यर्थतया सफलः । एकस्य साधारणधर्मस्य सफलत्वस्य पूर्वार्द्धोत्तरार्द्धरूपवाक्यद्वये भिन्नाभ्यां शब्दाभ्यामुपादानात्, सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः । प्रतिवस्तूपमा तु सेतिलक्षणा प्रतिवस्तूपमालङ्कृतिः । गतः समाप्तः अर्थः प्रयोजनं यस्य स गतार्थः प्रयोजनरहितः । स प्रयोजनरहितो न अर्थात् सप्रयोजनः सफलः इत्येवं प्रतियोगिनोरभेदे तदभावयोरपि अभेद इति मर्म ।

ननु सर्वोऽपि परेभ्यो व्युत्पद्यते तवापि सैव गतिस्ततः परोक्तीः क्वचिदपचित्य क्वचिदुपचित्य लिखतस्ते नापरं वैलक्षण्यमित्यत आह–निर्माय नूतनमिति । प्राच्यैः सर्वैरपि प्रस्तावानुकूलानि परकीयान्येव पद्यानि उद्दध्रिरे मया तु लेशतोऽपि तानि नोदटङ्किषत । किम्बहुनोक्तेन जननशक्तिभृता न जननशक्तिविषयवता नापि जननशक्तिमता किन्तु प्रस्तावोचितवस्तूत्पादनशक्त्या परिपूर्णेन मया यद् यावदपेक्ष्यते तत्तावद्वस्तूत्पाद्यते । अनेन परेषां काव्यनिर्माणाशक्तिः कटाक्षितेति भावः।

शक्तिसम्पन्नतायाः फलं ध्वनयन्नाह–मननेति । शक्तिसम्पन्नत्वादेव काव्यमीमांसायाः काव्यविषयकयावद्विचारस्य न तु शब्दयोजनारूपस्यैव कुतुकेन लीलया निर्मितिः । पण्डितनरेन्द्र इति दिल्लीबादशाहतो व्यपदेशलब्धिः । विद्यार्णवस्य तर्या अल्पेनैव यानेन पारगामिता चेति ध्वन्यते । अत्र विद्यायामर्णवस्य, मनने तर्या आरोपेण परम्परितरूपकम् ।

जगन्नाथेति ग्रन्थकर्तुर्नाम । स्वकर्तृकस्वनामग्रहणे दोषादोषाविवेको व्यक्तिविवेके मधुसूदनी– विवृतौ विवृतमस्माभिः ततोऽवधार्यताम् । आशीर्वादात्मकं मङ्गलमातनुते रसेति । सन्दर्भः सम्यक् विवेकपूर्वकं रचितः ग्रन्थः । अयं बुद्ध्युपारूढः । चिरम् आसंसारम् । कवीनां न तु एकस्य । तेषामपि कुलानि न तु कुलम् । तान्यपि स्वभावमधुराणि न तु मत्सरीणि; मत्सरीणां रञ्जनं तु ब्रह्मणोऽपि दुःशकम् । एवमार्थी परिसङ्ख्यालङ्कृतिः। चिरं जयतु चि रञ्जयतु इति पादान्तयमकः । पद्येष्वेतेषु प्रसादो गुणः । वैदर्भी रीतिः। सहकारपाकः। अद्भुतो रसः।

तत्र रसगङ्गाधरग्रन्थे । गुरुश्च राजा च देवता चेतरेतरयोगः । तेषां प्रसादः। 'द्वन्द्वान्ते' इति नियमेन प्रसादस्य गुर्वादिभिः प्रत्येकं सम्बन्धः। किर्तिश्च परमाह्लादश्च गुरुराजदेवताप्रसादाश्च ते तथा । ते आदिर्येषां तानि । आदिपदात् धनवनिताराज्यलाभादेः परिग्रहः। अनेकानि प्रयोजनानि यस्य तस्य काव्यस्य व्युत्पत्तेः। काव्यस्येति षष्ठ्यर्थो विषयत्वं, व्युत्पत्तिः विशिष्टं ज्ञानम्, तच्च कविसहृदययोरावश्यकं फलम् । ततः आवश्यकत्वरूपहेतोरेव गुणालङ्कारादिभिः काव्यस्य निरूपणीयत्वं प्राप्तं भवति । आदिना रसभावादिग्रहः।

गुणालङ्काररसभावादि द्वारा निरूपणीये तस्मिन् काव्ये । गुणादिभिः काव्यस्य निरूपणं नाम गुणत्वाद्यवच्छिन्नप्रकारतानिरूपितकाव्यत्वावच्छिन्नविशेष्यताकज्ञानानुकूलो व्यापारः।

स च गुणादिमत् काव्यं तादृशज्ञानानुकूलशब्दजन्यज्ञानविषयः शब्दरूपः निपूर्वक रूपधात्वर्थः। कर्मणि विहितस्य अनीयर् प्रत्ययस्य च विषयत्वमर्थः। तथा च गुणत्वाद्यवच्छिन्नप्रकारता–निरूपितकाव्यत्वावच्छिन्नविशेष्यताकज्ञानानुकूलशब्दविषयत्वम् । तच्च गुणादिमत् काव्यं शिष्यबोधविषयीभवत्वित्याकारकेच्छाविशेष्यत्वरूपम् ।

ननु ज्ञानेच्छादीनामेव सविषयत्वं, शब्दस्तु निर्विषय एव, ततः काव्ये शब्दविषयत्वम्–सङ्गतमेवेति चेत् । सत्यम् । याचितमण्डनन्यायेन तत्त्वं तत्रापि बोध्यम् । अर्थात् स्वपूर्वोपात्तज्ञानसाहचर्यात् शब्दोऽपि सविषयः। ततश्च काव्यं शिष्यबोधविषयी–भवत्वित्याकारकोऽर्थः पर्यवसितः।

ननु तादृशपर्यवसितार्थघटकं शब्दजन्यं ज्ञानं काव्यत्वज्ञानं विना न सम्भवति किञ्चिदवच्छेदकपुरस्कारेणैव तद्ग्रहस्य योग्यत्वादिति नियमानुसारं धर्मितावच्छेदक–ज्ञानविधया (धर्मि काव्यं तन्निष्ठा धर्मिता तदवच्छेदकज्ञानं रमणीयार्थप्रतिपादकः शब्दः इति ज्ञानं तद्विधया तत्प्रकारेण) काव्यत्वज्ञानस्य तत्रापेक्षिततत्वादित्याह – विशेष्यताव–च्छेदकमिति । एतत्पदं तस्मिन्नित्यत्र साकाङ्क्षम् । तत्पदार्थः काव्यम् सप्तम्यर्थो निष्ठत्वम् । तस्य विशेष्यतायामन्वयः । तथा च काव्यनिष्ठा या विशेष्यता तस्या अवच्छेदकं ग्राहकं रमणीयार्थप्रतिपादकशब्दत्वरूपम् । तत् इतरस्मात् भेदस्य बुद्धौ, काव्यम् इतरेभ्यो व्याकरणादिभ्यो भिन्नं, रमणीयार्थप्रतिपादकशब्दरूपत्वात् । एतादृशानुमितिज्ञाने साधनं कारणम् । तस्य काव्यस्य लक्षणं निरूप्यते । लक्षणज्ञानाभावे धर्मिण एव सम्यग्बुद्धावनारोहादिति सामान्यनिरूपणानन्तरं विशेषो निरूप्यते–रमणीयार्थप्रतिपादक इति। प्रतिपूर्वकस्य पद्धातोः ज्ञानार्थकत्वम् । यः शब्दः रमणीयमर्थं प्रतिपादयति तस्याज्ञाने कथं तत्र काव्यमिति व्यवहारः स्यात्तथात्वे अज्ञातभाषास्थ–शब्दघटितवाक्येऽपि अबोद्धृणां काव्यमिति व्यवहारो भवतु । तस्मात् रमणीयार्थ–विषयक–प्रतिपात्तिजनक–शब्द–ज्ञान विषयः शब्दः वाक्यरूपः काव्यमिति असम्भवदोषोऽपि निरस्तः। चेष्टादिकं निराकर्त्तुं शब्द इति । वाच्यादित्रिष्वपि रमणीयता – बोधनाय प्रतिपादक इति । रमणीयेतिपदसाधुत्वान्वाख्यायकव्याकरणशास्त्ररूपे शब्देऽतिप्रसङ्गपरिहाराय अर्थ इति । धनं गृहाणेतिवाक्यस्य काव्यत्ववारणाय रमणीयेति ।

ननु भिन्नरुचिर्लोक इति रमणीयतां कःकीदृशीं वाञ्छति इत्यनियमात् धनं गृहाणेत्यत्रापि साऽस्त्येवेत्याह – रमणीयता चेति । लोकोत्तरो य आह्लादस्तस्य जनकं यज्ज्ञानमर्थज्ञानं तद्गोचरः तद्विषयो यः अर्थः तन्निष्ठा रमणीयता । आह्लादनिष्ठा लोकोत्तरता यादृच्छिकी यदि, तर्हि स्वसमवेतविश्वासयोग्यत्वसम्बन्धेन धनं गृहाणेत्यादि वाक्यजन्यश्रोतृहृदयनिष्ठाह्लादेऽपि सा अस्तु, अविनाशिनी तु सा ब्रह्मानन्दे एवेत्याह – लोकोत्तेति । अनुभवः मानसप्रत्यक्षरूप एव साक्षी यत्र सः । यद्यपि यथार्थानुभवश्चतुर्विधस्तथापि अनुभवं पृच्छ, अनुभवसाक्षिक इत्यादिषु मानसप्रत्यक्षरूप अनुभव एव गृह्यते तेन प्रमाणान्तरोत्थानुभवस्य अवसर एव न। सोप्यनुभवः काव्यभावनापरिपक्वबुद्धीनामेव ततो न पूर्वोक्तानुपपत्तिः।

आह्लादजनकज्ञानेत्यत्र ज्ञानं भावनारूपं, तच्च किंस्वरूपमित्याह–कारणमिति । तदवच्छिन्ने लोकोत्तरत्वावच्छिन्ने लोकोतराह्लादे कारणं पुनःपुनरनुसन्धानात्मा पर्यालोचन–स्वरूपो भावनाविशेषः । अयमिह निष्कर्षः । सुखत्व–व्याप्य–जातिविशेषावच्छिन्नाह्लादनिष्ठ–कार्यतानिरूपितकारणतावद्भावनाविशेषविषयत्वमर्थे रमणीयत्वम् । सुखत्व – व्याप्यो जाति विशेषः चमत्कारत्वरूपः तदवच्छिन्नाह्लादे च कार्यता तन्निरूपितकारणतावान् भावनाविशेषः तद्विषयत्वमर्थे रमणीयत्वमिति सङ्गतिः। सामान्यभावना तु ज्ञानरूपा एव अतः विशेष इत्युक्तम् । स च पुनः पुनरनुन्धानस्वभावः।

अनुभवसाक्षिकपदस्य फलमाह – पुत्रस्ते इति प्रभृतिशब्दजनितानन्दस्य न लोकोत्तरत्वं सहृदयानां तादृशानुभवाभावात् । इदन्तु बोध्यम् । चमत्कारत्वलोकोत्तरत्वमुभे पर्यायाविति ग्रन्थकृतोक्तं तत्र लोकोत्तराह्लाद इति वक्तुं पार्यते परं चमत्काराह्लादेति न । लोकोत्तरो य आह्लाद इत्येवं लोकोत्तरत्वमाह्लादे विशेषणत्वेन प्रतीतं भवति, चमत्कारो यः आह्लाद इत्येवं चमत्कारत्वं तत्र तत्त्वेन न प्रतीयते अपि तु चमत्कारजनकाह्लादेत्येव । ततः कथं पर्यायौ ते । कुशली भवान्, कुशलो भवान् । कुशलं भवतः, कुशलता भवतः इत्यत्र यथा सुखी भवान्, दक्षो भवान् । क्षेमं भवतः, चतुरता भवत इत्यर्थद्वयवत्ता तथा चमत्कार आश्चर्यं, चमत्कारः सुखमित्यर्थद्वयवत्त्वं भवेत् ।

व्याख्याप्राप्तं परिष्कृतं लक्षणं वक्ति–इत्थञ्चेति । इत्थममुना व्याख्यतप्रकारेण । फलितं सिद्धमित्यन्वयः। चमत्कारस्य लोकोत्तराह्लादस्य जनिका या भावना अर्थात्

भावनाविशेषः तद्विषयस्य तद्गोचरस्य अर्थस्य प्रतिपादकः शब्दः काव्यम् ( तादृशशब्दत्वं काव्यत्वम्) ननु ज्ञानस्य भावनाविशेषरूपत्वस्वीकारे को हेतुरिति चेच्छृणु । शतावधानिनः केचन पुरुषाः युगपदनेकपदपदार्थेषु चेतसोऽनुयोगं कर्तुं पारयन्ति । तेन च तेषां ज्ञानं पदपदार्थसमूहमवलम्ब्य अर्थात् विषयीकृत्य जायते । एवं तत्र ज्ञाने प्रकृतः अर्थः यस्य ज्ञानेन चमत्कारो जन्यते, तदन्योऽप्यर्थः भासते, ततश्च प्रकृताप्रकृतार्थप्रतिपादकशब्देऽपि काव्यत्वं स्यात्तद्वारणाय ज्ञानं भावनाविशेषरूपं गृह्यते ।

ननु तथाप्यतिव्यातिः । यतो भावना पुनः पुनरनुसन्धानरूपा । तच्च धारया प्रवहमानं ज्ञानमेव । तथा धारया जायमाने ज्ञाने चमत्कारजनकाः केचन पदार्था भासन्ते तदैव तत्प्रतिपादकाः शब्दा अपि, अतो धारावाहिक– सकल–शाब्दबुद्धि–विषय – चमत्कार–जनकतावच्छेदकार्थ–प्रतिपादके वाक्ये लक्षणप्रसक्तिरस्त्येवेत्याह – यत्प्रतिपादितेति । द्वितीयादिज्ञानं सकलपदार्थः । एकपदार्थेऽपरपदार्थसंसर्गरूपवाक्यार्थज्ञाने जाते कारणीभूतयोराकाङ्क्षादेः पदार्थोपस्थितेश्चाभावेन शब्दजन्यधारावाहिकबुद्धिरेव नोदेतीति परतान्त्रिकाणां मतम् । आलङ्कारिकाणां चमत्कारे भावनायाः कारणत्ववादिनां मते तु शाब्दं ज्ञानमपि धारावाहिकं भवति ।

येन शब्देन अर्थात् यादृशानुपुर्वीमता शब्देन प्रतिपादितो बोधितोऽर्थः विषयो यस्याः सा यत्प्रतिपादितार्थविषयिका एवंभूता या भावना यत्प्रतिपादितार्थविषयकभावना। विषयिका–शब्दस्य भाषितपुंस्कत्वात् पुंवद्भावः । तादृशभावना चमत्त्कारजनिका । भावनानिष्ठो धर्मः चमत्कारजनकता तदवच्छेदकं भावनात्वम् । तत्त्वं काव्यत्वम् । सुस्पष्टन्त्वेवं स्यात्। चमत्कारजनकतावच्छेकीभूत–यादृशानुपूर्वीमच्छब्दृतिपादितार्थविषयक–भावनात्वविशिष्टभावनाविषयकार्थप्रतिपादकं यत् तादृशानुपूर्वीमच्छब्दत्वं तत्त्वं काव्यत्वम्। अयं भावः। यादृशानुपूर्वीमता शब्देन अर्थः प्रतिपाद्यते तदर्थविषयिका भावना चमत्कारजनिका, ततश्च तज्जनकभावनाविषयार्थप्रतिपादकः तादृशानुपूर्वीविशिष्टः शब्दः काव्यमिति ।

एवं गुरुभूतलक्षणे विनेयानुन्मुखीभावः स्यादतो लक्षणान्तरमाह – स्वविशिष्टेति । चमत्कारत्वं विद्यते अस्मिन् स चमत्कारत्ववान्, एवं हि समवायसम्बन्धेन चमत्कारत्वं चमत्कारे विद्यते, चमत्कारत्ववान् चमत्कार एव नान्यत् काव्यमतः सम्बन्धान्तरमुपन्यस्यति–

स्वेत्यादिना । स्वं चमत्कारत्वं तद्विशिष्टः चमत्कारः तज्जनिका अर्थविषयकभावना तन्निष्ठो धर्मः जनकता तदवच्छेदकोऽर्थः भावनात्वमपि अवच्छेदकम्, तथापि अर्थ एव ग्राह्यः । यतो हि अर्थो भावनायाः विषयः। एवञ्च विषयितासम्बन्धेन भावनानिष्ठचमत्कारजनकता–वच्छेदकता अर्थे वर्तते । तत्प्रतिपादकत्वसम्बन्धेन तद्बोधकत्वसंसर्गेण चमत्कारत्ववत् काव्यम् ।

सोऽयं निष्कर्षः । स्वावच्छिन्नजन्यतानिरूपिता या जनकता तादृशजनकतानिरूपिता या विषयित्वसम्बन्धावच्छिन्नाऽवच्छेदकता तादृशावच्छेकतावदर्थप्रतिपादकत्वसम्बन्धेन चमत्कारत्ववत्वं काव्यत्वम् । स्वं सुखत्वव्याप्या चमत्कारत्वरूपा जातिः, तदवच्छिन्नश्चमत्कारः। तन्निष्ठा या जन्यता तादृशजन्यतानिरूपिता या भावनानिष्ठा जनकता तादृशजनकतानिरूपिता या विषयित्वसम्बन्धावच्छिन्ना अर्थनिष्ठा अवच्छेदकता तादृशावच्छेदकतावदर्थप्रतिपादकत्व–सम्बन्धेन चमत्कारत्ववत्वं काव्यत्वम् । अवच्छेदको धर्मः, विशेषणं, सम्बन्धश्च ।

घटरूपार्थप्रतिपादकः यथा घटशब्दस्तथा रमणीयरूपार्थप्रतिपादकः रमणीयशब्दः स एव काव्यं स्यादुक्तप्रकारलक्षणकरणे, तस्मात् प्रकारान्तरेण लक्षणं विरच्यते । वर्णत्वव्यापकसमुदायत्वं काव्यत्वम् । ननु एवमुक्तावपि स्वरूपसम्बन्धेन तादृशसमुदायत्वस्य प्रत्येकवर्णेऽपि सत्त्वात् प्रत्येकवर्णे काव्यत्वापत्तिरिति चेन्न, पर्याप्तिसम्बन्धेन तादृशसमुदायत्वस्य विवक्षणीयत्वात् । ननु तथोक्तावपि शून्यं वासगृहमिति सम्पूर्णश्लोक–घटशब्द+एतदुभयस्याऽपि काव्यत्वव्यवहारापत्तिः स्यादिति चेन्न, तादृशसमुदायत्वे न्यूनवृत्तित्वानिरूपकत्वस्य निवेशनीयत्वात् । ननु तथाऽपि असम्भवः स्यात् । यत्किञ्चित्समुदायत्वनिष्ठन्यूनवृत्तित्वाऽनिरूपकत्वस्यैव सत्त्वात् । तथाहि–तादृशसमुदायत्वे शून्यमिति शब्दद्वयघटितसमुदायत्व–निष्ठ–न्यून–वृत्तित्वानिरूपकत्वस्य सत्त्वादिति चेन्न । तन्न्यूनवृत्तित्वाऽनिरूपकत्वं नाम तदभाववद्वृत्तित्वानिरूपकत्वम्, तच्च तदभावाधिकरणनिरूपितवृत्तित्वाश्रयत्वाभावः। ततः तच्छब्देन वर्णद्वयवृत्तिसमुदायत्वस्य ग्रहणं तदभावः गृहशब्दे तदभावाधिकरणं गृहशब्दः तन्निरूपितवृत्तित्वं सम्पूर्णसमुदायत्वे तिष्ठति अतः तदाश्रयत्वमेव सामुदायत्वे न तु तदभावः, अतः केवलन्यूनवृत्तित्वानिरूपकत्वमपहाय रमणीयार्थप्रतिपादकवर्णत्वव्यापकसमुदायत्व–

निष्ठन्यूनवृत्तित्वानिरूपकत्वं निवेशनीयम् । तथा च नासम्भावो नातिव्याप्तिश्च ।

तथाहि – तादृशसमुदायत्वं न वर्णद्वयमात्रवृत्ति समुदायत्वम् अपितु सम्पूर्णश्लोकवृत्तिसमुदायत्वमेव । तादृशसमुदायत्वाभावाधिकरणं घटशब्दः न तु शून्यं वासगृहमिति गृहशब्दः तत्र घटशब्दे सम्पूर्णसमुदायत्वस्य अभावात् । एतेन नासम्भवः।

तादृशसमुदायत्वपदेन सम्पूर्णश्लोकमात्रवृत्तिसमुदायत्वस्य ग्रहणं तदभाववति घटशब्दे शून्यमित्यादिसम्पूर्णश्लोकघटशब्दैतदुभयवृत्तिसमुदायत्वस्यासत्वमेव । अर्थात् तदभावाधिकरणनिरूपितवृत्तित्वाश्रयत्वमेव न तु तदभाव इत्यतिव्याप्तिनिरासश्च ।

एवं स्वमतेन काव्यलक्षणं निरुच्य परेषां तदालोचयितुं परप्रणीतानि वचांसि समाचिनोति। यत्तु प्राञ्च इति । प्राञ्चः शब्दार्थयोः काव्यत्ववादिनो मम्मटाः । आदरे बहुत्वम् । शब्दार्थाविति । अत्र भेदं कथयति – शब्दार्थयुगलप्रतियोगिताकभेदवत्काव्यम् । शब्दार्थयुगलाद्भिन्नं काव्यम् । काव्यपदवाच्यता शब्दार्थयोर्नास्ति । कुत एतत् – मानाभावात्। प्रमाणं नास्ति । मानाधीना मेयसिद्धिरिति सिद्धान्तात् । पठ्धातोः स्पष्टशब्दरूपार्थकतया पठनकर्मताया अर्थे बाधात् शब्दस्यैव काव्यत्वं न तु अर्थस्य । काव्यं पठ्यते इत्यनेनैव सिद्धेरुच्चैः पदोपादानमप्रयोजनम् । चेत्काव्यपदवाच्यता अर्थेऽपि तर्हि काव्यादर्थोऽवगम्यते, काव्यं श्रुतमर्थो न ज्ञातः इति न व्यवहरेयुः केऽपि, नहि अर्थादर्थोऽवगम्यते, नाऽपि अर्थस्य श्रवणं भवति प्रत्युत वैपरीत्येन शब्दविशेषस्य रमणीयेत्यादिनाऽस्माभिः प्रदर्शितस्य एव नत्वर्थस्य एवमादिसकललोकव्यवहारात् काव्यपदवाच्यतायाः साध्यमानत्वाच्च । ननु शब्दार्थौ काव्यं; परं, काव्यमुच्चैः पठ्यते इत्यादि शब्दमात्रे काव्यव्यवहारः लक्षणया साध्य इत्यपि न । यतो लक्षणयाऽपि व्यवहर्तुं शक्यं; यदि तद्युगलस्य काव्यपदमुख्यार्थतायां शक्तिग्राहकप्रमाणेषु व्याकरणोपमानकोषाप्तवाक्यव्यवहारविवरणसिद्धपदसान्निध्येषु किमपि प्रमाणं भवेत् । किमपि प्रमाणं नास्तीत्यर्थः । नन्वस्माभिरुच्यते इति चेन्न, विमतवाक्यं विरुद्धज्ञानवतो भवतो वाक्यं तु पुनरग्राह्यमेव । सम्पिण्डितार्थमाह – इत्थञ्च विमतवाक्यस्याश्रद्धेयत्वेन, व्यवहाररूपविनिगमकस्य सद्भावेन च । एकतरपक्षपातिनी युक्तिर्विनिगमना तस्या अभावात् । निर्गलितार्थमाह – तदेवमिति । तत्तस्मात् एवमुक्तरीत्या। व्यवहारगृहीतवृत्त्या शब्दविशेषस्यैव काव्यपदजन्यप्रतीतिविषयत्वे । सिद्धे निर्णीते । तस्यैव

शब्द विशेषस्यैव । लक्षणं स्वरूपम् । स्वकल्पितस्य स्वकल्पनया उद्भावितस्य ।

एषैवेति । काव्यलक्षणनिष्ठा गतिरेव । शब्दप्रधानस्य अर्थात् स्मृतनियतानु–पूर्वीविशिष्टशब्दस्य वेदत्वम् । ततश्च 'अग्न आयाहि वीतये' इत्यानुपूर्व्या वेदत्वं; न तु वीतये आयाहि अग्ने ! इत्यस्य, न अ अग्ने ! वीतये आयाहि इत्यस्य, नापि विभावसो आगच्छ पानाय इत्यस्य वेदत्वम् । पुराणत्वम् आदिपदग्राह्यं रघुवंशत्वादि अपि अस्मृतनियतानुपूर्वीविशिष्टशब्दस्यैव । अन्यथा स्मृतत्वविशिष्टवर्णगतनियतानुपूर्व्या वेदत्वादेरस्वीकारे । तत्र वेदादिलक्षणेषु इयं काव्यलक्षणनिर्दिष्टा दुरवस्था, इदं वैदिकम्, इदं कालिदासीयम्, इदं व्यासीयं पद्यमिति व्यवहारस्योच्छेदः स्यात् ।

यत्त्विति । आस्वादस्य आनन्दस्य उद्बोधकत्वं जनकत्वमेव काव्यत्वस्य काव्यमिति व्यवहारस्य प्रयोजकं साधकम् । तच्च प्रयोजकत्वरूपमुद्बोधकत्वम् । अविशिष्टं समानम्। लक्षणवेद्यं लक्षणीयं लक्ष्यम् । प्रकृते काव्यलक्षणे लक्ष्यत्वं स्यादित्यर्थः । सर्वेषामाङ्गिक–सात्त्विकवाचिकाहार्याणामभिनयानाम् । क्वचिदास्वादाभावोऽपीति प्रायश इत्युक्तम् । तथात्वेन रसजनकत्वेन तत्त्वापत्तिः काव्यत्वापत्तिः। उपसंहरन्नाह – एतेनेति । अत्र प्रकृते लक्षणे ।

प्रकारान्तरेण विवेचयितुमाह–अपि चेति । प्रकृष्टा वृत्तिः प्रवृत्तिः शक्तिः तस्या निमित्तं सम्बन्ध इत्यन्वर्थताबलादागताशयवान् ग्रन्थकारः पृच्छति–अपि च काव्यपदप्रवृत्तिनिमित्तमित्यादिना ग्रन्थेन शक्यतावच्छेदकः सम्बन्धः कः? पर्याप्तिर्वा स्वरूपं वा । शब्दार्थयोर्व्यासक्तमिति । अयमाशयः – यथा वस्तुद्वयस्थले द्वित्वस्य समवायेन उभयत्र प्रत्येकस्मिंश्च सत्वात् 'अयं द्वित्ववान्' इति प्रतीतिर्भवत्येव । तदर्थश्च समवायसम्बन्धावच्छिन्नद्वित्वनिष्ठप्रकारताकः इदन्त्वावच्छिन्नविशेष्यताको बोधः । तद्वत् एको द्वौ इति प्रयोगः कुतो नेति प्रयोगापत्तिवारणाय पर्याप्तिसम्बन्धोऽनुमन्यते, स च द्वयोः व्यासज्य तिष्ठति,एवंशब्दार्थौ काव्यमित्यत्र काव्यत्वं द्वयोः शब्दार्थयोः व्यासक्तम् पर्याप्तिसम्बन्धेन व्यासज्य वर्त्तते वेति । स्वरूपेण काव्यत्वं प्रत्येकं शब्देऽपि अर्थेऽपि वर्तते वेति भावेनाह – प्रत्येकपर्याप्तमिति ।

आस्वादव्यञ्जकत्वं रसव्यञ्जकत्वं काव्यत्वनियामकबीजं तस्य च शब्द इव अर्थेऽपि सत्त्वात्काव्यत्वमुभयस्मिन् व्यासज्य वर्तते । शब्द एव काव्यत्वस्वीकारे अर्थस्य अलक्ष्यतया

भागासिद्धिदोषः स्यादिति काव्यप्रकाशाशयमननुमोदयन्नाह–नाद्य इति । अदो हृदयम् । यस्य प्रत्येकव्यवहारो न भवत्यदो व्यासज्यवृति । ततश्च यथा, द्वित्वावच्छिन्नप्रतियोगिताको भेद एकस्मिन् वर्त्तते तेन हि द्वित्वस्य एकमात्रे न व्यवहारस्तथा शब्दार्थोभयप्रतियोगिताको भेदः शब्दे अर्थेऽपि वर्त्तते तेन च घटो न घटपटोभयमितिवत् श्लोकवाक्यं न काव्यमिति व्यवहारस्यापत्तिः स्यादिति ।

यथा घटत्वस्य प्रत्येकघटे सत्त्वात् अयं घटः घटत्ववान्, स घटः घटत्ववान्, तद्वत् शब्दः काव्यत्ववान्, अर्थः काव्यत्ववान्, ततश्च शब्दार्थोभयात्मके एकस्मिन् पद्ये काव्यद्वयवहारस्य आपत्तिः दोषः स्यादिति हृदयेनाह न द्वितीय इति ।

पूर्वोक्तं निष्कर्षयन्नाह – तस्मादिति । तस्मात् उक्तव्याख्यानात् शब्दः काव्यमित्येव साधु । शब्दनिष्ठतैवेति । नैयायिकादीनां न्यायादिपदार्थज्ञानात्सामान्यतश्चमत्कारोद्भूतेरानु–भविकत्वाद् भवताऽपि स्वीकरणीयत्वाच्च चमत्कारस्यैव काव्यार्थज्ञानजन्यरूपत्वं, एवञ्च चमत्कारविशेषजनकतावच्छेदकं काव्यत्वमित्यायातम् । किञ्चिदवच्छेदकपुरस्कारेणैव तद् ग्रहस्यौचित्यात् । एवञ्च काव्यत्वज्ञानाधीनं चमत्कारविशेषजनकताज्ञानं, चमत्कारविशेषजनकत्वज्ञानाधीनं काव्यत्वज्ञानमिति परस्पराश्रयः। तद्वारणाय काव्ये विभावादिमत्वं पुरस्कृत्य चमत्कारविशेषजनकत्वज्ञानेन काव्यत्वज्ञानस्य सुलभत्वं भवता कथनीयम् । तत्र विभावादिमत्त्वं न केवलं पाठ्य–श्रव्यकाव्ययोः किन्तु अवस्थानुकृतिरूप नाट्यपदाभिधेये दृश्ये नाटकादावपि अस्ति । वस्तुतस्तु मुनिना दृश्ये नाट्य एव रसादीनां प्रतिपादनं कृतम् । एवञ्च सकलालङ्कारिकसम्मतदृश्यानां नाटकादीनामकाव्यत्वापत्तिः दुष्परिहरणीया स्यात्, यदि काव्यत्वस्य शब्दनिष्ठत्वमेवेति बलवदागृह्येत ।

अपि च आस्वादव्यञ्जकतया नाट्याङ्गानां सर्वेषामपि काव्यत्वापत्तिरिति तु –

एकावयवसंस्थेन भूषणेनेव कामिनी
पदद्योत्येन ध्वनिना सुकवेर्भाति भारतीति

सर्वसम्मतसिद्धान्तात् पदतदेकदेशवर्णप्रकृतिप्रत्ययोपसर्गकालादीनां शब्दाङ्गानां सर्वेषां चमत्कारत्ववत्तया तत्त्वापत्तिस्तवाऽपि दुष्परिहरा । इष्टापत्तिश्चेत्तदा तत् काव्यत्वं श्लोकवाक्योभयपदादिषु व्यासक्तं, प्रत्येकपर्याप्तं वा । आद्ये एको न त्रय इति

व्यवहारवच्छ्लोकवाक्यं न काव्यमिति व्यवहारापत्तिः । द्वितीये एकस्मिन् श्लोके अनेककाव्यव्यवहारापत्तिः स्यात् । तस्मात् शब्दार्थौ काव्यमित्येव परं साधु । कथञ्चेदित्थम् – अजाद्यदन्तस्य अर्थशब्दस्य पूर्वनिपातार्हत्वेऽपि शब्दस्य पूर्वनिपातेन अभ्यर्हितत्वं प्रकाश्यते । अभ्यर्हितत्वञ्च विशेष्यत्वरूपमेव, ततश्च अर्थविशिष्टः शब्दः काव्यम् । गीतगोविन्दादीनां सङ्ग्रहार्थमेषः पन्थाः ।

ननु यदि अर्थस्य अप्रधानत्वं शब्दस्यैव प्रधानत्वं तर्हि प्रधानाप्रधानयोर्मध्ये प्रधाने कार्यसम्प्रत्यय इति न्यायेन शब्दस्यैव उपदेशो विनेयेभ्यःस्यात् न तु नीतिशास्त्रीय–पदार्थानाम् । शब्दोपदेशार्थं तु व्याकरणशास्त्रं प्रवृत्तमेव । एवं मुख्यकार्यविनाशेन सर्वमेवाकुलं स्यात् । तस्मात् अर्थो मुख्यः, शब्दस्तज्ज्ञानार्थमुपायः । यथा मुख्यस्य जलस्याहरणार्थं घटस्यैव प्रथमोपादानम्, अत एव 'उपेयप्रतिपत्त्यर्थमुपाया अव्यवस्थिता' इत्यादिषूपायानाम् अव्यवस्थितत्वोक्तिः सङ्गच्छते । अव्यवस्थितत्वञ्च अप्रधानत्वमेव । तथा अर्थज्ञानाय शब्दः प्रथममुपादायि । तथा च शब्दविशिष्टः अर्थः काव्यम् । एष शाकुन्तलादिदृश्यकाव्यानां सङ्ग्रहाय द्वितीयः पन्थाः । यत्र शब्दश्चार्थश्च परस्परमेकोऽन्यस्याभावं पूरयति साहाय्यं च विधत्ते तस्मिन् शब्दे सत्येव सोऽर्थो लभ्यतेऽन्यथा न । अर्थवैशिष्ट्यं तत्स्वारस्यं चापि तत्र शब्देनहितमिति द्वयोः परस्परं नैकव्यं तत्र शब्दार्थौ द्वावपि काव्यमेव । एष रघुवंशादिकाव्यानाम्, सङ्ग्रहाय तृतीयः पन्थाः । एवं गुणप्रधानभावेन द्वयोः द्वयोः सत्त्वादेव शब्दार्थाविति द्विवचनोपपत्तिश्च । अन्यथा गुणप्रधानभावेन अवस्थितस्य कस्यचिदेकस्यैव विवक्षायां द्विवचनानुपपत्तिः स्फुटैव ।

ननु कर्मणि घञा निष्पन्नस्य काव्यपदस्यार्थः कविकर्म । तत्र अर्थस्य सिद्धतया कविकृतेरविषयतया योगार्थविरोध इति चेत् न । शब्दोऽपि तु स्वरूपेण सिद्ध एव । तथा च तस्यापि तदविषयतया तदर्थविरोधः समान एव ।

मम तु 'कवृ वर्णने' इत्यस्मान्निष्पन्नस्य 'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता । तदनुप्राणनाज्जीवद्वर्णनानिपुणः कवि' रित्यभियुक्तोक्त्या जीवद्वर्णनानिपुणस्य कवेः 'अनुभाव विभावानां वर्णना काव्यमुच्यते' इत्यभियुक्तोक्तेश्च तादृक् वर्णनात्मकं कर्म तु सिद्धपदार्थेषु, वर्णनोपयोगिनो वर्णपदयोः रचनायाञ्च अविरुद्धम् । काव्यं श्रुतं काव्यं बुद्धमिति

उभयविधव्यवहारस्य सर्वलोकसिद्धस्य सत्त्वात् लक्ष्यानुरोधेनैव लक्षणनिर्माणमुचितं न तु स्वकल्पनया खण्डनम् ।

सिद्धानुगममात्रं हि कर्त्तु युक्तं परीक्षकैः।

न सर्वलोकसिद्धस्य लक्षणेन निवर्त्तनम् । इति भट्टापादोक्तेः ।

एतदपि न भ्रमितव्यं यदियं श्रव्यदृश्यपाठ्यकाव्यानां कल्पना मदीया किन्तु आचार्याणां तथा व्यवस्था वर्त्तते । तथाहि –

नाट्शास्त्रे ४ अध्याये २७५ तमपद्यस्य गीतप्रयोगमाश्रित्येत्यस्य व्याख्यायामभिनव–भारत्याम् गीयत इति गीतं काव्यम् ।........एष एव तु कलाविधिना निबध्यमानो राघवविजयमारीचवधादिकं रागकाव्यभेदमुद्भावयतीति । यथोक्तं कोहलेन –

लयान्तरप्रयोगेण रागैश्चापि विवेचितम् ।

नानारसं सुनिर्वाह्यकथं काव्यमिति स्मृतम् ॥

लयतश्चास्य गीत्याधारत्वेनाप्राधान्ये गीतेरेव प्राधान्यमिति न काव्यार्थविपर्यासवशेन रागभाषादि विपर्यासो नाट्य इव । तथाहि – राघवविजयस्य हि विचित्र वर्णनीयत्वेऽपि ठक्करागेणैव निर्वाहः मारीचवधस्य ककुभग्रामरागेणैव, अत एव रागकाव्यानि इत्युच्यन्ते एतानि । रागो गीतिस्तदाकत्वात्स्वरस्य तदाधारभूतं काव्यं रागकाव्यमिति ।

महाराजभोजेनाऽपि समुदटङ्कि –

श्रव्यं तत्काव्यमाहुर्यन्नेक्ष्यते नाभिनीयते ।

श्रोत्रयोरेव सुखदं भवेत्तदपि षड्विधम् ॥

नानाविधरसानां व्यवस्थया, कथाया इतिवृत्तस्य सुनिर्वाह्यत्वेन अर्थस्य सद्भावेऽपि गीतेः प्राधान्यात् श्रोत्रयोरेव सुखदत्वात् गीतकाव्यं गीतगोविन्दादि श्रव्यकाव्यत्वेन व्यवहार्यम्।

ना० शा० १ अध्याये ११ पद्यम् –

प्रेक्षणीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेदिति । 'देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषम् ।' 'नाट्यरूपैरसैरेतैः प्रीतिर्भवति चाक्षुषी' इति दिशा दृश्ये अल्पवाक्यैरपि निबद्धे अभिनयैरेव रससिद्धिः प्रदर्श्यतेऽतः अभिज्ञानशकुन्तलादिकं दृश्यं काव्यमिति व्यवह्रियते ।

यत्र पुनः भावविभावानुभाववर्णनात्मकैर्बहुभिर्वाक्यतदर्थेश्च रससिद्धिः वर्त्तते तेषां शब्दार्थोभयात्मकानां रघुवंशादीनां पाद्यकाव्यमिति व्यवहारः।

लक्षणे काव्यलक्षणे गुणालङ्कारादिनिवेशोऽपि न युक्तः, सगुणौ क्वचिदनलङ्कृती शब्दार्थौ काव्यमिति न वक्तव्यम् ।

अत्रालोच्यते–पूर्वं 'गुणालङ्कारादिभिः निरूपणीये काव्ये' इत्युक्त्या काव्यस्य निरूपणयोग्यता गुणालङ्काराद्यधीना इति प्रतिज्ञाय साम्प्रतं लक्षणे तन्निवेशोऽपि न युक्त इति वक्तुमसाम्प्रतम् । किञ्च कान्तालिङ्गनजं सुखम्, न्यायादिप्रमेयज्ञानजं सुखम्, स्वर्गीयं सुखम्, साक्षात्कृतब्रह्मसुखम्, इत्येवमादि सुखेभ्यो विलक्षणं काव्यजन्यं सुखमिति नूनं कथनीयं, तदेव तु कथम् । किञ्चिद् विशेषणं, धर्मं, सम्बन्धं वा पुरस्कृत्यैव कस्यचित्पदार्थस्य निरूपणं भवितुमर्हति ।

एवं सति यद्युच्येत इतरसुखविलक्षणसुखजनकतावच्छेदकं काव्यत्वमिति तथापि काव्यत्वग्रहे विलक्षणसुखजनकत्वग्रहः, विलक्षणसुखजनकत्वग्रहे च काव्यत्वग्रह इतीतरेतराश्रयः । अथोच्येत विभावानुभावव्यभिचारिसंयोगादिति सूत्रस्वारस्यात् तद्द्वारा तादृशसुखजनकतावच्छेदकं काव्यत्वमिति, तथापि काव्ये एव विभावादिव्यवहारः न लोके, तत्र तथा व्यवहाराभावात् । अत एव तज्जन्यस्य तादृशसुखस्य अलौकिकत्वम् । शास्त्रीयानुभवमात्रकल्प्यत्वस्यैव अलौकिकत्वस्वीकारात् । एवञ्च विभावादिप्रतीतिः काव्यत्वज्ञानाधीना । ततश्च काव्यत्वग्रहे विभावत्वादिग्रहः। तद्ग्रहे च तद्द्वारा तादृशसुखजनकत्वग्रहः, तस्मिंश्च सति काव्यत्वग्रहोऽर्थात् लक्षणग्रहः इति चक्रकापत्तिः। एतस्य दोषस्य निराकरणाय अवश्यं प्रयतने कर्तव्ये गुणालङ्काररूपं धर्मं, दोषाभावरूपं विशेषणञ्च विहाय किमन्यच्छरणं स्यात् । तानि च लोकशास्त्रयोरुभयत्र स्वीकृतानि सम्मतानि च । तस्मात् काव्यलक्षणे तेषां निवेशो नितरामुचितः।

किंच अस्मिन् शास्त्रे पदार्थस्वरूपनिर्धारणाय किं वा प्रमाणमृते प्राचीनवचनेभ्यः। तैश्च "उक्तिवैचित्र्यमलङ्कारः" तद्रहितत्वं काव्यस्य न सम्भवति । न हि उक्तिवैचित्र्याभावे काव्यत्वम्" इति भामहादयः।

व्यज्यन्ते वस्तुमात्रेण यदालङ्कृतयस्तदा । ध्रुवं ध्वन्यङ्गता तासां काव्यवृत्तेस्तदाश्रयात्।

इत्येवं काव्यववहारस्य अलङ्काराधीनत्वम् । अन्यथाऽलङ्काराभावे वाक्यमात्रमेव न तु काव्यम्। इति ध्वनिकारः।

वामनाचार्योऽपि ''काव्यं ग्राह्यमलङ्कारात्'' इति अलङ्कारस्यैव काव्यवहारप्रयोज–कत्वमुक्तत्वान् । असार्वत्रिकत्वे हि तस्यालंकारस्य कथं व्यवहारप्रयोजकत्वम् । 'वक्रोक्तिः काव्यजीवितम्' इति कुन्तकः। इत्येवं गुणालङ्कारयुक्तस्यैव काव्यत्वमुररीकृतम् ।

उदितमिति । गुणालङ्कारयुक्तस्यैव काव्यत्वमित्यागृह्येत तदा उदितमित्यादौ तयोरभावादव्याप्तेरापत्तिः स्यात् । परस्य भवतः। अभिमतं स्वीकृतम् । तथा अकाव्य–मिति । अविशिष्टं समानम् ।

अत्रालोच्यते–ननु उदितं मण्डलं विधोःगतोऽस्तमर्कः इत्यत्रापि दितेति दकार तकारयोः, एकत्र दन्तस्थाने, तं, मं, लं, इत्यत्रत्यानामंकाराणामेकत्र नासिकास्थाने, विधोरिति वकारधकारयोश्च एकत्र दन्तस्थाने, तथा तोस्तेति तकारसकारनतकाराणामेकत्र दन्तस्थाने उच्चार्यत्वेन व्यञ्जनेन सादृश्यात् श्रुत्यनुप्रासोऽलङ्कारः, प्रसादो गुणश्च वर्तते । कोह्यनुन्मत्तो ब्रूयात् यदिह न तौ । तस्मान्नाव्याप्तिः।

अन्यच्च एतादृशवाक्यानां काव्यत्वं तर्हि शाल्योदनम् भुङ्क्ते इत्यस्यापि ध्वनिकाव्यत्वं स्यात् । यस्मै एकस्यापि अन्नकणस्य दर्शनं ब्रह्मदर्शनमिव दुर्लभं स इदानीं शाल्योदनं भुङ्क्ते अहो आश्चर्यमिति विस्मयरसः । अस्य कृते व्ययाधिक्यादिचर्चा कीदृशी अयं शाल्योदनं भुङ्क्ते; अतिमहार्घपदार्थभोजीति वस्तु ध्वन्यते । भोः कुत एतस्यैव तपो वर्ण्यते नान्यस्य । श्रृणु । अयं शाल्योदनं भुङ्क्ते सर्वं वाक्यं सावधारणमिति न्यायात् केवलं शाल्योदनमेव भुङ्क्ते नान्यत् । इत्येवं अनियन्त्रितचित्तवृत्तीत्तां विषयास्वादलोलुपानामपेक्षया नियन्त्रित चित्तवृत्तेः विषयपराङ्मुखतया तपः समृद्धिप्रतीतेः व्यतिरेकालङ्काकारो ध्वन्यते । प्रसादो गुणश्च । शाल्यो इति शकारयकारयोरेकत्र तालुस्थाने दनमिति दकारनकारयोरेकत्र दन्तस्थाने उच्चार्यत्वेन व्यञ्जनसादृश्यात् –

उच्चार्यत्वाद्यदेकत्र स्थाने तालुरदादिके ।<br>
सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते ॥

इत्युक्तलक्षणः श्रुत्यनुप्रासो वाच्यालङ्कारश्चास्ति । तस्माद् भवदुक्तं सर्वं प्रौढिवादमात्रमेव

न युक्तिकषसहं न प्राचीनानुसारमिति ।

गुणालङ्कारत्वादेरननुगमाच्चेति । अयं गुणः अयमलङ्कार इत्यनुगम एकाकारा प्रतीति–र्नास्ति । अथवा एकद्व्यादिगुणवत्वं वा काव्यत्वं, समस्तगुणवत्वं वा काव्यत्वम्, एकद्वित्र्यलङ्कारवत्वं काव्यत्वं वा समस्तालङ्कारवत्वं काव्यत्वं वेत्याद्यनुगमः प्रतीतिर्वा नास्तीत्यतोऽपि गुणालङ्कारयोः काव्यलक्षणे समावेशो न युक्तः।

इदमपि न सुन्दरम् । 'काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते । रसस्योत्कर्षकान् धर्मान् गुणान् काव्यविदो विदुः' इत्यस्य तथा गुणालंकारवत्वं काव्यत्वमित्यस्य च अनुगमस्य सद्भावानुगमाभावाच्चेति वक्तुं न पार्यते । न हि सहस्त्रं वाचस्पतयोऽपि एकत्र वाक्ये सर्वान् गुणान् अलंकारांश्च समावेष्टुं प्रभवन्तीति एकद्वित्र्यादि समीक्षणमेव न सम्यगिति ।

दुष्ट–मिति । अयं भावः। मम मते विलक्षणचमत्कारजनकतावच्छेदकार्थबोधकस्य काव्यतया दोषसद्भावे दुष्टं काव्यं दोषासत्वे निर्दुष्टं काव्यमिति प्रयोगो भवितुं युक्तः। भवन्मते तु अदोषौ शब्दार्थौ काव्यमिति लक्षणं, तत्र 'असाधारणधर्मो हि लक्षणम्' इत्युक्तेः शब्दार्थद्वयरूपकाव्ये धर्मिणि दोषाभावगुणालङ्काराणां धर्माणामसाधारणता अपेक्षिता । सा तदैव स्याद्यदा ते धर्माः दोषाभावादयः तं काव्यरूपं धर्मिणं न कदापि परित्यजेयुः । यदि परित्यजेयुस्तदा सा भज्येत अतः तस्या रक्षायै ते धर्माः तं न परित्यजन्त्येव । एवं हि तेषां धर्माणां सद्भावे काव्यत्वम्, अन्यथा अकाव्यत्वमित्येव व्यवहारो भवितुमर्हति । न तु दुष्टं काव्यमिति व्यवहारः।

न च यद्यपि दोषरहितयोरेव शब्दार्थयोः मुख्यतया काव्यत्वं न तु तत्सहितयोः तथापि दुष्टं काव्यमिति व्यवहारो मुख्यार्थबाधाल्लाक्षणिकः स्यादिति वाच्यम् । पूर्वं कथञ्चित् दोषरहितयोः शब्दार्थयोः काव्यताया यदि निश्चयो भवेत्पश्चात् स निश्चयः दुष्टं काव्यमिति व्यवहारस्य बाधको भवेत्, लक्षणागच्छेत् । स निश्चय एव नास्ति अर्थात् काव्य पदार्थःअदोषौ शब्दार्थौ द्वाविति मुख्यार्थनिश्चय एव नास्ति । तर्हि तं विना कथं तस्य लाक्षणिकता । मूलं नास्ति कुतः शाखा । तदेतदुक्तं व्यवहारस्य लाक्षणिकत्वायोगादिति । यथा गङ्गापदं जलरूपार्थवाचकमिति निश्चयेन गङ्गायां घोष इति व्यवहारः बाधितो भवति अतः लक्षणा–भवति । तद्वत्स्यात् । किन्तु तथा नास्ति । इति ।

ननु क्वचित् रूढिप्रयोजनयोरभावाल्लक्षणा न सम्भवति चेन्मा सम्भवतु प्रकृते तु रूढिरप्यस्ति प्रयोजनमप्यस्ति तद्यथा –

तदल्पमपि नोपेक्ष्यं काव्यं दुष्टं कथञ्चन

स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगमिति दण्डिनोक्तेः।

कीटानुविद्धरत्नादिसाधारण्येन काव्यता। दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः इति भट्टनायकोक्तेश्च ।

काव्यं दुष्टमिति रूढिरर्थात् प्राचीनाचार्येषु व्यवहारोऽस्ति तादृशः ।

दोषः सर्वात्मना त्याज्यो रसहानिकरो हि सः

अन्यो गुणोऽस्तु वा मास्तु महान्निर्दोषता गुणः ।

इति सिद्धान्तानुसारं दोषाभावविशिष्टशब्दार्थोपदेश एव प्रयोजनञ्चास्ति । तर्हि कुतो न लक्षणा।

अन्यच्च यथा व्याप्तिविशिष्टपक्षधर्मस्यैव हेतुत्वम् । अर्थात् यो हि व्याप्तेराश्रयः पक्षे पर्वतादौ च तिष्ठति स एव हेतुः। एवञ्च यो हेतुः स आभासो न, यो हि आभासः स हेतुर्न । तथापि तवायं हेतुराभास इति व्यवहारो भवति, तथैव अदोषौ शब्दार्थौ काव्यम्, ततश्च यत्काव्यं तन्न दुष्टं, यत् दुष्टं तन्न काव्यं तथापि तवैतत् काव्यं दुष्टमिति व्यवहारो भवति । न च तवायं हेतुराभास इत्यत्र हेतुपदार्थः हेतुत्वेन अभिमतः तस्याभासत्वमविरुद्धमिति वाच्यम्, तुल्यत्वात्, प्रकृतेऽपि काव्यपदस्यार्थः काव्यत्वेनाभिमतः तस्य च दुष्टत्वं भवत्येव इत्यालोचना।

मूले महीरुहो विहङ्गमसंयोगी शाखायां महीरुहस्तत्संयोगाभाववाँश्चेति व्यवहारेण यथा संयोगस्य अव्याप्यवृत्तिता अर्थात् द्रव्यस्य सर्वावयवं व्याप्य न तिष्ठति संयोगः, तथैव दोषोऽपि काव्यस्य सर्वावयवान् न संयुनक्तीति अंशेन दोषरहितं काव्यं अंशेन दुष्टं काव्यमिति व्यवहारो भवति, न बाधकं किमपि अस्ति इति चेन्न। संयोगस्य तथा व्यवहारे वस्तुस्थिति रेव प्रमाणम्, दोषविषये तु न तथा कस्यापि अनुभवः प्रमाणम्, येनेदं पूर्वार्धे काव्यमुत्तरार्थे न काव्यमिति स्यात्; तस्मात्संयोगवत्तस्य दोषस्य अव्याप्यवृत्तिताया अयोगः असम्बन्धः।

ननु भवतैव कुवलयानन्दकारादिखण्डनावसरे वक्ष्यते यद् 'इह अलङ्कार –शास्त्रे नान्यत् किमपि प्रमाणमृते प्राचीनवचनेभ्यः, इति ।

एवं प्रचीनानां ध्वनिकाराणां वचनं प्रमाणं मनुयां भवतो वा, न्यक्कारोहीत्यत्र पद्ये तैः; पूर्वार्धेऽपि वाक्यगतो विधेयाऽविमर्शः उत्तरार्धेऽपि पदगतः स, एवमुभयत्रापि दोषसत्त्वे

"अत्र श्लोके भूयसा सर्वेषामेषां स्फुटमेव व्यञ्जकत्वं दृश्यते" "एवंविधस्य व्यञ्जकभूयस्त्वे च घटमाने काव्यस्य सर्वातिशायिनी बन्धच्छाया समुन्मीलति।" इत्यादिना ध्वनित्वं साधितम् ।

उद्देश्यप्रतीतिविघातकत्वं दोषत्वं, यदा तु सा न विहन्यते तदा न दोष इत्येव तु समेषां विदुषां भवतोऽपि पण्डितराजस्य मतम् । यतः चन्द्रे कलङ्कः सर्वैः भवद्भिर्वर्ण्यते अथ च नायिकामुखसन्निधाने तस्य वराकस्य का का दशा न क्रियते, तथापि वदनसौन्दर्य–निरूपणावसरे स एव उपमानत्वेन सगौरवं साटोपञ्च आद्रियते । एतत्किम् ।

तदानीं तद्गतमाह्लादमेव उद्देश्यं भवति ततः कलङ्को न विवक्ष्यते । प्रत्युत, एको हि दोषो गुण–सन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्क इत्येवं कथ्यते । यदा उद्देश्यो दोषस्तदा तथा स कथ्यते । एवमत्र कविविवक्षापरतन्त्रा शास्त्रस्थितिः । तदुक्तम् "अनन्य परतन्त्राम्" कवेस्तत्प्रतिभायाश्च अन्यो यः आत्मनः भारत्याः परस्तदायत्तत्वरहिताम् । कथामुत्प्रेक्षितुं समर्थः। अतः एवोपदिष्टमानन्देन सानन्दम् –

इतिवृत्तवशायातां त्यक्त्वाननुगुणां स्थितिम् ।
उत्प्रेक्ष्याप्यन्तराभीष्टरसोचितकथोन्नयः॥ इति ।

रसभावादि–विषय–विवक्षाविरहे सति । इत्यादि ।

अन्यच्च दोषोऽपि गुणायते, गुणोऽपि दोषायते, क्वचिद्दोषः क्वचिद्गुणः क्वचिन्नैकोऽपि । अतः प्राधान्येन व्यपदेशाः भवन्ति । यस्मात् सन्नपि दोषः प्रतिभाहितेन सौभाग्येन प्रतिबध्यते । "क्वनु पुनः सर्वत्र सर्वे गुणाः" इति ।

शरीरघटकेति । अयं भावः । अवयविनि शरीरे निरूप्यमाणे यैरवयवैः स अवयवी निष्पद्यते ते अवयवा एव निरूपणीयाः अलोचनीयाश्च । सत्यां निष्पत्तौ गुणाधानार्थम्, शोभासम्पादनार्थञ्च प्रयतनीयमिति स्थितिः तस्मात् काव्यशरीरे गुणालङ्कारयोर्घटकता न

सम्भवति । इति ।

तत्रेदमालोचनीयम् । काव्यशरीरं निष्पादनीयं न तु मानवादिशरीरं, येन करचरणादिमत्त्वमेव अपेक्षितं स्यान्न गुणादिकम् । यथा पञ्चावयवं वाक्यं न्यायशरीरं परार्थानुमाने, स्वार्थानुमाने द्व्यवयवं प्रतिज्ञाहेतुरूपमेव वाक्यं तत् । एवञ्च यस्य शरीरस्य अवयविनः ये यादृशाश्च अवयवा यत्र अपेक्ष्यन्ते तत्र ते एव तादृशा एव गृह्यन्ते नान्ये । तथा इदं काव्यशरीरं गुणालङ्कारादिभिरवयवैरेव सङ्घट्यते नान्यैरन्यथा काव्यवृत्तेस्तदाश्रयादित्यादि महाकविसम्प्रदायस्याकुलत्वं स्यात् उच्छेदो भवेत् । तस्मात् गुणालङ्कारयोः शरीरघटकत्वानुपपत्तेश्चेति भवदुक्तमेवानुपपन्नम् । इति ।

केवलेति । केवला प्रतिभा प्रतिभैव काव्यस्य कारणम्, अन्यदभ्यासादिकं तु सर्वं प्रतिभायाः कारणत्वात्परम्परया कारणमिति । अयं भावः। काव्यस्य किंकिं कारणमित्यत्र सप्तदशमतानि । तत्र पण्डितराजमते इदमुक्तम् । एकमतमेतत् । अन्यानि षोडश मतानि बालक्रीडायां निर्दिष्टानि ।

तत एव द्रष्टव्यानि । सा प्रतिभा । काव्यस्य घटनाया रचनायाः अनुकूलयोः । शब्दस्यैव काव्यस्वरूपतया कथं शब्दार्थयोरित्युक्तिस्तु प्रतिपाद्य – प्रतिपादकभावेनेत्यर्थः। उपस्थितिर्ज्ञानम् । तद्गतं तस्यां निष्ठं प्रतिभात्वं जातिः। जातेः साधकेषु बहुषु कारणेषु एकमुपन्यस्यति । काव्यकारणतेति ।

स्वानुकूलकृतिमत्वसम्बन्धावच्छिन्ना काव्यत्वाच्छिन्ना या काव्यनिष्ठा कार्यता तादृशकार्यतानिरूपिता या समवायसम्बन्धावच्छिन्ना प्रतिभानिष्ठा कारणता सा किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्, पटगतकार्यतानिरूपिततन्तुवृत्तिकरणतावत् । यथा तन्तुवृत्ति कारणता तन्तुत्वधर्मावच्छिन्ना तथा प्रतिभावृत्तिकारणताऽपि प्रतिभात्वधर्मावच्छिन्ना। निरवच्छिन्नायाः कारणताया असम्भवात् । या या कारणता सा सा किञ्चिद्धर्मावच्छिन्ना इति सामान्यव्याप्तिः ।

भिन्नदेशस्थयोः पदार्थयोः कार्यकारणभावो न हि भवति अपि तु समानाधिकरणयोरेव। एवञ्च यत्र काव्यमुत्पद्यते तत्रैव तत्कारणेन प्रतिभया स्थेयम्, काव्यं शब्दरूपमाकाशे, प्रतिभा ज्ञानरूपतया आत्मनि तिष्ठति ततः कथं कार्यकारणभावः स्यात् । अतः काव्यस्य

आत्मनिष्ठत्वसम्पत्तये सम्बन्धः स्वानुकूलकृतिमत्त्वरूपः कल्प्यते । स्वं काव्यं तदनुकूला कृतिः निर्माणप्रयत्नः तद्वान् आत्मा । एवं स्वानुकूलकृतिमत्त्वसम्बन्धेन काव्यमात्मनि । प्रतिभाऽपि ज्ञानरूपतया आत्मनि । ततस्तयोः सामानाधिकरण्यम् ।

उपाधिरूपं वा खण्डमिति । अयं भावः । अन्यूनानतिप्रसक्तो हि धर्मः अवच्छेदको भवति । अतिप्रसक्तो हि धर्मः स न भवति । प्रतिभात्वं हि घटत्ववदतिप्रसक्तमतः कारणताया अवच्छेदकं नास्ति । अतिप्रसक्तता चेत्थम् । घटत्वं सुवर्णघटेऽपि वर्तते किन्तु तत्र सुवर्णस्य तेजस्त्वात्पार्थिवत्वं नास्ति । पटादिषु पार्थिवत्वं वर्तते किन्तु तत्र घटत्वं नास्ति । पार्थिवघटे तु पार्थिवत्वघटत्वयोरुभयोरपि समावेशः, अतोऽतिप्रसक्ततया साङ्कर्याज्जातित्वाभावो घटत्वे यथा, तथा प्रतिभात्वमपि जातिर्नास्ति । न्यायादिविषयानुकूलशब्दार्थोपस्थितिरूपप्रतिभायामपि प्रतिभात्वं वर्तते किन्तु तत्र काव्यघटनानुकूलत्वं नास्ति । यत्र काव्यघटनानुकूलत्वं देशे काले च वर्तते तत्र प्रतिभाया ज्ञानरूपत्वात् प्रतिभात्वं नास्ति उभयोः काव्यघटनानुकूलत्वस्य प्रतिभात्वस्य च काव्यघटनानुकूलशब्दार्थोपस्थितिरूपप्रतिभायां समावेशादतिप्रसक्तता साङ्कर्यम् तस्माज्जातेरभावात् प्रतिभात्वमुपाधिः।

उपाधिः द्विविधः । अखण्डोपाधिः सखण्डोपाधिश्च । यः नित्यः सन् एकस्मिन्नेव वस्तुनि स्वरूपसम्बन्धेन तिष्ठति, अर्थात् यः स्वरूपतो भानयोग्यः स धर्मः अखण्डोपाधिः, यथा आकाशत्वम् । यदि तु निर्वक्तुमयोग्यः विवरीतुमनर्हः अखण्डोपाधिस्तदा तु शब्दसमवायिकारणतया विव्रियमाणमाकाशत्वं न तथा । तदा अनुयोगितात्वप्रतियोगिता–त्वविषयतात्वादि तथा । जात्यखण्डोपाध्यतिरिक्तपदार्थानां किञ्चिद्धर्मपुरस्कारेणैव भाननियमात् स्वरूपेण भानायोग्यः । ततश्च विवरणमपेक्षते यः, स धर्मः सखण्डोपाधिरिति व्यवह्रियते यथ घटवद्भूतलमित्यत्र घटः भूतलस्य उपाधिः। स च न जातिरूपः, नित्यत्वे सति अनेकसमवेतत्वरूपजातिलक्षणस्यालग्नत्वात् । न चाखण्डोपाधिरपि घटत्वेन विव्रियमाणत्वात्। तस्मात्सखण्डोपाधिः। एवमेव प्रतिभात्वमपि काव्यघटनानुकूलयोः शब्दार्थयोरुपस्थितित्वेन रूपेण निर्वक्तुं शक्यत्वात्सखण्डोपाधिः ।

तस्याः प्रतिभायाश्च । देवतायाः प्रसादेन जन्यमदृष्टं पुण्यम् । मन्त्रानुष्ठाननिष्ठस्य नेदिष्ठा कविराजतेति प्रमाणाद् । यथा श्रीहर्षस्य, ''तच्चिन्तामणिमन्त्रचिन्तनफले काव्ये

महाचारुणि'' इत्युक्तेः। महापुरुषस्य प्रसादेन जन्यं तत् । विलक्षणव्युत्पत्तिः। लोकशास्त्रकाव्येतिहासाद्यवेक्षणात् विशिष्टं ज्ञानं बहुज्ञता बहुश्रुतता । इति यावत् । अभ्यासः काव्यकरणाभ्यासः काव्यं कर्तुममन्दाभियोगः । न तु त्रयमेव अदृष्टव्युत्पत्त्यभ्यासानां त्रयं मिलितं प्रतिभात्वावच्छिन्नां प्रतिभां प्रति न कारणम् । त्रयाणां कारणाभावे हेतुमाह बालादे– रिति । एष निर्यासः। यद्धि प्रकारान्तरेणापि फलं भविष्यतीति रूपान्यथासिद्धिस्तया शून्यं भवेत्, अथ च नियमेन कार्यात्पूर्वं तिष्ठेत्, तत्कारणं भवेत् । देवतादिप्रसादलब्धप्रतिभस्य बालस्य काव्ये तौ न तथा । न च तत्र बाले तयोः व्युत्पत्यभ्यासयोः पूर्वजन्मार्जितयोः कल्पनं कर्तव्यम्, अत एव जन्म जन्म यदभ्यस्तं तदग्रेऽग्रेऽभिधावतीत्युक्तिश्च सङ्गच्छते इति वाच्यम् । सिद्धे कारणत्वे तयोः कल्पनं, कल्पने च सति कारणत्वमिति परस्पराश्रयो दोषः स्यात् ।

ननु बीजाङ्कुरन्यायानुसारं परस्पराश्रयदोषोऽपि सह्य इति चेदाह – गौरवात् । गौरवं चतुर्विधम् । कल्पनाकृतं, सम्बन्धकृतम्, उपस्थितिकृतम् शरीरकृतञ्च । तत्रात्र कल्पनाकृतं गौरवं भविष्यति । ननु प्रामाणिक–गौरवस्य स्वीकर्तव्यतया तत्कल्पना कर्तव्या इति चेदाह – मानाभावात् । तादृशकल्पनाकरणे प्रमाणं नास्तीति भावः। ननु दिवाभोजनाभाववतो देवदत्तस्य पीनत्वान्यथानुपपत्त्या रात्रिभोजनाक्षेपवत् प्रतिभान्यथानुपपत्तिरेवास्तां तादृशकल्पने प्रमाणमिति चेदाह–कार्यस्य । प्रतिभाया अन्यथापि जन्मान्तरीयाभ्यासव्युत्पत्तिकल्पनां विनापि केवलादृष्टेन उपपत्तेश्च उत्पत्तेः सम्भवाच्च ।

काव्योत्पत्तेश्च प्रत्यासत्तयः पञ्चधा । आत्म १ विषय २ विषयता ३ काल ४ शरीर ५ निष्ठ भेदात् ।

अयं भावः– कारणं विना कार्यमनुपपन्नमिति अन्यथानुपपत्या प्रत्यक्षकारणादर्शने च जन्मान्तरीयं कारणं कल्प्यते एषो हि सिद्धान्त इति । यथा लोके काव्येतरजगति बलवत तर्कादिना अकाव्येन प्रमाणेन । लोके वेदस्तथाध्यात्मं प्रमाणं त्रिविधं स्मृतमित्याभियुक्तोक्तेः श्रुतिस्मृतिशिष्टाचारान्तःकरणप्रवृत्यादिना कारणतायाः निर्णये सति एषां कार्याणामिमानि कारणनि इत्येवं रूपानिश्चयस्य सद्भावे पूर्वं जाते सति पश्चात् तस्मिन्निर्णये व्यभिचारः अन्वयव्यभिचारः व्यतिरेकव्यभिचारः उपस्थितः ।

अयमाशयः । पापं दुःखस्य जनकं, पुण्यं सुखस्य जनकमिति वेदादेः डिण्डिमघोषः। परं लोके व्यभिचरन्तोऽपि देवब्राह्मणगुरुभ्यो द्रुह्यन्तोऽपि सुखिनः। धर्ममाचरन्तोऽपि देवद्विजगुरुन् सेवन्तोऽपि दुःखिन इति वेदादिघोषविरुद्धमेव दरीदृश्यते । यत्र २ सुखं तत्र २ धर्मः इत्यन्वयः । तस्य यत्र २ सुखं तत्र २ पापमिति व्यभिचारः । धर्मभावे पापे सुखाभावः इति व्यतिरेकः। तस्य, धर्माभावे पापे सुखमिति व्यभिचारः उपस्थितः स चावश्यं वारणीयः परिहरणीयः । यतो वेदादि–निर्दिष्ट–निर्णय–विरुद्धं भवितुं नार्हति । कथमेतदभूत्, कारणं विना कार्यं नहि भवति । प्रत्यक्षादिकं कारणं नास्ति अतः सुखेऽपि प्रत्यक्षधर्माभावः. धर्माभावे पापेऽपि सुखमिति दशायां जन्मान्तरीयं धर्माधर्मादि कल्प्यते अनुमीयते, अन्यथा तु तादृश धर्माधर्मादि कल्पनां विना तु व्यभिचारोपस्थित्या उक्तव्यभिचारज्ञानेन पूर्ववृत्ते कारणतानिर्णये प्राग्वेदादिनिर्दिष्टे कारणताया निश्चयविषये जनानां भ्रमत्वस्य प्रतिपत्तिरेव जायते अयं वेदादिनिर्णयः भ्रम इत्याकारकं ज्ञानमेव भवति । अर्थात् एवं कृते इष्टं सिद्ध्यति अनेवंकृतेऽनिष्टं भवति । इत्येवं वेदादिरपि बोधयति, निर्णयति, अवैदिकोऽपि निर्णयति । तत्र वेदादिनिर्णये व्यभिचारोपस्थित्या जन्मान्तरीयं धर्माधर्मादिकमनुमीयते । अवैदिके तु अस्मिन् तदुपस्थित्या भ्रम एव बोध्यः । वेदादेस्तु प्रमा एव जायते न भ्रमः । अत एव प्रमाकरणात् भ्रमाकरणाच्च एव वेदस्य बलवत्त्वम् । तदेतदुक्तम् – अन्यथा तु बलवताऽऽगमादिना तदनिर्णये तु इति । एतावता ''न तु त्रयमेवे'' त्यस्य व्याख्यानं कृतम् ।

शङ्कते । एतज्जन्मनः व्युत्पत्यभ्यासौ न स्तः । पूर्वजन्मनस्तौ न स्वीक्रियते । तर्हि बहुज्ञतामभ्यासं च विना शास्त्रीयाणां लौकिकानां च प्रत्यक्षपरोक्षभूतानां विषयाणां वर्णनं निरूपणं वा कथं तवादृष्टवादिनो मते सेत्स्यति । यद्युच्यते अदृष्टप्रभावदुभौ प्रादुर्भविष्यतः तर्हि कुतः पृथक्तो व्युत्पत्यभ्यासौ कारणत्वेन स्वीक्रियेते । केवलमदृष्टमेव प्रतिभायाः कारणं भवतु ।

उत्तरति । नापि केवलं एकमात्रमदृष्टमेव प्रतिभायाः कारणं वक्तव्यं स्यात् । केवलपदार्थः व्युत्पत्यभ्यासयोः निरासार्थः । स्पष्टार्थ इति तु न शोभते । संजाताभ्यां ताभ्यामुत्तरमिति शेषः । अर्थात् सञ्जाताभ्यां ताभ्यां प्रतिभा उत्पद्यते ।

तत्रापि कथमपि व्युत्पत्यभ्यासाभ्यामुत्तरं प्रतिभायाः प्रादुर्भावदर्शनस्थलेऽपि । ताभ्यां

व्युत्पत्यभ्यासाभ्यां प्रागपि पूर्वमपि तस्याः प्रतिभायाः प्रसक्तेः ।

अयं भावः । भोगायतनं शरीरं तत्र भोगो हि अदृष्टाधीनः । एवञ्च शरीर सद्भावाद् हेतोः तच्छरीरावच्छेदेन भोग–साधकानि सर्वाण्यपि अदृष्टानि यदा लब्धानि, तदा प्रतिभाजनकमदृष्टं लब्ध्वैव तेन तत्राजनि । फलोपधायककारणसद्भावे कार्येणावश्यं स्थेयमिति कृत्वा ताभ्यां प्रागपि तस्याः सत्ता मान्या, सुतरां तेन काव्यं निर्माणीयं किन्तु न निर्माति । सिद्धमतो यत् व्युत्पत्यभ्यासाभ्यां सा जनिता न तु अदृष्टेन । इति ।

पुनः शङ्कते–न चेति । तत्र व्युत्पत्त्यभ्यासप्राक्कालिकादृष्टस्थितिस्वीकारस्थले प्रतिबन्धकमवरोधकम् अदृष्टान्तरं द्वितीयमदृष्टं; काव्यं न निर्मिमीते इति निर्माणाभावरूपफलानुरोधेन कल्प्यमनुमानीयम् । अर्थात् प्रतिभोत्पादकमदृष्टं वर्त्तते परं तत्रैव तद्विरोधि प्रतिबन्धकमपि अदृष्टान्तरं वर्तते ततो प्रतिभा नोदिता कारणाभावाच्च कार्यं न जातम् इति वाच्यम् । तादृशेति । तादृशमुत्पादकं प्रतिबन्धकं च । अनेकस्थलगतम् अनेकव्यक्तिनिष्ठम् । इदं हृदयम् । "केवलमदृष्टमेव कवितायाः" कारणमस्तु इति स्वीकारे महद्गौरवं स्यात् । यतो हि केनचिद्बालेन पञ्चमे, केनचिद्दशमे, केनचित्पञ्चदशे हायने प्रतिभोदयहेतुः देवतायाः महापुरुषादेर्वा प्रसादोऽलम्भि । तत्कस्य हेतोः? वक्तव्यं स्यात् एतावत्कालं प्रतिबन्धकमासीत् । प्रतिबन्धकाभावश्च कार्यमात्रं प्रति कारणम्, कार्यसमानाधिकरणाभावाप्रतियोगित्वे सति कार्यव्यापकत्वस्य कारणत्वात् । यदा तेन मन्त्रानुष्ठानं, महापुरुषादेश्च सेवा वा कृता तेन च तच्छ्रमजन्यदुःखानां भोगात् पापरूपस्य प्रतिबन्धकादृष्टस्य नाशो जातः तदा प्रसादो मिलितः प्रतिभोदिता । एवञ्च लब्धदेवताप्रसादकव्यक्तौ, तद्भिन्नव्यक्तौ च अनेकेषु स्थलेषु पुण्यपापरूपयोः जनकप्रतिबन्धकयोरदृष्टयोः कल्पना गले पतिता स्यात्, तदपेक्षया सर्वैः क्लृप्ताभ्यां प्रतिबन्धकादृष्टनाशकतया निपुणताभ्यासाहितश्रमजन्यदुःखं पापध्वंसे कारणमित्येवंरूपतयाऽऽचार्यैः स्वीकृताभ्यां व्युत्पत्यभ्यासाभ्यामेव प्रतिभोदेतु; लाघवं स्यात्। तद्भिन्नव्यक्तिश्च कियन्तं कालं काव्यं कर्त्तुमशक्नुवन् निरन्तरमुद्योगवर्जितव्युत्पत्यभ्यासाभ्यां लब्धप्रतिभः। इति ।

देवतादिप्रसादजन्यमदृष्टमिति, केवलान्महापुरुषप्रसादादपि प्रतिभोत्पत्तेरिति द्विधोल्लेखात् द्विविधो व्यवहारः प्रसादजन्यमदृष्टमिति प्रसाद एव अदृष्टमिति च ।

तादृशादृष्टस्येत्यत्र तादृशत्वं केवलत्वम् । तादृशव्युत्पत्यभ्यासयोरित्यत्र तादृशत्वं विलक्षणत्वम् । वैलक्षण्यं जातिरूपम्, अखण्डोपाधिरूपम्, अदृष्टासहकृतत्वरूपं वा । एष निर्यासः । अदृष्टात् प्रतिभोदेति । व्युत्त्पत्यभ्यासाभ्यां च सोदेति । अतः यत्र प्रतिभा तत्र अदृष्टमिति । अथवा यत्र प्रतिभा तत्र व्युत्पत्यभ्यासौ इति वक्तुं न शक्यते । तदतिरिक्तकारणात्तदुत्पत्तेः । फलतः प्रतिभाकार्यमाश्रित्य अदृष्टादौ यः कार्यकारणभावस्तत्र अदृष्टाभावे प्रतिभाभावः, अथ च व्युत्त्पत्यभ्यासाभावे प्रतिभाभावः इति वक्तुमशक्यतया व्यतिरेकव्यभिचार आपतति । तन्निवारणोपायस्यावश्यकर्त्तव्यतया सामान्यरूपं प्रतिभात्वं कार्यतावच्छेदकं विहाय प्रतिभागतं वैलक्षण्यं कार्यतावच्छेदकम् । अर्थात् अदृष्टादिनिष्ठकारणतानिरूपिता या प्रतिभानिष्ठा कार्यता तादृशकार्यताया अवच्छेदकं विलक्षणत्वम् । एवञ्च विलक्षणां प्रतिभां प्रति तत्, विलक्षणां तां प्रति तौ कारणमिति निष्कर्षः । व्यतिरेकव्यभिचारो निरस्तः ।

कविताया इति कवितां काव्यं प्रति अदृष्टजन्यप्रतिभात्वेन, व्युत्पत्त्यभ्यासजन्यप्रतिभात्वेन वा कार्यकारणभाव इति । नन्वेवमपि प्रतिभातः काव्योत्पत्तौ तयोः कार्यकारणभावे व्यतिरेकव्यभिचारः स्यादेव, यतो हि इतरप्रतिभाभावेऽपि तदितरप्रतिभातः काव्योत्पत्तेः सद्भावात्, प्रतिभाभावे काव्याभाव इत्येवं वक्तुमशक्यम् ततश्च कवितायाः कारणतावच्छेकं प्रतिभात्वं मनुताम् ।

ननु अदृष्टोत्पन्ना प्रतिभा भिन्ना, व्युत्पत्यभ्यासोत्पन्ना सा भिन्ना अतः प्रतिभाविशेषरूपः पदार्थः किन्तु तयोर्गतं प्रतिभात्वं सामान्यरूपम् । ततश्च कारणतावच्छेदकप्रतिभात्वस्योभयत्र सद्भावात् । ताभ्यामुत्पन्नप्रतिभाऽपि अदृष्टोत्पन्नप्रतिभाजननयोग्यं काव्यं समुत्पादयतु किं निवारकमत आह – प्रतिभागतवैलक्षण्यमेवेति । अत्रापीति । पूर्वं यथा प्रतिभा कार्यककार्यकारणभावे वैलक्षण्यं कार्यतावच्छेदकं स्वीकृतं व्यभिचारो निरस्तः तथा अत्रापि प्रतिभाकारणककार्यकारणभावेऽपि तदेव कारणतावच्छेदकं स्वीक्रियतामिति हेतोः स व्यभिचारो न भविष्यति । फलतः विलक्षणकार्यं विलक्षणकारणाद् भवत्येव ।

ननु निरस्यतां व्यतिरेकव्यभिचारः । परं तत्सत्वे तत्सत्त्वमित्येवंरूपस्य अन्वयस्य व्यभिचारः तत्सत्वेऽपि तदभावरूपोऽस्त्येव । यतो दृश्यते लोके व्युत्पत्तिरपि श्रमेण अर्जिता

अभ्यासोऽपि निरन्तरं कलितः तथापि प्रतिभा नोदेति इत्यतः शङ्कासमाहिती आह–न चेति। तत्रेति । तत्र व्यक्तिविशेषे । तौ व्युत्पत्तिः अभ्यासश्च तादृशविलक्षणौ प्रमाणसिद्धौ न स्तः यादृशौ प्रतिभाकारणतया अपेक्षितौ ततः व्युत्पत्यभ्यासनिष्ठकारणताया अवच्छेदकेन विलक्षणत्वेन अवच्छिन्नत्वं विशिष्टत्वं व्युत्पत्यभ्यासयोर्नास्ति । अतो न व्यभिचारः ।

ननु पूर्व "तस्याश्च हेतुः क्वचिद् विलक्षणौ तौ" इत्यत्र विलक्षणत्वं नाम अदृष्टासहकृतत्वमुक्तं; तच्च तत्र स्थलेऽस्त्येवातः तयोः कारणतावच्छेदकेन विलक्षणत्वेन अवच्छिन्नत्वमेव न तु तेनानवच्छिन्नत्वमित्यत आह –पापेति । तत्र प्रतिभोत्पत्तौ पापविशेषः इह जन्मार्जितः पूर्वजन्मार्जितो वा अदृष्टविशेषः प्रतिबन्धकः कल्पनीयः अनुमातव्यः, तस्मान्न दोषः।

नन्वहमदृष्टं केवलं प्रतिभायाः कारणं मन्वे, भवानदृष्टमेकं कारणम्, व्युत्पत्यभ्यासौ पापविशेषाभावश्च कारणं मनुतेऽतः गौरवं स्यादत आह –प्रतीति । न हि प्रतिबन्धकाभावस्य कारणता काल्पनिकी एव, प्रत्यक्षसिद्धा अपि, इति साधयितुमाह – प्रतिवादीति । बहुशोऽनुभूतं यस्य कवितानिर्माणं बहुभिः बहुत्र स्थलेषु परं तस्यैव यदि कदाचिद् शास्त्रार्थसमये सभायां प्रतिवादिना मन्त्रादिभिः वाक्स्तम्भे विहिते सति यदा काव्यं नोदेति तत्र किं कारणं; ननु वक्तव्यं तत्र कश्चित्प्रतिबन्धकोऽस्ति । तदभावे हि काव्यमुदियादेवेति भावः।

तच्च काव्यं च । काव्यप्रकाशोक्तस्य अवरकाव्यस्यैव अर्थालङ्कारघटितस्य मध्यमकाव्यत्वम्, शब्दालङ्कारघटितस्य अधमकाव्यत्वमाश्रित्य भेदद्वयेन चतुर्धा विभक्तम्।

गुणीभावितः उपसर्जनीकृतः न तु गुणीभूतः अर्थात् तत्र व्यङ्ग्ये एतादृशः चमत्कारः उदेति, यस्य प्रभावत उपायभूतौ स्वजनकावपि शब्दार्थो व्यङ्ग्यापेक्षया स्वतः गुणीभूतौ। अत एव उक्तं गुणीभावितात्मानाविति विशेषणं, स्वापेक्षया शब्दार्थापेक्षया व्यङ्ग्यप्राधान्याभिप्रायकमिति । अयं भावः । गुणीभूतव्यङ्ग्येषु काव्येषु व्यङ्ग्ये चमत्कारः; परं प्राधान्यं नास्ति व्यङ्ग्योपस्कृतवाच्यार्थस्यैव प्राधान्यम्, यथा "अयं स रसनोत्कर्षी" इत्यत्र अपराङ्गोदाहरणे शृङ्गारोपस्कृतः वाच्यार्थ एव प्रधानं न तु व्यङ्ग्यम् प्रधानम् । अतोऽस्य नोत्तमोत्तमकाव्यत्वं शब्दार्थापेक्षया व्यङ्ग्यस्य प्राधान्याभावात् । व्यङ्ग्यस्य प्राधान्ये अभिप्रायो यस्येति व्यधिकरणबहुव्रीहिः । उत्तमोत्तमकाव्यत्वसिद्धये शब्दार्था–

पेक्षया व्यङ्ग्यस्य प्राधान्यमपेक्षितमिति ।

यस्य काव्यस्य लक्षणं पूर्वं शब्दः काव्यमित्युक्तं तस्यैव प्रभेददर्शनावसरे शब्दार्थौ तदाद्यमिति कथयति ततो ज्ञायते वस्तुस्तितिः तौ काव्यमित्येव । शब्दार्थौ काव्यमित्यत्र लक्षणस्वरूपे चमत्कारजनकज्ञानविषयीभूतार्थव्यञ्जकं गूणीभावितं यत्र शब्दार्थोभयं तदुत्तमोत्तममिति । शब्दः काव्यमित्यत्र चमत्कारजनकज्ञानविषयीभूतार्थव्यञ्जक–गुणीभावितार्थ–प्रतिपादक–गुणीभावितशब्दत्वं काव्यत्वमिति । चमत्कृतिभूमिमिति । चमत्कृतिभूमित्वं चमत्कारजनकज्ञानविषयत्वम् । व्यङ्ग्येऽतिगूढत्वं च क्लेशातिशयसाध्यसहृदयसमवेतज्ञानविषयत्वम् । व्यङ्ग्ये स्फुटत्वं च वाच्यकल्पत्वेन सहृदयेतरसमवेतज्ञानविषयत्वमपि । अपराङ्गत्वं नाम अपरार्थविषयकबोधेऽतिशयाधाय–कत्वम् । वाच्यसिद्ध्यङ्गत्वं नाम वाक्यार्थविषयक शाब्दबोधानुपपत्तिनिरासकत्वे सति तद्बोधजनकज्ञानविषयकत्वम् । वाच्यविषयकशाब्दबोधधर्मिक प्रामाण्यग्राहकत्वमिति यावत्।

ध्वनिकारैः ''यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ इति वदद्भिः पुनरुक्तिर्न दृक्पथे समाकलिता । सा चेयम् । शब्दार्थद्वयरूपे काव्ये अर्थेन यदा स्वात्मा गुणीकृतः तदा कोऽन्योर्थोऽवशिष्टः यं शब्दः गुणीकुर्यात् तस्मात् अर्थः स्वात्मानं गुणीकरोति शब्दोऽपि स्वीयमर्थं गुणीकरोति इत्युक्तिः पुनरुक्तिदोषग्रस्ता । तमेव दोषं परिहरता गुणमाददता पण्डितराजेन ''गुणीभावितात्मानौ'' इत्येवमुक्तम् । किं गुणादानम् । शृणु । शब्दसहकृत एव न तु स्वतन्त्रः अर्थः व्यनक्ति, इति हेतोः अर्थशक्तिमूलध्वनौ शब्दोऽपि व्यञ्जकः परं स सहकारित्वादेव गुणीभूतः अर्थस्तत्र स्वं गुणीकरोति । तथैव अर्थसहकृत एव न तु स्वतन्त्रः शब्दः व्यनक्ति, इति शब्दशक्तिमूलध्वनौ अर्थोऽपि व्यञ्जकः परं स सहकारित्वादेव गुणीभूतः शब्दास्तत्र स्वं गुणीकरोति इति द्वयोः संग्रह एव गुणादानम् ।

अथवा उपेयप्रतिपत्यर्थमुपाया इति न्यायात् उदकार्थं गृहीतघटस्येव अर्थबोधार्थं गृहीतशब्दस्याप्राधान्यमेव तथापि परिवृत्यसहत्वप्रयुक्तं प्राधान्यमनुरुध्य तथाभिधानमुचितम्। अन्यथा ध्वनेः शब्दशक्तिमूलत्वं गतं स्यात् । यतः शब्दस्तु सदा गुण एव न प्रधानः। एवञ्च प्रधानभूतः शब्दः स्वमात्मानं गुणीकुर्यादेवेति सम्यगेवोक्तिः पण्डितराजस्य ।

यदि एकं वस्तु । तस्य द्वौ अधिकारिणौ । यावत्ताभ्यां स्वस्वाधिकारो न त्यज्येत

तावत्तस्य विक्रयो न्याय्यो न हि भवति । तद्वदेव शब्दार्थाभ्यां पृथग् २ यावत् अर्थस्वौ न गुणौक्रियेते तावदर्थस्य गुणत्वं नायाति । अत उक्तं ध्वनिकारेण उपसर्जनीकृतस्वार्थौ इति ।

शयितेति । अत्र शयितेति पाठः कवेः रसिकत्वदारिद्र्यमदूरीकरोति । यतः सविधे शयिता शयनं गता न तु अनिच्छन्ती बलात् शायिता शयनं गमिता, रागात्स्वयं पत्युः सविधे पर्यङ्के प्राप्ता इति ध्वन्यते । ततः कुतो न सा मनोरथान् सफलीकरोतु ये पूर्वं असफलाः मिलिते तस्मिन्नेवं करिष्ये, कथयिष्यामि, आलिङ्गिष्यामि, चुम्बिष्यामि इत्येवं रूपेण मनोरथाः हृदि एव आसन् तान् पूरयितुमवसरोऽयम्, अतः शायितेति पाठः समीचीनः। पद्योक्तविशेषणानां सार्थकता, अपुष्टार्थत्वनिरासश्च । अन्तर्भावितण्यर्थतायां तु स्यात्परं सैव प्रतीयात्कथम् ।

अनीश्वरेत्यत्र असमर्थेति पाठः साधीयान् । अन्यथा विरुद्धमतिकृत्वमुद्भावयेत् । च्विप्रत्ययस्वारस्यात् असफलानपि सफलान् कर्तुमसमर्थेति हृदि एव ते तिष्ठन्ति । सामान्याकारेण मनोरथत्वेन रूपेण । तादृशेच्छाया यद्ययं शयितः स्यात्तदास्य पत्युः मुखकमलं चुम्बेयमितीच्छायाः । सामान्येच्छायाः अविशेषेच्छायाः । निवेदनात् अभिधानात् । अभिधानेऽपि निवेदनेऽपि । विषयविशेषः चुम्बनम् । तद्विशिष्टा तद्विषयिणी इच्छा, तत्वेन ।

अदो हृदयम् । अत्र पद्ये सम्भोगशृङ्गारः सिद्धान्तः । आदौ वाच्यः स्त्रिया राग इति नयात् पूर्व स एव निरूपितः । सविधे शयितापि मनोरथान् पूरयितुमुत्सुकाऽपि मुग्धात्वा न्निर्लज्जं प्रवृत्तिं कर्त्तुमप्रभुत्वान्नयने दरं निमीलन्ती शयनव्याजं कुर्वती नायकमुखं निरीक्षते अवसरं प्रतीक्षते यद्ययं सुप्तः स्यात्तदास्य मुखं चुम्बेयं ततश्च नायिकायाः तादृशेच्छायाः व्यञ्जनात् वस्तुध्वनिः कुतो नेति न चेत्यादिनाशङ्क्य निवेदनादित्यन्तेन समाहितम् ।

अर्थात् निर्विशेषन्न सामान्यमिति सिद्धान्तात् विशेषेच्छाविनिर्मुक्तायाः सामान्येच्छाया अनवस्थानम् । सा च मनोरथपदेन अभिहिता । ततः कुतो ध्वनित्वं, तदुपर्यपि चेदाग्रहस्तर्हि चमत्कारो न स्यादित्युत्तरति । यतः अभिधया अस्पृष्टस्यैव व्यङ्ग्यत्वे चमत्कारः। अथोच्येत यद्यपि इच्छैव वाच्या, व्यङ्ग्यापि इच्छैव, तथापि मनोरथान् इति सामान्याकारेण वाच्या, यद्ययं सुप्तः स्यात्तदास्य मुखं चुन्बेयमित्येवंरूपा तु विशेषाकारा व्यङ्ग्या । एवं च

वस्तुभेदो नास्ति परं शैलीभेदेऽस्या ध्वनित्वे चमत्कारोऽस्त्येव । तत्रोत्तरम् ।

तथा चुम्बनेच्छा हि रतेः कार्यम् अनुभावः । तत्र यदि रतेरनुभावतया चुम्बनेच्छा ज्ञाता भवेत्तदा तस्यां सौन्दर्यं चमत्कारः । तच्च सौन्दर्यं तस्या इच्छायाः तदैव सुरक्षितं, स्यात्, यदि तया रतिरभिव्यञ्जिता भवेत् । तया रतेरनभिव्यञ्जने तु यथा चुम्बामि इति शब्दप्रतिपादिता चुन्बनेच्छा अचमत्कारिणी तथा सापि भविष्यतीति ।

ननु मास्तु वस्तुध्वनिः त्रपा भावध्वनिरस्तु यतः नयनयोः दरमीषत् मीलनेन त्रपाया व्यञ्जनम् । इत्याशङ्कायामाह – एवमिति । एवं चुम्बनेच्छावत् त्रपाया अपि ध्वनित्वं नेति शेषः, कुत एतत्, त्रपायाः प्राधान्येन न व्यञ्जने प्राधान्येन व्यञ्जने हि ध्वनिरित्यभिमानः।

कुतो न प्राधान्यमित्यत आह–अन्विति । नायिका निरीक्षते इत्यत्र अनुवाद्या नायिका निरीक्षणं विधेयम् । दरमीलन्नयनात्वञ्च नायिकायाः विशेषणमिति अनुवाद्यतावच्छेदकम्। तया उद्देश्यतावच्छेदकतया प्रतीतायां व्यक्तायां तस्यां त्रपायां मुख्यस्य वाक्यार्थत्वस्य अयोगात् असम्बन्धात् । दरमीलन्नयना नायिका उद्देश्या तद्गतं तादृशनयनात्वं उद्देश्यतावच्छेदकम्, तद्व्यङ्ग्या त्रपापि उद्देश्यतावच्छेदिका । विधेयभूतांशे एव न त्वनुवाद्यांशे मुख्यं वाक्यतात्पर्यमित्यभिमानः ।

ननु दरमीलन्नयना सती निरीक्षते इत्येवंरूपं विशिष्टं विधेयं ततश्च तस्याः त्रपाया अनुवाद्यतावच्छेदकत्वं नास्तीति निराकर्त्तुमाह–न चेति । अभ्युपगम्य ब्रूते – एवमपीति । त्रपाया अनुवाद्यतावच्छेदकत्वनिरासेऽपि विशिष्टं निरीक्षणं तु रतिमात्रस्य केवलायाः रतेः न तु त्रपाविशिष्टाया रतेः कार्यं, सत्यपि दरमीलनस्य त्रपाकार्यत्वे ।

ननु मनोरथान् सफलीकर्त्तुमनीश्वरेत्युक्तेः त्रपैव विधेया, यदंशे विधेयत्वं तत्रैव वाक्यस्य मुख्यं तात्पर्यमित्याह – त्रपाया इति ।

निरीक्षते इति क्रियया वाक्यपूरणात् । एकतिङ वाक्यमिति सिद्धान्तात् । सामान्यप्रयोजन–सद्भावेऽपि नास्ति अतिप्रयोजनं मुख्यं फलं यस्य तत्त्वमनतिप्रयोजनकत्वं तस्यापत्तेः।

ननु मुग्धात्र नायिका । तस्याः सर्वमपि कार्यजातं लज्जासंवलितमतो निरीक्षणस्याऽपि लज्जायामेव पर्यवसानमिति निराकर्तुमाह – वाच्यवृत्येति । अयमाशयः यद्व्यञ्जकापेक्षया

यद्व्यञ्जकस्य प्राधान्यं तद्व्यङ्ग्यापेक्षया तद्व्यङ्ग्यस्यापि प्राधान्यमिति । वाच्यवृत्येति। अयमाशयः यद्व्यञ्जकापेक्षया यद्व्यञ्जकस्य प्राधान्यं तद्व्यङ्ग्यापेक्षया तद्व्यङ्ग्यस्यापि प्राधान्यमिति । वाच्यवस्थायां निरीक्षणे दरमीलनं गुणीभूतं चेत्तर्हि निरीक्षणव्यङ्ग्यायां रतौ दरमीलनव्यङ्ग्यायाः त्रपाया गुणीभावेन प्रत्ययस्य ज्ञानस्य औचित्यम् ।

ननु शयितेति पद्यं यदि इच्छात्रपारूपभावध्वन्योः सद्भावेऽपि रसध्वनेरेवोदाहरणं मनुषे तर्हि भावध्वनिर्निरवकाशः स्यात्, यतो हि सर्वत्रैवंविधस्थितिसम्भवादित्याशङ्का–मपसारयितुमाह – यथा वेति । गुरुमध्येति । मित्रं मित्रं संमन्त्रयति । गुरवः कुटुम्बवृद्धाः श्वश्रूननान्दृज्येष्ठानीप्रभृतयः । नताङ्गी यौवनप्रभावविकसितावयवैः प्रह्वा । एतेन आकर्षकत्वं तस्याः व्यजते । गुरुमध्यगतत्वान्नताङ्गीति न । गुरुणां मध्यगा अतः सलज्जा सा मुखमेव नमेत् न तु अङ्गानि । "लज्जानम्रमुखी" इत्येव कविसम्प्रदायः लोकव्यवहारश्च । किन्तु नायिकाया अवस्थितिबोधनार्थं तत् । न च सामान्यवाचकं पदम् विशेषपरमिति वाच्यं, तादृशविशेषपरिस्थितेः द्योतकाभावात् । जलजकलिकया निहता न तु स्पर्शिता नितराम् हता येन ताडनस्यावश्यकतामनुभवेदवलोकयेच्च । मन्दं, प्रबलताड़नात् कदाचिदाक्रोशेत् रसभङ्गो भवेत् ।

अवलोकने कुण्डलयोर्दरमीषत् ताण्डवस्य, भ्रूलतिकयोः नतत्वस्य कुटिलत्वस्य च कथनेन तस्या आवेगविक्षोभौ व्यज्येते । ताभ्यामाविष्टा घूर्णिता विचलिता आसीत् । एतेनामर्षः प्रकाश्यते । अर्थेन संवलितः विशिष्टः । संवलनं विशेषणम् । चर्वणात्र आस्वादः। चर्वणायाः विश्रान्तिः । कृदभिहितो भावो द्रव्यवत्प्रकाशते इति नयात् अमर्षे विश्रान्ता चर्वणा पार्यन्तिकः आस्वादः । तस्या धाम आश्रयः– तत्रामर्षे ।

एकस्मिन् श्लोकवाक्ये एकस्य नतपदस्य नताङ्गीति नतभ्रिति च वारद्वयोपादानेन कवेः शब्ददारिद्र्यं न शङ्कनीयं यतो हि "नतं तगरपाद्यां स्यात्, क्लीवं कुटिलनम्रयोरिति मेदिनीकोषात् पूर्वत्र नम्रत्वार्थकः, उत्तरत्र कुटिलत्वार्थकः इत्यर्थभेदः । गता, नता, निहता इति त्रिषु तापदस्य विन्यासात् सानुप्रासं वचः। एकस्याप्यसकृत्पर इत्युक्तेः।

रसभावध्वनिः संलक्ष्यक्रमोऽपि भवतीति द्योतयितुमुदाहरणान्तरमाह – यथा वेति । तल्पेति । उत्तरार्द्धे तल्पं गमिता । अन्तर्भावितण्यर्थः । अपिर्भिन्नक्रमः श्वासासङ्गमपि

इत्यन्वयः। सम्प्रति पदेन कालेनावरणात्ययरूपं लज्जामान्थर्यं द्योत्यते इति भावाविष्करणनिरोधार्थं तस्यार्थान्तरं कथयति – इदं च पद्यमित्यादिना ग्रन्थेन ।

सहनाऽभावे हेतुः सुतनुत्वम् । तनौ सुपदस्यार्थः सुन्दरत्वं कोमलत्वरूपम्, ततश्च पदार्थहेतुकः काव्यलिङ्गालङ्कारः । हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतमित्युक्तेः। साभिप्रायविशेषणस्वीकारे परिकरालङ्कारः ।

इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्वुधैः कथित इति प्राग्भिर्ध्वनिकाव्य मपि निर्दिष्टं भवता तु नेति न्यूनतां परिहरति –ध्वनिमामनन्ति इति ।

चन्दनेति । कुचाभ्यां चन्दनस्य च्युतिः सम्भोगाङ्गालिङ्गनद्वारा, अन्यथा उत्तरीया कर्षणरूपप्रकारान्तरेण च भवति । विना विलम्बं ताम्बूलचर्वणेन पूर्वस्थितरागस्य तदवस्थता। विलम्बेन तथाकरणात्तु अधरोष्ठे तादृशरागस्य किञ्चिद् ह्रासो न त्वभावः, विवक्षितस्तु तत्र रागस्य अभावः। तथापि ह्रासोऽपि अभावरूप एवेति कृत्वा अन्यथासिद्धिपरिहारायेत्युक्तम्।

तथाहीति प्राचीनकाव्यप्रकाशध्वन्यालोकग्रन्थविरुद्धत्वंप्रदर्शयति । गमकतया उपभोगव्यञ्जकतयेत्यर्थः । कारणान्तरतोऽपि स्नानादपीति भावः । अत्रैव श्लोके । उपभोगेति उपभोगकार्यत्वेनेति भावः । न प्रतिबद्धानि न नियतसम्बद्धानि । एकान्तं निश्चयः । अनैकान्तिकं व्यभिचारि । तथा अन्यच्च तत्रैव काव्यप्रकाशे पञ्चमोल्लासे एव । तेन प्रकाशकृता अभ्युपगतं स्वीकृतम् ।

''वाच्यार्थे वापीस्नाने बाधितत्वादिति'' । अत्र यदा वापीस्नानरूपे वाच्यार्थे विशेषणार्था बाधितास्तदा लक्षणया वापीस्नानाभावो विज्ञेयः अतो विधिनिषेधप्रतिपादकाभ्यां 'गता न गतेति'' शब्दाभ्यां, विरोधिलक्षणया निषेधस्य विधेश्चेति प्रतीतिरिति किम् । यथा सरसः पूर्णतायां लोठनरूपार्थो बाधितस्तत्रैव लक्षणापि पूर्णत्वभावस्य बोधिका, तस्मात् वापीं स्नातुं गतासीत्येवं रूपे ''वापीस्नानार्थगमने वाच्यार्थे बाधितत्वा'' दिति बोधनीयम् ।

''नदी–मदीयप्रिययोरिति'' , ''अधमस्येति'' च । अत्र प्रियं प्रति प्रेषिता दूती दिव्यक्रियां संपाद्य, आगत्य कथयति स्म । यदहं तव प्रियान्तिकं नागमम्, किन्तु अतिक्रमन्तीं स्नानवेलामनुभूय वापीमगमम्, तत एव परावर्ते च ।

विदग्धा च नायिका सर्वं ज्ञात्वोत्तरति –आं ज्ञातम् । प्रियं प्रति प्रेषिता त्वं

स्नानवेलातिक्रान्तिभिया दूरत्वान्नदीमगत्वा समीपस्थां वापीमितो गतासि न पुनस्तस्याऽधमस्याऽन्तिकमिति पद्यार्थः। तत्र पण्डितराजेनोदलेखि मदीयप्रियस्याऽन्तिकमगत्वा – अर्थात् मत्प्रियपार्श्वे गमनं न कृत्वा तस्याधमस्यान्तिकं न गतासि। अत्र का सङ्गतिः। एकस्यैव प्रियस्य पार्श्वे गमनाभावस्योभाभ्यां वाक्याभ्यां प्रतिपादनेन कोऽभिप्रायविशेषो लभ्यते। यः प्रियः स एव दुराचरणादधमः संवृत्तश्चातो यः प्रियः स एवाधमो नान्यः। इति। ततश्च लेखोऽयं पण्डितराजस्य चिन्त्य एव।

मुख्यार्थे बाधाभावात् तात्पर्यार्थस्य झटित्यनाकलनात्कुतोऽत्र लक्षणावकाशः इति। एषु निश्शेषेत्यादिविशेषणवाक्यार्थेषु स्नानसम्भोगोभयार्थकतया साधारणेषु सत्सु मुख्यार्थे वापीस्नानार्थगमनरूपार्थे बाधस्य अभावः तस्मात् तात्पर्यार्थस्य झटिति आकलनं ज्ञानं भवति। ततश्च कुतोऽत्र वापीं स्नातुं गतासीत्यत्र लक्षणाया अवकाशः, अर्थात् लक्षणा नास्ति। इति व्याख्यायां तु सङ्गतिः स्पष्टा। परन्तु मूलपाठस्य मुख्यार्थबाधाभावात् तात्पर्यार्थस्य झटिति अनाकलनादित्यस्याऽसंगतिरेव। यदा मुख्यार्थस्य बाधो नास्ति तदा तात्पर्यस्य झटिति आकलनमेव, अनाकलनं कुतः। झटिति पदस्यापि किं स्वारस्यम्! यदा अर्थस्य अनाकलनमेव वर्तते। अथ च तात्पर्यस्य अनाकलने मुख्यार्थबाधे अथवा तात्पर्यानुपपत्तौ एव लक्षणाया अवसर आगच्छति। एवञ्च अनाकलनात् कुतोत्र लक्षणावसरः। इत्युक्तिरसमञ्जसैव प्रतिभाति। वस्तुतस्तु अधमपदप्राधान्येन झटिति इतरानपेक्षतया तात्पर्यार्थस्य व्यङ्ग्यार्थस्य आकलनमेवात्रास्ति। तस्मादनाकलनादिति ग्रन्थान्तरलिपिकर्त्तृणां, पूर्वरूपपाठकानां वा प्रमादादागतो लेखो भ्रामकः।

यत्र स्थले व्यङ्ग्यमप्रधानमेव भवति न तु कदाचिदपि प्रधानम्। अयं भावः ''अति–शयिनि व्यङ्ग्ये वाच्यात्'' इति, ''अतादृशि गुणीभूतव्यङ्ग्यमि''ति चोक्त्या वाच्यादतिशयिनि व्यङ्ग्ये ध्वनिः, अतादृशि वाच्यादनतिशयिनि व्यङ्ग्ये गुणीभूतव्यङ्ग्यमिति स्थितौ वाच्यमनुरुध्यैव व्यङ्ग्यस्य आन्तरालिकस्य प्रधानत्वाप्रधानत्वाभ्यां तथा व्यवस्था। पार्यन्तिकव्यङ्ग्यापेक्षया तु उभयत्रापि व्यङ्ग्यस्याप्रधानत्वमेव। अतो व्यङ्ग्यमप्रधान–मेवेत्यवधारणं कृतं गुणीभूतव्यङ्ग्य काव्ये सर्वत्रेयं स्थितिः। इति। तथा चोक्तं महता नागेशेनापराङ्गोदाहरण इत्यादि।

अवधारणस्य फलमाह – तेन अवधारणकरणेन हेतुना वाच्यापेक्षया प्रधानीभूतस्य व्यङ्ग्यान्तरमादाय गुणीभूतस्य व्यङ्ग्यस्य ध्वनित्वमेव । चमत्कारेति पदस्य कृत्यमाह – लीनं व्यङ्ग्यं यत्र एवम्भूतं यद् वाच्यचित्रं, तेन मध्यमे तृतीयकाव्ये व्यङ्ग्यस्य लीनतया चमत्कारकारणाभावान्न अतिव्याप्तिरुत्तमकाव्यलक्षणस्य ।

राघवेति । राघवस्य विरहाग्निज्वालया सन्तापितः सन्तप्तः (स्वार्थे णिच्) यः सह्यशैलः तस्य शिखरेषु शिशिरकाले सुखं यथा स्यात्तथा शयनाः शयनसुखमनुभूतवन्तः शयनोत्तरं जागरिता इत्यर्थः । अन्यथा सुप्ताः कथं कुप्येयुः, विरोधात् । कपयः पवनतनयाय मारुतये कुप्यन्ति ।

अत्र सुखशयनं कृतवतां कपीनामकस्मात् कोपः असङ्गतः इति कोपस्य वाच्यस्योपपत्त्यर्थं व्यङ्ग्यो ''लङ्कायाः प्रतिनिवृत्तेन हनुमता जानकीकुशलावेदनेन राघवः शिशिरीकृतः अतः शैलोऽपि शिशिरः सञ्जातः तेन अत्यन्तशिशिरतया च तापाभावेन शिशिरे सुखशयनं दुःशकमित्येवं रूपः कोपोपपादकत्वाद् गुणीभूतः।

नन्विति शङ्कते=एवमुपरिनिर्दिष्टप्रकारस्वीकारे प्राग् ''तल्पगतापि चेत्यत्र पद्ये मन्दमाक्षितीति उक्तम् । नववध्वा झटिति आक्षेपः करणीयः न तु मन्दम् । इति स्वभावविरोधः। अतो वाच्यस्य मान्द्यस्य व्यङ्ग्येनैव विप्रलम्भरत्यैव । अपिर्भिन्नक्रमः । उपपद्यमानमपि, स्वातन्त्र्येण विप्रलम्भरतिप्रकाशमन्तरा । परा उत्कृष्टा या निर्वृतिः सुखं तच्चर्वणास्वादः तद्विषयता ।

अनयोरिति । प्रथमद्वितीयभेदयोः यत्र चमत्कारः अपह्नुतो न अर्थात् स्पष्टं प्रकाशते। व्यङ्ग्यस्य वाच्यापेक्षया प्राधान्याप्राधान्याभ्यां कृतः । विशेषः वैलक्षण्यम् ।

प्रहरविरताविति । दिनोदयादुत्तरं प्रथमप्रहरावसाने । दिनानां शतैः प्राप्यं गम्यम् । येषु आलापेषु बाष्पो गलन्नेव वर्त्तते ।

प्रियस्य गमननिवारणरूपं यद्वाच्यं तस्य सिद्धेरङ्गं जनकम् । ''गमनं हरति'' इति हरणरूप क्रियायां करणता । नायकेन दूत्याः सम्भोगः कृतः अत एव सः अधम इत्यपि सम्भवेन गुणीभाव इति भावः ।

व्यङ्ग्यचमत्कारस्यासमानाधिकरणः विभिन्नाधारः वाच्यस्य चमत्कारो यत्र भवेत्

तन्मध्यमं तृतीयं काव्यम् ।

ननु अधिकरणमाधारः । तच्च देशरूपं कालरूपमिति द्विधा । तत्र देशरूपं तत् प्रतिपादकतया श्लोकवाक्यात्मकमेकमेव चमत्कारयोः । कालरूपं च तत् उभयस्थलेऽपि चमत्कारे भिन्नमऽस्त्यतोऽतिव्याप्तिर्लक्षणस्य, ततः इत्थं निर्दुष्टं लक्षणं करणीयम् ।

अत्र व्यञ्जकशब्दविशिष्टो वाचकशब्दस्तत्तृतीयं मध्यमम् । वैशिष्ट्यञ्च स्वतादात्म्य – स्वव्यङ्ग्यार्थविषयकशाब्दबोधजन्यचमत्कारविशिष्टाऽन्यचमत्कारजनकज्ञानविषयीभूता– र्थाभिधायकत्वोभयसम्बन्धेन । संसर्गघटकवैशिष्ट्यञ्च–स्वसमवायिसमवेतत्व–स्वाव्यवहित– पूर्ववर्त्तित्वोभयसम्बन्धेन । पूर्वत्र वैशिष्ट्ये स्वं व्यञ्जकः तस्य तादात्म्यं वाचके । यो वाचकः स व्यञ्जकोऽपि तस्मात् वाचकव्यञ्जकयोस्तादात्म्यमभेदः । एवं शब्दः प्रथमार्थप्रतिपादनावस्थायां वाचकः, द्वितीयार्थप्रतिपादनावस्थायां व्यञ्जक इति वाचकत्वस्य कालिकाव्याप्यवृत्तित्वं ध्वन्यते । संयोगस्थले दैशिकाव्याप्यवृत्तिर्भवति । इति । स्वं व्यञ्जकः तद्व्यङ्ग्यो योऽर्थस्तद्विषयको यः शाब्दबोधः तज्जन्यो यः चमत्कारः तेन विशिष्टः युक्तो यः अन्यो द्वितीयः चमत्कारः वाच्यार्थचमत्कारः तज्जनकं यज्ज्ञानं वाच्यार्थविषयकं ज्ञानं तद्विषयीभूतो यो वाच्यार्थः तदभिधायकत्वं वाचकशब्दे । तदुभयसम्बन्धेन पूर्वत्र वैशिष्ट्यं ग्राह्यम् । उत्तरत्र वैशिष्टये स्वं वाक्यचमत्कारः स तिष्ठति समवायेन सहृदयहृदये अतः स्वसमवायि सहृदयहृदयं तत्र समवेतः समवायसम्बन्धेन वर्त्तमानः व्यङ्ग्यचमत्कारः। स्वं वाच्यचमत्कारः तदव्यहितपूर्ववर्त्ती व्यङ्ग्यचमत्कारः। तदुभयसम्बन्धेन उत्तरत्र वैशिष्ट्यं बोध्यम् ।

तनयो यो मैनाकः तस्य गवेषणाय लम्बीकृतः प्रसारितो जलधेर्जठरे प्रविष्टश्च यो हिमगिरेर्भुजः तद्वदाचरन्त्या भागीरथ्याः गङ्गायाः सखी यमुना । अयं भावः। गङ्गासागरसङ्गमो भवति । गङ्गायाः वर्णः श्वेतः प्रसिद्धः। हिमगिरिरपि श्वेतः। गम्भीरे स्थाने गवेषणाय स्वसाधनस्य प्रक्षेपः सर्वैरेव क्रियते ततश्च सागरं सङ्गच्छन्तीं गङ्गां हिमगिरिभुजत्वेन उत्प्रेक्षते । सा च उपमानादाचारे इति सूत्रविहित–क्यङो वाच्या । तस्याः चमत्कारः आस्वाद्यते व्यङ्ग्यस्तु तिरोहितो भवतीति । अनयोरेवेति । अनयोः द्वितीयो जागरूकगुणीभूत व्यङ्ग्यको भेदः, तृतीयोऽजागरूकगुणीभूतव्यङ्ग्यको भेदः तयोः।

यत्र अर्थचमत्कृत्या उपस्कृता उपोद्वलिता शब्दस्य शब्दयोः शब्दानां वा चमत्कृतिः प्रधानं तदधमं चतुर्थं काव्यम् ।

उदाहरणम्, मित्रेति । मित्रः सूर्यः । ''मित्रं सुहृदि न द्वयोः। सूर्ये पुंसि'' इति मेदिनी। अत्रेः पुत्रः चन्द्रः। तौ नेत्रे यस्य तस्मै । त्रप्यां शात्रवं येषां तेः दैत्याः । अत्र त्रयीपदेन लक्षणया वैदिकं कर्म यज्ञानुष्ठानादिकं गृह्यते तत्र शात्रवं नाम न यष्टव्यं, न होतव्यमित्यादिरूपेण विरोधाचरणम्, अद्यो द्विजान् देव यजीन् निहन्मः'' इत्यादि क्रियया च तदनुष्ठातृषु द्वेषः। एवं भूतानां दैत्यानां शत्रवे नाशकाय । गां पृथ्वीं त्रायन्ते ते गोत्राः पर्वताः। तेषामरिरिन्द्रः। तस्य गोत्रे वंशे जाताः गोत्रजाः देवाः। तान् त्रायते तस्मै । गां पृथ्वीं गावं धेनुं वा त्रायते इति तृच् प्रत्यये गोत्राता विष्णुः शिवो वेति तस्मै गोत्रात्रे । ते तुभ्यं नमो नमः पौनः पुन्येन प्रणामाः सन्तु ।

अत्र अस्मिन्नुदाहरणे अर्थजनिता चमत्कृतिरानन्दः शब्दानां त्रकाराणां द्वादशानां समानरूपतया वित्त्यासेन वृत्त्यनुप्रासतां प्राप्तानां चमत्कृतौ लीना निगूहिता । अर्थात् समनाक्षरश्रुतिजनितानन्दमनुभवतां सहृदयानां हृदये अर्थचमत्कृतेरभानमिति ।

ननु परेऽपि भेदाः काव्यस्य सम्भवन्ति यथा यत्र अर्थचमत्कृतिसामान्यशून्या शब्दचमत्कृतिः ५, तथा यत्र शब्दचमत्कृतिपरिष्कृता अर्थचमत्कृतिः ६, यत्र शब्दचमत्कृतिसामान्यशून्या अर्थचमत्कृतिः ७, यत्र शब्दार्थचमत्कृत्योः द्वयोः सामानाधिकरण्यम् ८, ते पञ्चमषष्ठसप्तमाष्टमा भेदा कुतो नोच्यन्ते इत्यत्राह–यद्यपीति । पञ्चमे प्रभेदे एकाक्षरघटितपद्ये, अर्धावृत्तियमके, पद्मादिबन्धेषु च रमणीयार्थ–प्रतिपादकशब्दरूपकाव्यलक्षणांशस्य अर्थे रमणीयत्वस्याभावेन काव्यत्वाभावः, अन्येषु त्रिषु भेदेषु तृतीयमध्यमकाव्यत्वमिष्टमेव । अतो न न्यूनत्वं काव्यलक्षणस्य ।

यदपि महाकविभिः पञ्चमे प्रभेदे काव्यत्वं समन्वमोदि तदापि गड्डलिकाप्रवाहेण परम्परामनुरुन्धानैरेव न तु वस्तुतत्वमपेक्ष्येति भावः ।

उल्लास इति । फुल्लानां विकसितानां पङ्केरुहाणां कमलानां पटलं समूहः तत्र पतन्तः पुनः पुनरागच्छतः । पतनहेतुमुपन्यस्यति – मत्ताः पद्ममधुपानात् उन्मत्ततया पतन्तीति भावः । क्षीबा ये पुष्पन्धयाः भ्रमरास्तेषामुल्लासः हर्षः । शोक एव दावानलः । तेन

विकलं हृत् यासां तासां कोकसीमन्तिनीनां चक्रवाकीनां निस्तारः शोकशामकः। उपहतं नाशितं महस्तेजो यैस्तेषां तामसानां तमसां समूहास्तामसाः समूहार्थेऽण्। तेषाम् अन्धकाराणाम् उत्पातः विनाशकः। चक्षुषां नेत्राणां पक्षपातः सहायकः। आलोक–सहकृतमेव चक्षुः पश्यति तदन्यथा तु अकिञ्चित्करम्। एवंभूतः कोऽपि विलक्षणः अग्निविद्युदादितेजोऽपेक्षयाऽधिककार्यकारी धाम्नां तेजसां सङ्घातः समूहः उदयगिरेः प्रान्ततः प्रादुरासीत् उदयाचलसीमातः आविरभूत्। अत्र सर्वत्र कारणेषु कार्यत्वोपचाराद्रूपकालङ्कारः। तथाहि य उल्लासहेतुः सूर्यः स एव उल्लास इति कथनात्। एवमन्यत्रापि। अथवा कार्यकरणयोरभेदः। तर्हि हेत्वलङ्कारः। 'उल्लास' 'फुल्ला' इत्यत्र संयुक्तलकारस्य आवृत्या वृत्त्यनुप्रासः। एकस्याप्यसकृत्परः इत्युक्तेः। एवमत्र शब्दजन्यचमत्कारस्य अर्थजन्यचमत्कारस्य च समकोटिकतया मध्यमकाव्यता।

एवं तन्त्रेण चतुरः काव्यप्रभेदान्निरूप्य पृथक्शस्तन्निरूपयितुमाह–तत्रेति। तत्र चतुर्णां काव्यानां मध्ये। उत्तमोत्तमस्य आद्यस्य काव्यस्य भेदा अनन्ताः गणयितुं न पारणीया तथापि सामान्यतः सामान्यरूपेण। द्विविधो ध्वनिरिति। अत्रायमभिसन्धिः। यद्यपि ध्वनतीति ध्वनिरिति व्युत्पत्यनुरोधेन ध्वननोपायस्य काव्यस्य भेदानां निरूपणं प्रतिज्ञातं तथापि उपेयमुखेनैव उपायस्य विविधतेति ध्वन्यते य इति ध्वननीयस्य उपेयस्यैव वैविध्यं प्रदर्शयति–अभिधामूल इत्यादिना।

रसध्वनेः रसरूपस्य ध्वनेः। तदात्मा रसध्वनेरात्मा स्वरूपं रसः। अत्र ''एवं पञ्चात्मके ध्वनौ परमरमणीयतया रसस्तावदिति' अनेनैव लेखेन कार्यनिर्वाहे ''रसध्वनेस्तदात्मा' इत्याधिकोल्लेखने कोऽर्थ इति पण्डितराज एव परिचिनुयात्। 'रसस्तावदभिधीयते' इत्यादि रसस्तु स्वप्नेऽपि नाभिधेयतामर्हति इति सिद्धान्तविरोधिनी उक्तिः कथमिति स एव महामहिमशाली श्रीमाली जगन्नाथपण्डितराजो जानातु।

समुचितललितेति। अत्र पण्डितराजेन ध्वन्यालोकस्थं ''काव्यस्य हि ललितोचितसन्निवेशचारुणः' इति पाठं किञ्चित्परिवृत्य समुचितललितसन्निवेशचारुणेति दिशा सङ्गृहीतम्। तत्र लालित्यं नाम सौन्दर्यं, तच्च गुणालङ्काराभ्यां काव्ये आधीयते। औचित्यं हि अभिव्यञ्जनसामर्थ्यम्, अभिव्यञ्जनं च त्रिविधस्य रसवस्त्वलङ्कारध्वनेर्भवति। एवञ्च

काव्ये लालित्यं गुणालङ्कारोपस्कृतशब्दार्थयो सन्निवेशेन रचनया वर्णनेन च भवति । काव्ये औचित्यं रसवस्त्वलङ्काररूपत्रिविधध्वन्यभिव्यञ्जकशब्दार्थयोः सन्निवेशेन रचनया वर्णनया च भवतीति सिद्धम् । अतः समुचितललितशब्दार्थयोः सन्निवेशाभ्याम् । रचना वर्णना चात्र सन्निवेशपदार्थः । चारुणा स्पृहणीयेन ग्राह्येन काव्येन समर्पितैः काव्यविशिष्टोपस्थितिविषयैरिति यावत् । वैशिष्ट्यञ्च स्वप्रतियोगिकशक्तिज्ञानजन्यत्व, स्वप्रतियोगिकलक्षणाज्ञानजन्यत्व, स्वप्रतियोगिकव्यञ्जनाजन्यत्व, स्वार्थप्रतियोगिकव्यञ्जना–जन्यत्वैतदन्यतमत्वसम्बन्धेन बोध्यम्। अयं भावः। सहृदयहृदयावर्जनकारितया विभावादिपदव्यपदेश्यानां कारण–कार्य–सहकारिणां काव्येन योपस्थितिस्तद्विषयैः। सा च उपस्थितिः कदाचित् शक्त्या, कदाचिल्लक्षणया, कदाचित् शत्या व्यञ्जनया च, कदाचित् लक्षणया व्यञ्जनया चेति, सर्वेषां सङ्ग्रहाय एतदन्यतमत्वसम्बन्धेनेत्युक्तिः। अत्र सर्वत्र स्वं काव्यम् ।

ननु विभावादिपदव्यपदेश्या दुष्यन्तशकुन्तलादयः कथं सहृदयहृदयं प्रविष्टा, यतो हि 'निविशते यदि शूकशिखा पदे सृजति सा कियतीमिव न व्यथाम्, 'एवं हि प्रवेशे हृदयमेव स्फुटितं स्यादिति चेत्, उच्यते; सम्बन्धविशेषेण तेषां हृदयप्रवेशो भवितुं शक्यः। सम्बन्धस्वरूपं च स्वाधिष्ठानतावच्छेदकत्वम्, स्वभासकोवच्छेदकत्वम्, स्वभासकोपलक्षकत्वं वा किमप्येकं बोध्यम् । स्वं दृश्यश्रव्यपाठ्यकाव्यीयो रेखाचित्रीयश्च दुष्यन्तशकुन्तलादिरूपो विभावः तदधिष्ठानम् अन्तः करणोपलक्षितो जीवः तदवच्छेदकम् अन्तःकरणं हृदयं मन इति यावत् तत्त्वं सम्बन्धः। तेन सहृदयहृदयं प्रविष्टैः प्राप्तैः ।

तदीयां, काव्यं द्रष्टुः, श्रोतुः, पठितुः, रेखाचित्रं च द्रष्टुः सम्बन्धिनी सहृदयतां समानहृदयतां हृदयसंवादापरपर्यायाम् । सहृदयता संवादः (एकः कञ्चिद्विषयमुपस्थापयति परोऽपि तमनुमनुते आम् आम् एवमेवैतदिति अयमेव हृदयसंवादः सम्मतिः) वर्णनीयतन्मयीभवनयोग्यतां सहकृत्य प्रवर्त्तमानस्य भावनाविशेषस्य पुनः पुनरनुसन्धानस्य साधारणीकरणस्वरूपस्य महिम्ना वैलक्षण्येन हेतुना ।

भावनामाहात्म्यमाह – विगलितेति । अत्रेदं बोध्यम् । सामान्यतः नानाप्रकारकमेकधर्मिकं ज्ञानं भवति, कदाचित्तु नानाधर्मिविशेष्यकमपि ज्ञानं भवति इदमेवसमूहालम्बनं कथ्यते।

इदमागन्तुकं भवति । कदाचित्तु वर्णनीयतन्मयीभवनदशायां प्रत्ययप्रवाहापरपर्याया भावना भवति । इदमेव धारवाहिकं पुनः पुनरनुसन्धानात्मकं ज्ञानमुच्यते । धारावाहिकं ज्ञानं समूहालम्बनं नहि भवति । समूहालम्बनात्मके ज्ञाने विषयाणां पार्थक्येन भानं भवति, धारावाहिके तु नैवम् । ततश्च पुनः पुनरनुसन्धानस्य भावनाया साधारणीकरणाख्यव्यापारस्य माहात्म्येन दुष्यन्तरमणीत्वादिः शकुन्तलारमणत्वादिः विशेषो विगलितो भवति परिहृतो जायते अर्थात् साधारण्येन सामान्येन कामिनी कामुक इति उपस्थितिर्भवति । तेन रत्यादेः स्थायिनः, तथा अनुभावानामपि साधारण्यं जायते अर्थात् अमुकस्येमे इति सम्बन्धविशेषस्वीकारस्य अमुकस्य नैवेते इति सम्बन्धविशेषपरिहारस्य आवश्यकता स्वतो जागर्ति । व्यञ्जकानामनुभावानां साधारण्येन ततो व्यक्तानां व्यभिचारिणां तु स्वतः साधारण्यं प्राप्तं भवतीति भावः।

दुष्यन्तरमणीत्वादेः शकुन्तलारमणत्वादेः विगलनस्य फलमाह–अलौकिकविभावेति। लोके रत्यादेः स्थायिनो जनकानि शकुन्तलादुष्यन्तादीनि आलम्बन कारणानि । चन्द्रिकोद्यानादीनि तस्योद्दीपनान्यपि कारणान्येव, जातस्यापि अनुद्दीपितत्वेऽजातप्रायत्वादिति भावः। अश्रुपातादीनि रत्यादेः कार्याणि । चिन्तादीनि जनयितव्यस्य रत्यादेः सहकारीणि । अत्रेयं स्थितिः – प्रियस्य प्रियाया वा स्वविषये चिन्तामग्नतया स्मृतिव्यापृततया वा अवस्थानस्य प्रियेण प्रियया वा श्रुत्या दर्शनेन च प्रागुत्पन्न रत्यादेः विविधत्वं वैलक्षण्यं रसाभिमुख्यरूपाचरणम् पोषणञ्च भवत्यतः विलक्षणपरिपुष्टरत्यादिजनकतया स्मृतिचिन्तादीनां सहकारिकारणत्वमुचितमेव । विविधमाभिमुख्येन चरन्तीति भरतोक्तेः । आभिमुख्येनेति अभेदे तृतीया । अतः आभिमुख्याभिन्नमाचरणं पोषणमित्यर्थः।

ननु कस्यापि विषयस्य स्मरणादिः चिन्तनादिर्वा रागाद्वा दोषाद्वा स्यात्, ततश्च स्मृतिचिन्तादिकं जन्यमेव कार्यमेव, न तु कारणम्, यत्तु मुख्येन कारणेन सह मिलित्वा कार्यं सम्पादयति तत्कारणं सहकारि भवति । एवं स्मृतिचिन्तादेः कार्यत्वेन कारणत्वाभावात् कथं सहकारिकारणत्वमुपन्यस्तमिति चेत्, उच्यते । यथा चाक्षुषरासनत्वाचश्रावणघ्राणजं प्रत्यक्षं, मनःसम्बन्धमन्तरा चक्षुरादिभिर्जनयितुमशक्यमिति मनसः सहकारित्वं व्यपदिश्यते तथैव चिन्तादिमन्तरा रत्यादेः पुष्टत्वज्ञानमसम्भवीति सहकारित्वं तेषामनुमन्यते ।

ननु तथापि तेषां चिन्तादीनां कार्यत्वेन अनुभावत्वमेव स्यान्नतु संचारिभावत्वमिति चेत् । श्रूयताम् । यथा व्यवहारवैलक्षण्याद् व्यवहर्तृवैलक्षण्यमिव कार्यवैलक्षण्यमपि लोके स्वतः सिद्धम् । तथा कार्यवैलक्षण्यादपि व्यवहारवैलक्षण्यं जायते । एवं च अनुभावैः स्थायिनो रत्यादेः स्फुटतरा प्रतिपत्तिः, सञ्चारिभिश्च तस्य स्फुटतमा निश्चिता प्रतिपत्तिरर्थात् रसीभवतो रत्यादेः स्थायिनः सम्यक् चारणमास्वादपात्रीकरणम्, एभिः पुष्टस्यैवास्वादनमिति अनुभावेभ्यः पृथक्त्वं तेषां सञ्चारिणामित्याचार्याणामाशयः ।

तान्येव लौकिकानि कारणकार्यसहकारीणि यदा दृश्य–श्रव्य–पाठ्य–काव्येषु तथा रेखाचित्रेषु उपनिबध्यन्ते तदा तेषु विभावनानुभावनसञ्चारणाख्यव्यापारसद्भावात् विभावानुभावसञ्चारिपदैः व्यपदिश्यन्ते, लोके तथा व्यवहाराभावात् काव्यशास्त्रे तथाव्यवहाराच्च अलौकिकानीत्यपि ।

तत्र विभावनं नाम विशेषेण अतिशयेन रत्यादेः स्थायिनो भावनम् उद्बोधनम्, "विभवो विज्ञानार्थः" इति भरतस्य, "रत्याद्युद्बोधका लोके विभावाः काव्यचित्रयोरि"ति चोक्तेः । इदं हृदयम्=नाट्ये सामाजिकानां, श्रव्ये श्रोतॄणां, पाठ्यकाव्ये पाठकानां, चित्रे दष्टॄणां हृदये वासनारूपेण संस्काररूपेण स्थिता रत्यादय एव रसीभवन्ति । तत्र रसीभवतो रत्यादेः सम्बन्धिन आस्वादस्य अङ्कुरणम् अङ्कुरसदृशीकरणम्, यतो हि अङ्कुरणं नाम मूर्त्तस्य साकारवस्तुनः काण्डपल्लवाद्युद्गमनं, तत्तु बौद्धे पदार्थे आस्वादेऽसम्भवीत्यतः अङ्कुरसदृशीकरणमित्युक्तम् । अर्थात् सूक्ष्मरूपेण स्थितस्य रत्यादेराविर्भावस्तस्य योग्यतायाः सामर्थ्यस्य सम्पादनं विभावनम् । एवं सामाजिकादिहृदयेषु वासनात्मतया स्थितस्य रसीभवतो रत्यादेः स्थायिभावस्य कार्यरूपेण बहिः प्रकाशनमनुभावनम् । एवमेव रसीभवतो रत्यादेः स्थायिभावस्य कार्यरूपेण बहिः प्रकाशनमनुभावनम् । एवमेव रसीभवतो रत्यादेः स्थायिभावस्य सम्यक् विविधतया अभिमुख्येन रसोन्मुखतया चारणमास्वादपात्रीकरणम्, व्यभिचारणम् सञ्चारणं वा ।

सम्भूय संयुज्य । एवञ्च अलौकिकविभावादिसंयोगबलात् प्रादुर्भावितेन । आविष्कृतेन अलौकिकेन व्यापारेण व्यञ्जनाख्येन । व्यापारस्यालौकिकत्वमिदमेव यल्लोकसिद्धकार–कज्ञापकाभ्यामन्यत्त्वम् । तथा हि नायमिन्द्रियादिप्रमाणव्यापारवत् ज्ञापकः, न च

दण्डादिहेतुव्यापारवदुत्पादकः । अत एव विभावादिभिर्व्यञ्जितश्चर्वणीय इत्युक्तिः सङ्गच्छते । विभावादीनां निष्पत्तिहेतुत्वस्वीकारे हि तेभ्यो रसोत्पत्तिप्रसङ्गः स्यात्, किन्तु रसो नित्यः । ज्ञप्तिहेतुत्वाङ्गीकारे च पूर्वं सिद्धस्य तस्य रसस्य स्वीकारप्रसङ्गः स्यात् । किन्तु सिद्धस्य तस्यासम्भव एव । अत एव चर्व्यमाणतैकप्राणः अर्थात् आस्वाद्यामन एव न तु आस्वादितः, आस्वादयिष्यमाणो वा रस इत्युच्यते ।

नन्वेवमप्रमेयो रसः स्यादिति चेदस्तु । स्वसंवेदनसिद्धस्य तस्येदं भूषणं न तु दूषणम् । किं यो हि प्रपाणके रसास्वादोऽनुभूयते स किं सिकतामरिचकेसरकर्पूरादिषु पृथक् २ स्थितेषु समनुभूयते । तैर्यथाऽपृथक्तया संयुज्य एकाकारतां गतैः कश्चिद् व्यापारः प्रादुर्भाव्यते येन पातुः दाहस्य शमः तदुत्तरं मानसतृप्तिपुरःसरं पातृभिः तत्तत्सिकतादिपदार्थाश्चर्व्यन्ते तथैव अलौकिकविभावादिभिरपि व्यञ्जनाव्यापारेण आनन्दांशावरणाज्ञाननिरासस्तदुत्तरं निजस्वरूपानन्देन सह स्थायी रत्यादिकः प्रमात्रा चर्व्यते। एवं चर्व्यमाणतैकप्राणो रसः ।

निवर्तितम्, अपसारितम् दूरीकृतम् आनन्दांशस्य आवरणम् । कर्त्तरि ल्युट् । आवरकम् अज्ञानम् अविद्या यस्य तेन प्रमात्रा । अत एव आवरकाज्ञानस्य निवृत्त्या सकलविषयकज्ञानसम्भवादेव प्रमाता अन्तःकरणोपलक्षितजीवसाक्षी चिद्रूपः स्वप्रकाशः परप्रकाशनात्मकनिजरूपप्रकाशनमेव ज्ञानस्य स्वप्रकाशत्वमिति भावः। चितः प्रकाशस्वभावः परप्रकाशानपेक्षः । वस्तुभूतं निजस्य आत्मनः स्वरूपमानन्दस्तेन सह पूर्वत एव वासनारूपतया स्थितं रत्यादि च गोचरीकरोति साक्षात् करोति विषयीकरोति ततश्च चित् स्वरूपानन्दतादात्म्यापन्नः रत्यादिरेव रसः। अत्र रतौ विषयता तादात्म्याख्या वर्त्तते । अत एव चिद्विषयताविशिष्टः अर्थात् चित्तादात्म्यापन्नः । सा च चित् आनन्दस्वरूपा अतस्तथोक्तम्। प्रमाता कीदृशः भावनविशेषमहिम्ना साधारणकृतविभावादिबलात् प्रमुष्टः । निरस्तः परिमितः परिच्छिन्नः नियत इति यावत् प्रमातृत्वादिः निजधर्मो यस्य सः ।

अत्र सामान्यतः "अत एवे" त्यस्य प्रमुष्टेत्यादिना अन्वयः प्राप्नोति सामीप्यात् । परन्तु प्रमातृनिष्ठानां परिमितत्वादिनिजधर्माणां प्रमोषे "व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृति" रित्युक्तेः साधारणीकृतविभावादिरेव हेतुः न तु आवरणज्ञाननिरासः ।

यदाधारेण पण्डितराजस्यायं लेखः, सोऽयं ग्रन्थ एतादृशः काव्यप्रकाशोऽभिन–वगुप्ताचार्याशयरूपः । ''स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत्कालविगलितपरिमितप्रमातृभावशोन्मिषित वेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा साधारण्येन ''गोचरीकृतः''। अयं भावः। यदि रत्यादिकः नियते प्रमातरि आत्मनि गतस्तर्हि व्रीडा स्यात्, अथवा नियते प्रमातरि नायके, नटे वा अन्यस्मिन् गतस्तर्हि साक्षात्कारविषयत्वाभावापत्तिरतः रत्यादिः साधारण्येन प्रतीयताम् तदर्थं पूर्वं रत्याद्याधारः प्रमाता साधारणो भवतु अर्थात् प्रमातरि परिमितत्वस्य नियतत्वस्य विगलनमावश्यकं; तत्र हेतुः साधारणोपायबलादिति अत एवेति पाठोऽत्राशुद्धः प्रतिभाति ।

स्वलेखे प्राचामाचार्याणां सम्मतिमाह – तथाचाहुरिति । काव्यप्रकाशकाराः । अत्र तैरिति सहार्थे तृतीया तस्याः स्थायीभाव इत्यत्रान्वयः । विभावाद्यैरिति हेतौ तृतीया तस्याः व्यक्त इत्यस्यैकदेशे व्यक्तावन्वयः । यद्यपि पदार्थः पदार्थेनान्वेति तथापि क्वचित् चैत्रस्य नप्ता, मैत्रस्य गुरुकुलमित्यादाविव साकाङ्क्षस्थले एकदेशान्वयोऽपि शास्त्रिसम्मतः । तथा च विभावादिप्रादुर्भाविताऽलौकिकव्यापारव्यञ्जनया विभावादिहेतुकव्यक्त्या विषयीकृतो विभावादिसहितस्थायीभावो रसः ।

अत्र ''व्यक्तिः चर्वणा'' इति काव्यप्रदीपकाराः । व्यञ्जितश्चर्वणीय इति व्यक्तिचर्वणयोः व्यापारत्वं व्यापारित्वं च काव्यप्रकाशकाराः । व्यापारबहुत्वं तु न दोषाय । इमे सर्वेऽपि व्यापाराः साधारणीकरण, विभावनानुभावनसञ्चारण, व्यञ्जन, व्यञ्जनापरपर्याय चर्वणारूपाः विभावादिष्वेव । विभावादयो व्यञ्जका इति भावः । काव्यार्थो विभावादिस्तस्य । जन्यत्वं षष्ठ्यर्थस्तेन तज्जन्या व्यञ्जनेति काव्यव्यापारपदेन व्यञ्जनायाः क्वचिद् ग्रहणं भाति, क्वचिद् काव्यस्य । तस्य शब्दतयाकाव्यरूपो व्यापारः शब्दः प्रमाणमिति । चर्वणाव्यञ्जनयोः पर्यायत्वं स्वीकुर्वद्भिः लोचनकारैरेवमभ्यधायि, ''अलौकिकचमत्कारात्मा रसास्वादः काव्यगतविभावादिचर्वणाप्राणः'' ''चर्वणात्राभिव्यञ्चनमेव'' ''ज्ञानविशेषस्यैव चर्वणात्मत्वात् । इति ।

ममेदं प्रतिभाति । व्यञ्जनचर्वणयोः ज्ञानविशेषतया ऐक्यमभिप्रयद्भिराचार्यैरुदलेखि तथा । परन्तु दीपेन प्रकाशितो घटादिः,स्फोटेन अभिव्यञ्जितोऽर्थः लोकेनोपयुज्यते;एवं

विभावादिभिर्व्यञ्जितो रत्यादिः सहृदयैश्चर्व्यतेऽतः चर्वणा व्यापारः सहृदयनिष्ठः। एतदाशयेनैव काव्यप्रकाशः सङ्गच्छते । अत एव पण्डितराजोऽलेखि इयञ्च समाधेर्विलक्षणेत्यनेन समाधिचर्वणयोः समानश्रेणीकत्वमिति । अथ च चर्वणा फलमपि व्यापारजन्यम् ।

व्यक्तेर्ज्ञानविशेषमभिप्रयद्भिः, "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" इति स्मरद्भिः पण्डितराजैः व्यक्तिः स्वरूप्यते = व्यक्तिश्चेति। आवरणरहिता चित्। अत्र भग्नावरणायाश्चितो व्यक्तित्वे मध्ये विभावादिज्ञानमावरणभङ्गार्थं व्यापारः। साक्षिभास्यत्वं केवलसाक्षिभास्यत्वं तत्र केवलत्वमिन्द्रियादिप्रमाणव्यापाराभावत्वम् ।

विभावादीनामिति । रत्यादेश्चित्तवृत्तितया अन्तःकरणधर्मत्वं ततश्च साक्षिभासत्वम–विरुद्धम् । विभावादीनां दुःष्यन्तशकुन्तलादीनां तत्कथमिति दृष्टान्तविधया समन्वेति । वेदान्तशास्त्रे हि अन्तःकरणं, तद्धर्माश्चित्तवृत्तयः, अज्ञानं (घटमहं न जानामीत्यत्र न जानामीत्यज्ञानम्) अज्ञानपुच्छलग्नो घटः, स्वाप्नाः, भ्रमजन्याश्च प्रातिभासिकाः पदार्थाश्च सर्वे साक्षिभास्याः । तत्र रत्यादयोऽन्तःकरणधर्मा इति सर्वसम्मतम् । विभावादिषु द्विधा स्थितिरिति तत्रोदाहरणद्वयमुपन्यस्तम् ।

स्वप्नतुरगादीनामिवेति । अयं भावः। केचन मन्वते, स्वप्ने "अत्राऽयं पुरुषः स्वयंज्योतिर्भवति (बृहदा, ४ अ. ३. ब्रा. ९ कण्डिका) इति श्रुतिरात्मनः स्वयं ज्योतिष्ट्वं स्वेनैव प्रकाशनमानत्वं प्रकाशयति । यतो हि स्वप्नेऽन्तःकरणमेव गजतुरगाद्याकारेण परिणमतेऽतो दृश्यकोटिप्रवेशादन्तःकरणस्य कर्मत्वमेव न तु करणत्वम्, तेन स्वयं ज्योतिष्ट्वं स्वेन प्रकाशमानत्वमात्मनः प्राप्तमत एव च स्वाप्नाः पदार्थाः अन्तःकरणधर्मरूपा साक्षिभास्याः। तथैव काव्येऽपि मनोमयी शकुन्तला मानोरथो दुष्यन्तः तद्व्यापाराश्च सर्वे मनोमयाः, अतोऽन्तःकरणस्वरूपतया तद्धर्मरूपतया वा साक्षिभास्याः। एकः पक्षः। स्वप्नावस्थाया दृष्टान्तः।

रङ्गरजतादीनामिवेति। अत्र यथा जागृतौ रङ्गरजतस्थले शुक्तित्वं प्रकारीकृत्य अविद्यैव रजताकारेण परिणमते, तथैव नटत्वादिकं प्रकारीकृत्य अविद्यैव दुःष्यन्तशकुन्तलाकारेण परिणमते। स्वप्नेऽपि च चैतन्यमधिष्ठानत्वेन स्वीकृत्य अविद्यैव गजतुरगाद्याकारेण परिणमते। अयं द्वितीयः पक्षः। जाग्रदवस्थाया दृष्टान्तः ।

पक्षयोरनयोर्विशेषद्वयम् । यथा जागृतौ इदं रजतमिति अयं दुःष्यन्त इति । प्रातिभासिक 'रजत, दुःष्यन्त" ज्ञानकाले दुःष्यन्तरजताद्याकाराकारितामविद्यैव गृह्णाति नो मनः, एवं स्वप्नेऽपि अयं गजः, अयं तुरग इति प्रतिभासिक गजतुरगाद्याकाराकारितामविद्यैव गृह्णाति न तु मनः इत्यत्र न मतभेदः । किन्तु स्वाप्नाः पदार्थाः अन्तःकरणपरिणामा, अविद्यापरिणामा वेति मतभेदः। उभयमपि निरूप्यते ग्रन्थेषु । एको विशेषः। अयं घट इति व्यावहारिकघट–ज्ञानसमये तु घटाकाराकारित मनो भवतीति ज्ञेयम् । जागृतौ व्यावहारिक घटपटादिपदार्थज्ञानं मनोवृत्तिसहकृतेन साक्षिणा(न तु केवलसाक्षिणा) जन्यते । किन्तु शुक्तौ रजतज्ञानं, नटे दुष्यन्तादिज्ञानमविद्यावृत्तिसहकृतेनैव साक्षिणा जन्यते, प्रातिभासिकपदार्थस्थले अन्तःकरणवृत्तेरभावात् । तथापि अयं दुष्यन्तः इदं रजतमितीदमाकारान्तःकरणवृत्तिरपि तदानीं भवतीत्यतोऽन्तःकरणस्य ज्ञानकारणतायाः सत्त्वान्नात्मनः स्वयं ज्योतिष्ट्वं, परं स्वप्ने स्वयं ज्योतिष्ट्वमिति द्वितीयो विशेषः ।

ननु भग्नावरणचिद्वेद्यरत्यादिस्थायिभावो रसः । चिद्वेद्यत्वं च चित्तादात्म्यम् । ततश्च चितो नित्यतया कार्यो रसः अनित्यो रस इति व्यवहारो न स्यादित्याशयेनाह – व्यञ्जकविभावादिति । अत्र चर्वणापदार्थो व्यञ्जना । व्यञ्जका ये विभावादयस्तैः प्रादुर्भाविताया: चर्वणाया व्यञ्जनाया इत्यर्थात् । ननु व्यञ्जनया पूर्वमानन्दांशे आवरणभङ्गस्ततः प्रमात्रा आनन्दसंवलिता रतिश्चर्व्यत इति बहुपरम्पराभयादाह–आवरणेति ।वस्तुतः रसो न कार्यः, किन्तु आवरणभङ्गस्य व्यापारस्य कार्यत्वाद्रसोऽपि कार्यः । यज्जन्यं तदनित्यमिति रीत्याऽनित्योऽपि ।

अथवा रसो न कार्य इत्यस्य रसत्वं न कार्यतावच्छेदकमित्यर्थः । यतो हि भग्नावरणचिद्वेद्यत्वं रसत्वं विशिष्टधर्मत्वात् न कार्यतावच्छेदकम् । विशिष्टधर्मस्य च कार्यतावच्छेदकता न युक्ता, आर्थसमाजग्रस्तत्वात् । न हि नीलघटत्वेन नीलकपालत्वेन कार्यकारणभावः । ततो नीलघटत्वं न कार्यतावच्छेदकम् । विशेष्यघटांशकारणसामग्र्या विशेष्यांशस्योत्पत्तिः, एवमेव विशेषणनीलांशकारणसामग्र्या विशेषणांशस्योत्पत्तिः स्यादेव, तर्हि कुतो विशिष्टस्य कार्यतावच्छेदकत्वम्, तथैव प्रकृतेऽपि निर्वाहः स्यादेवेति भावः।

परन्तु एवं स्यात् – प्रमात्रा आनन्दांशसहितरत्यादिस्थायी चर्व्यते इति स्थायिचर्वणाया

उत्पत्तिविनाशौ रसे उपचर्येते । व्यपारचर्वणाया तावुपचर्येते इति कोक्तिः ।

विभावादिचर्वणावधित्वादिति । विभावादिजीवितावधिरिति काव्यप्रकाशपदानुसारं चर्व्यमाणतैकप्राणत्वोक्त्या जीवितं चर्वणा ।

मधुसूदनसरस्वती–मतेनाह–यद्वेति । अत्र भावनाविशेषमहिम्नेति पाठः। मुद्रितो विभावादिचर्वणामहिम्नेति पाठः सम्पातायातः । निजसहृदयतासहकृतेन भावनाविशेषमहिम्नेति पूर्वं मुख्यरसलक्षणे, अग्रे नव्यास्तु–परे तु मतयोर्द्वयोरपि सहृदयतोल्लासितस्य भावनाविशेषस्य दोषस्य महिम्नेति पूर्वापरयोः समानाकारपाठात्, मध्येऽपि तथैव पाठः समीचीनः । अन्यथा निजसहृदयोन्मिषितेनेत्यस्य कुत्र सङ्गतिः । विभावादि–चर्वणा–महिम्नेति मुद्रितपाठस्वीकारे चर्वणया वृत्तिरुदेतीत्यर्थः स्यात्तर्हि एकालौकिकव्यापारस्वीकर्तृपूर्वमतादत्र मते चर्वणाया अर्थात् व्यञ्जनाया, वृत्तेश्चेति व्यापारद्वयस्वीकरणाद् गौरवं स्यात्, यत्कार्यं वृत्त्या, तदेव कार्यमानन्दस्वरूपचैतन्यावरणापसारणं व्यञ्जनया भवति ततः किमर्थं व्यञ्जनेत्यपि च बोध्यम् । सहृदयतया उन्मिषितः उल्लासितस्तु भावनाविशेष एव । एवं च सहृदयस्य निजसहृदयतोन्मिषितेन भावना विशेषमहिम्ना, विभावादिसंसृष्टतत्तत्स्थाय्युपहितस्व स्वरूपानन्दाकारेति पाठः सिद्धान्तभूतः । पूर्वं सहृदयतया भावनाया उन्मेषः । तादृशभावनया च विभावादिभिः संसृष्टाः उद्बोधिताः, प्रत्यायिताः, परिपोषिताः तत्तत्स्थायिनः उपाधयो यत्र एवम्भूतो यः स्वस्वरूपानन्दः निजस्वरूपानन्दस्तदाकारा सहृदयस्य चित्तवृत्तिपरुजायते । तत्र दृष्टान्तः यथा सबीजसमाधौ योगिनः चित्तवृत्तिः । चित्तवृत्तिरुपजायत इत्यस्यार्थः तन्मयीभवनम् । चित्तमानन्दमयं भवतीति भावः ।

भक्तिरसायने मधुसूदनचरणैरेवमेववोचि–

ज्ञाताः स्वपरसम्बन्धादन्ये साधारणात्मना ।
अलौकिका बोधयन्ति भावं भावास्त्रयोऽप्यमी ॥
भावत्रितयसंसृष्टस्थायिभावावगाहिनी ।
समूहालम्बनात्मैका जायते सात्विकी मतिः ॥ वृत्तिरित्यर्थः।
साऽनन्तरक्षणेऽवश्यं व्यनक्ति सुखमुत्तमम् ।
तद् रसः, केचिदाचार्यास्तामेव तु रसं विदुः ॥

अत्रायं भावः पूर्वं सहृदयस्य काव्यरूपशब्दस्य श्रवणं, ततः पदार्थोपस्थितिरुत्तरं शाब्दबोधः । एवं विशेषरूपेण दुष्यन्तशकुन्तलादयः, तेषां कटाक्षभुजादिक्षेपाः, चिन्तादयश्च प्रतीताः । ततः सहृदयतयोल्लासितो भावनाविशेषो भवति तन्महिम्ना दुष्यन्तत्वादिविशेषधर्माणां विगलनं सम्बन्धिविशेषावच्छिन्नत्वेनागृह्यमाणत्वम्, सामान्येन अगम्यत्वादिप्रकारकज्ञानविषयकान्तत्वादिना नायकनायिकादिरूपेणोपस्थितानां विभावादिपदव्यपदेश्यत्वम् । ततश्च । परिणामिस्वभावमन्तःकरणं परिणमते । परिणामो नाम वृत्तिः । प्रकृते च सहृदयस्य अन्तःकरणं विभावादिसंसृष्टस्थाय्युपहितानन्दाकारं भवति । इयमेव तादृशानन्दाकरा वृत्तिः । ततश्च भावनाया माहात्म्यात् विभावादीनामपि विलयनम् । ततःकेवलं वृत्तिव्याप्यं वृत्तिविषयं चैतन्यं स्थाय्युपहितानन्दस्वरूपमेव परिस्फुरति। एवञ्च स्थाय्युपहितानन्द एव रसः ।

यथा लौकिक घटादिस्थले विषयाकारं धारयन्त्यां वृत्तौ प्रतिफलितमन्तः करणोपहितचैतन्यं विषयचैतन्येन ऐक्यमापन्नं विषयाकारेण परिस्फुरति इति सिद्धान्तः । प्रकृते तु स्थाय्युपहितानन्दरूपविषयाकारं धारयन्त्यां वृत्तौ प्रतिफलितं स्वानन्दरूपं चैतन्यमेव न तु अन्तःकरणोपहितचैतन्यम् । तदेव स्थाय्युपहितानन्दरूपविषयाकारेण परिस्फुरति । एवञ्च निजस्वरूपानन्दस्यैव मुख्यतया स्फुरणं स्थायिनस्तु उपाधितया विशेषणत्वेनैव ।

पूर्वस्मान्मताद् यद्वेति मते इयान् विशेषो यत्तत्र अलौकिकः शास्त्रीयानुभवमानकल्प्यो व्यापारो व्यञ्जना, अत्र तु तद्व्यापारस्थाने वृत्तिः। घटादिलौकिकदृष्टान्तात् प्रकृतकाव्यस्थालौकिकदार्ष्टान्तिके इयान् विशेषः । यत्तत्र दृष्टान्ते वृत्तौ प्रमातृरूपान्तः करणोपहितं चैतन्यं परिस्फुरति चिदाभासनाम्ना व्यवहृतं च भवति । ततश्च सा वृत्तिः तेनाभासेन विषयगतमभानापादकमावरणं परिहृत्य विषयं भासयति । प्रकृते दार्ष्टान्तिके तथा न हि भवति । अत्र तु स्थाय्युपहितानन्दाकारायां वृत्तौ 'स्वयं प्रकाशमानत्वान्नाभास उपयुज्यते' इति सिद्धान्तानुसारं अन्तःकरणोपहितचैतन्यं चिदाभासनामकं न प्रतिबिम्बति। किन्तु निजानन्दरूपा चिदेव । ततश्च सा वृत्तिः केवलं चिद्गतमसत्त्वापादकमावरणं परिहरति चित्तु स्वयं प्रकाशते इति । अत एव पण्डिराजेनोच्यते 'आनन्दो ह्ययं न लौकिकसुखान्तरसाधारणः अनन्तःकरणवृत्तिरूपत्वात् । अस्यार्थः–लौकिकानि सुखानि

तु अन्तःकरणवृत्तिरूपाणि अर्थात् सुखाकारेण ये ह्यन्तः करणस्य परिणामास्तद्रूरूपाणि । अयं स्थाय्युपहितानन्दाकारवृत्तिविषयः आनन्दः लौकिकसुखान्तरसाधारणो न अर्थात् सुखाकारेण परिणामिनोऽन्तःकरणस्य परिणामरूपो नास्तीति ।

उपसंहरन्नाह – इत्थञ्चेति । भग्नेति । विभावादिप्रादुर्भावितव्यञ्जनया आनन्दांशे भग्नावरणतया स्वप्रकाशसुखतादात्म्यापन्नो रत्यादिरेव रस इति स्थितम् । अयं भावः ! यथा अयं घट इति ज्ञाने ज्ञाता अहमर्थः, ज्ञेयो घटः, ज्ञानं चेति त्रिपुटीसामान्यरूपेण भासते । तथापि वैशेष्यात् घटस्य भानेन, ज्ञानम् घटविषयकमुच्यते तथा प्रकृतेऽपि प्रमाता मुखरूपो  रत्यादिश्च भासते परं वैशेष्याद्रतेर्भानेन रतिरेव रस इति व्यपदेश इति ।

''वस्तुतस्तु'' इति । अयं भावः । परब्रह्मातिरिक्ताः सर्वेऽपि पदार्था जडा अनानन्दनाः। ततश्च रत्यादयोऽपि अनानन्दना एव । परं साहित्यमस्माकमानन्दस्वरूपं तत्कुतः स्याद्रते रसत्वस्वीकारे इत्यत आह–वस्तुतस्त्विति । वक्ष्यमाणा श्रुतिः 'रसो वै सः, रसं ह्येवायं लब्ध्वानन्दीभवती'' त्यादितैत्तिरीयोपनिषदः । ततश्च चेदेव रसः विभावादिप्रादुर्भावितया व्यञ्जनया, वृत्त्या वा आनन्दांशे भग्नावरणतया रत्याद्यवच्छिन्नंस्वप्रकाशमुखमेव रस इत्यर्थः। सर्वथैव 'स्थायी एव रसः'  इति 'चिदेव रसः' इत्युभयथापि । विशिष्टात्मनः विशिष्टस्वरूपस्य भग्नावरणचिद्विशिष्टो रत्यादिर्वेति रत्यादिविशिष्टभग्नावरणचिद्वेत्यस्य स्वीकारे। पूर्वत्र चिद् विशेषणम् । उत्तरत्र चिद् विशेष्या । पूर्वत्र रतिर्विशेष्या, उत्तरत्र रत्यादिर्विशेषणम् ।

अस्ति, भाति, प्रियं, रूपं, नाम चेत्यंशपञ्चकम् ।<br>
पूर्वत्रयं ब्रह्मरूपं, तदद्यं जगदात्मकम् ।

इत्युक्तेः ह्लादिनीसंविदो रसस्य ब्रह्मरूपतया नित्यत्वमजन्यत्वम्, अविनश्वरत्वमिति यावत् स्वप्रकाशत्वम् परतोऽवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वम् । रत्यादेर्जडस्य जगदात्मकतया अनित्यत्वं कालकृतेयत्तावत्वम्, इतरेण साक्षिणा भस्यत्वम् ।

चर्व्यमाणतैकप्राणो रस इत्यादि प्रकाशोक्तं निगमयन्नाह–चर्वणेति । अस्येति षष्ठ्यर्थो विषयत्वम् । तथा च रसविषयकश्चर्वणाव्यापारः । अत्र ग्रन्थे मतत्रयं निरूपितं प्रकाशकृतः, अभिनवगुप्तस्य, मधुसूदनसरस्वत्याश्च । चर्वणा प्रथममते भग्नावरणा चित्, द्वितीयमते

चिद्गतः आवरणभङ्गः, तृतीयमते तत्तत्स्थाय्युपहितानन्दाकारा वृत्तिः। अयं भावः । चर्वणाया अर्थः ज्ञानम् । ततश्च प्रथममते ज्ञानस्वरूपा भग्नावरणा चित्, द्वितीयमते चिद्गत आवरणभङ्गः अर्थात् कृदभिहितो भावो द्रव्यवत् प्रकाशते इति नयात् आवरण–भङ्गाश्रयः। तादृशी च भग्नावरणा चिदेव ज्ञानरूपा । तृतीयमते वृत्तौ ज्ञानत्वोपचारात् वृत्तिरपि ज्ञानरूपा । ''प्रथमद्वितीयमतयोः भग्नावरणा चिच्चर्वणा'' इत्युक्तो चर्वणापदेन व्यक्तिर्गृहीता भवति । व्यक्तिश्च भग्नावरणा चिदिति पण्डितराजोक्तेः, व्यक्तिश्चर्वणापर्याय इति काव्यप्रदीकारोक्तेश्च। एवञ्च चिद्, व्यक्तिः, चर्वणा, व्यञ्जनेति पर्यायाः । इमे व्यापारार्थकाः । अथ च चिब्दोधः, व्यक्तिरभिव्यक्तिः प्रकाशः, चर्वणा, आस्वादः इत्येवं व्यापारजन्यफलार्थका अपि इमे शब्दाः निर्दिष्टा इत्यतो भ्रमो न कार्यः ।

चर्वणाचास्येत्यत्र व्यापारार्थिका सा । अत एव समाधेरपेक्षयाऽस्या वैलक्षण्यजिज्ञासापीत्याह–इयमिति । परब्रह्म शुद्धचिदानन्दः आस्वादः आस्वादनीयो विषयो यत्र तस्मात् समाधेः। विभावादिसंवलितचिदानन्दः आलम्बनं विषयो, अस्याश्चर्वणायाः। चितः शुद्ध्यशुद्धी विलक्षणत्वबीजे । भाव्या च पादुर्भाव्या च काव्यव्यापारमात्रात् । काव्यरूपो शब्दो यो व्यापारः प्रमाणं तस्मादेवेत्यर्थः । बुद्धिग्राह्यम् समाधिग्राह्यमित्यर्थः । शाब्दीति अपरोक्षात्मिकेति च कथम्, तत्रोत्तरं प्रत्यक्षवस्तुविषयकं ज्ञानं प्रत्यक्षम्, प्रत्यक्षं वस्तु च शब्देन वा इन्द्रियसन्निकर्षेण वा उपतिष्ठताम्, न कोऽपि विरोधः । दशमस्त्वमसीत्यादि विषयसन्निकृष्टस्थले शब्देनाऽपि अपरोक्षज्ञानं भवत्येव । यथा च हे श्वेतकेतो ? त्वं तदसि । अत्र तच्छब्दार्थः आत्मा स च सदा सन्निहित एव । ननु तदिति परोक्षे विजानीयादिति सम्बोधनसारो युष्मदर्थ इति च दिशा तत्त्वं वाक्येन परोक्षमेव सद्वितीयमेव वस्तूपस्थाप्यं तत्कथमपरोक्षात्मिकेत्युक्तिः, लक्षणया चिदंशप्रतीत्या सङ्गतिः।

विभावानुभावव्यभिचारिणां संयोगात् भाव्यभावकसम्बन्धात् रसस्य निष्पत्तिर्भोग इति साङ्ख्यसिद्धान्तानुसारं भरतसूत्रं व्याख्यातुर्भट्टनायकस्य मतमवतारयति–''भट्टनायकास्तु'' इति । नैयायिका शङ्कुकादय आङ्गिकवाचिकसात्विकाहार्यिकाभिनयानां प्रदर्शके नटे अनुकर्त्तरि अनुमीयमानो रसः, मीमांसका भट्टलोल्लटप्रभृतयोऽनुकार्ये दुःष्यन्तादौ मुख्यवृत्या रसः इति वदन्ति । तत्र यद्येवं परगततया रसोऽनुमीयतेऽथवा उत्पद्यते तर्हि ताटस्थ्यमेव

स्यात् । नन्वस्तु ताटस्थ्यमौदासीन्यम्, किन्नः छिन्नम् । तत आह – ताटस्थ्येनेति । तटस्थत्वेन स्वव्यतिरिक्ताश्रयत्वेन रसस्य प्रतीतौ हि अनास्वाद्यत्वम्, चर्व्यमाणतैकप्राणे रसे चर्वणाया आस्वादस्याभावाद्धि रसत्वमेव गतं स्यात्, एवं का वो हानिस्ततोऽधिका । अस्तु तर्हि आत्मगतत्वेन प्रतीतिरित्यत्राह–आत्मेति । शकुन्तलादुष्यन्तादिचरितमयात् नाट्यात् काव्याद्वात्मनि सामाजिके रसस्य प्रत्ययो ज्ञानं दुर्घटः घटयितुमशक्यः । तद्दुर्घटत्वे हेतुमाह–शकुन्तलेति । कारणाभावे कार्याभाव इत्यर्थः ।

अयं भावः । कोविदे नटेऽनुकर्त्तरि, अभिनयमात्रप्रदर्शनम्, दुष्यन्तेऽनुकार्ये च प्रेमकथा लौकिकी व्रीडेर्ष्यादिदायिनीति उभयत्रापि रसोऽसम्भवः । अवशिष्टाः सहृदयाः सामाजिकाः। तैः सहृदयैः । यो विभावादिभिरञ्जितः निरावृतसुखसंवलितः स्थायी भावो रस्यते आस्वाद्यते स रसः अत एव स रसिकप्रिय इत्युच्यते इत्येवमनुभवमनुसरता भरतसूत्रेण विभावादिभिः रसनिष्पत्तिः समीहिता ।

परिकरश्लोकौ चात्र–

नटोऽभिनयवेदी स्यान्नर्तको नृत्यमार्गवित् ।
दुष्यन्ते लौकिकी वार्ताह्युभयत्राऽसम्भवो रसः ॥
रस्यते यः सहृदयैर्विभावादिभिरञ्जितः ।
निरक्तसुखयुक् स्थायी स रसो रसिकप्रियः ॥

सा हि रसनिष्पत्तिः समाजिकान् प्रति शकुन्तलादेः, सामाजिकीः स्त्रीः प्रति दुष्यन्तादेश्चाविभावात्वात् कथं स्यात् । तदेतदुक्तं–विना विभावम्, अनालम्बनस्य निष्कारणस्य रसादे रत्यादेरप्रतिपत्तेरज्ञानात् ।

न चेति । साधारणं शकुन्तलादिसर्वस्त्रीसामान्यं कान्तात्वं कमनीयत्वं नायिकात्वं विभावतायाः रत्यादिवासनाविकासहेतुत्वस्य अवच्छेदकं प्रयोजकम्, अत्रापि नेपथ्येऽपि अर्थात् स्वसदृशवेषभूषादिपरिधानज्ञातशकुन्तलायामपि अस्तीति न वाच्यम्, एवं परिज्ञातशकुन्तलायां राजपत्नीत्वेन मातृबुद्धेरुदयादगम्यात्वज्ञानं, ततश्च अविभावत्वमिति पुनस्तत्रैवावलम्बितो वेतालः । तथा च विभावत्वं परिष्करणीयमित्यत आह – अप्रामाण्येति। अत्रेयं स्थितिः । चेत् क्वचित् गम्यप्रमदाविषये कस्यचिद् ज्ञानं भवेत् यदियमगम्येति तर्हि

वासनाविकासहेतुत्वाभावे विभावत्वं गतं स्यादतः परस्तं बोधयति । भोस्तवेदम् ''इयमगम्येत्याकारकं ज्ञानम्'' अप्रमाणम्, अप्रमार्थात् भ्रमः । तन्मा भवतु अर्थात् इयमगम्येति ज्ञानं भ्रमात्मकं मा जायताम् । तदर्थम्, इयमगम्येति ज्ञाने अप्रामाण्यनिश्चयेन भ्रमेण अनालिङ्गितत्वमनास्कन्दिततत्वमसम्बद्धत्वं विशेषणं देयम् ।

इदन्तु बोध्यम् । इयमगम्येति ज्ञाने इदमर्थो शकुन्तलादिरूपो विशेष्यम्, अगम्यात्वं विशेषणं प्रकारः । अत एवोच्यते अगम्यात्वं प्रकारो यस्मिन् ज्ञाने तज्ज्ञानमगम्यात्वप्रकारकम् । एवं च अप्रामाण्यज्ञानानास्कन्दितं यदगम्यात्वप्रकारकं ज्ञानं तद्विरहस्तदभावः इति विशेषणं विभावेऽवश्यं देयम् ।

तदेतदुक्तं विभावतावच्छेदककोटौ विभावविशेषणश्रेण्याम् । अवश्यमित्यस्येदं तात्पर्यम् । गम्यात्वप्रकारकमिदमर्थविशेष्यकं लौकिकसन्निकर्षाजन्यं दोषविशेषाजन्यमनाहार्यमियं गम्येत्याकारकं ज्ञानं प्रति गम्यात्वाभावप्रकारकस्य इदमर्थविशेष्यकस्यानाहार्य–स्याप्रामाण्यनिश्चयानालिङ्गितस्येयमगम्येति निश्चयस्य प्रतिबन्धकत्वं वर्ततेऽतः प्रतिबन्धकीभूतस्य तादृशज्ञानस्य विरहोऽभावोऽवश्यं निवेश्यः, अन्यथैतादृशज्ञानाभावस्य अनिवेशे स्वस्रादेरपि कान्तात्वापत्तिरिति ।

ननु अगम्येयमिति अगम्योऽयमिति ज्ञानं क्रमशः ज्ञातृपुरुषस्त्रियोरात्मनि, न तु इदमर्थे विशेष्ये क्रमशः शकुन्तलादौ दुष्यन्तादौ च, तेन न स्वस्रादेः कान्तात्वस्य गुर्वादेश्च कान्तत्वस्य चाऽपत्तिः, ततश्च इदमर्थे तादृशज्ञानस्य विरह एवाऽस्ति, तर्हि किमुच्यते; तादृशज्ञानविरहोऽवश्यं निवेश्य इति । अत्रायमभिसन्धिः । तज् ज्ञानं समवायेनात्मनि, प्रकारतासम्बन्धेन अगम्यात्वे, अगम्यत्वे च; विशेष्यतासम्बन्धेन इदमर्थे । अत्र विवक्षितं तु, तज् ज्ञानं विशेष्ये इदमर्थे तिष्ठतु । अत उच्यते–विशेष्यतेति । यस्याभावः स प्रतियोगीति न्यायात् । अगम्यात्वेति अगम्यत्वेति च ज्ञानं प्रतियोगि । तादृशज्ञानाभावीया प्रतियोगिता तादृशज्ञाने । प्रतियोगितावच्छेदकः सम्बन्धः विशेष्यतारूपः । एवं च विशेष्यतासम्बन्धावच्छिन्नं ज्ञानं प्रतियोगि । ततश्च ज्ञानं विशेष्यतासम्बन्धेन इदमर्थे विशेष्ये शकुन्तलादौ दुष्यन्तादौ वा तिष्ठति । ततश्च या ज्ञाननिष्ठा प्रतियोगिता विशेष्यतासम्बन्धावच्छिन्ना । तदवच्छिन्ना सा यस्याभावस्य सोऽभावः विशेष्यतासम्बन्धावच्छिन्नप्रतियोगिताकस्तस्य ।

अन्यथा तादृशज्ञानाभावस्य अनिवेशे । इदन्त्ववश्यं समाहितमनस्कैः ध्येयम् । काव्यं पठन्ति, शृण्वन्ति, अभिनयं च पश्यन्ति स्त्रियः पुरुषाश्च । एतत् उभयत्राऽपि समानं, तर्हि अगम्यात्वप्रकारकज्ञानेति कान्तात्वमिति चोल्लेखः कथं सङ्गच्छते । पुरुषाणां कृते तु तद्विशेषणं सार्थकं स्यात् । परमादौ वाच्यः स्त्रिया रागः पुंसः पश्चात्तदिङ्गितैरिति सिद्धान्तात् । आदौ स्त्रीणां कृते अयमगम्य इति ज्ञानमपेक्षितं तथा कान्तत्वं चेति लेखनीयं, सुसमञ्जसं च तत् स्यात् । व्याकरणस्यैष नियमः। ''पुमान् स्त्रिया'' इति सूत्रेण स्त्रिया सहोक्तौ पुमान् शिष्यते । अतः अगम्या च अगम्यश्च कान्ता च कान्तश्चेत्यनयोरेकशेषे अगम्य इति कान्त इत्यवशिष्यते तेन गम्यत्वप्रकारकमिति कान्तत्वं विभावतेति लेखनीयं, सर्वं सुस्थं स्यादिति।

अन्यरसेष्वपि तादृशमतिदेशमाह–एवमिति । एवं शृङ्गारे विभावतावच्छेदककोटौ अगम्यात्वप्रकारकज्ञानविरहस्य निवेश इव करुणे अशोच्यत्वज्ञानविरहस्य, उत्साहे कापुरुषत्व–ज्ञानाभावस्य, हास्ये अनुपहसनीयज्ञानविरहस्य, रौद्रे कोपापात्रत्वज्ञानविरहस्य, बीभत्से अजुगुप्सनीयत्वज्ञानाभावस्येत्यादिर्निवेशो बोध्यः । तथाविधस्य विशेष्यता–सम्बन्धावच्छिन्नप्रतियोगिताकस्य । तादृशज्ञानस्य अगम्यात्वादिप्रकारकबोधस्य अनुत्पादः उत्पत्यभावः । तस्य ज्ञानस्य प्रतिबन्धकान्तरम् अवरोधकान्तरम् । तस्य निर्वचनमन्तरेण तस्य व्याख्यानं विना दुरुपपादः दुःखेन उपपादयितुं शक्यः ।

स्वात्मनि दुष्यन्ताद्यभेदबुद्धिः, शकुन्तलाद्यभेदबुद्धिः, । अहं दुष्यन्त इति नृणाम् । अहं शकुन्तलेति नारीणाम् बुद्धिः । तथा इयमगम्येति अयमगस्य इति ज्ञानस्य प्रतिबन्धिका। धराधौरेयत्वस्य पृथिवीपतित्वस्य । वैधर्म्यस्य विरुद्धधर्मस्य ।

ननु प्रात्यक्षिकी, आनुमानिकी, शाब्दी, प्रातीतिकी, योगजेति प्रतीतयः प्रतीताः । तासु प्रतीतिषु इयम् आत्मनि दुष्यन्ताद्यभेदप्रतीतिः का ? न नाम्ना व्यवहार्येति शङ्कते–किञ्चेति । प्रमाणान्तराणि प्रत्यक्षानुमानप्रतिभानयोगरूपाणि । तेषामनुपस्थानादभावात् । काव्यशब्दाज्जायमानत्वात् शाब्दी प्रतीतिः ।

व्यावहारिकीति । व्यवहारिकाः लोके प्रेमसम्बन्धिवार्तालापेषु व्यवहृताः शब्दाः ''तोर में मोर घुसत है'' इत्यादयः तैर्जन्या या नायकमिथुनस्य नायिकानायकायोः परस्परं वृत्तान्तानां प्रवृत्तीनां वित्तिर्ज्ञानं तासामिवास्या अपि काव्यशब्दाज्जायमानायाः प्रतीतेरपि

अहृद्यत्वापत्तिरचमत्कारितापत्तिः । शाब्दत्वस्योभयत्रापि समानत्वादिति भावः । चिन्तेति । ये पदार्थाः काव्यनाट्ययोरनुभूयन्ते त एव पदार्थाः चिन्तया उपनीताः मनसि प्राप्ताः । एवमियं मानसी प्रतीतिः । तस्या अपेक्षया अस्याः काव्यादिभ्यो जायमानायाः प्रतीतेर्वैलक्षण्योपलम्भात् । मानस्यां विजातीयं वृत्तिरूपं सुखम्, अस्यां तु वृत्तिविषयीभूतमलौकिकं सुखमिति भावः । न च स्मृतिरिति । अनुभवः, संस्कारः, स्मृतिरिति कार्यकारणभावः अर्थात् अनुभवसमानाकारा स्मृतिः । तथा च पुर्वानुभवोऽपेक्षितः। परमत्र तथा प्रागननुभवः दुष्यन्तोऽहमित्यभेदविषय–संस्काराख्यजनको नास्ति तत्कथमियं प्रतीतिः स्मृतिः स्यादिति ।

सिद्धं निगमयन्नाह–तस्मादिति । यस्मात् काव्यशब्दाज्जायमाना प्रतीतिर्विलक्षणा यस्मात् हेतोः । अभिधया शक्त्या निवेदिताः बोधिताः भावकत्वाख्येन भावनाविशेषरूपेण व्यापारेण अगम्यात्वादिविषयकं यद् रसस्यानुभूतिसम्पादने विरोधिभूतं ज्ञानं तस्य प्रतिबन्धद्वारा अवरोधनद्वारा कान्तात्वादिर्यो रसानुभूतावनुकूलः रसानुभूतिजनकः धर्मः तत्पुरस्कारेण तद्वैशिष्ट्येन उपस्थाप्यन्ते उपस्थितिविषयीक्रियन्ते । एवमुक्तरीतिकेन व्यापारेण । दुष्यन्तो राजा, शकुन्तला कण्वस्य पोष्या पुत्री, देशः कण्वर्षेराश्रमः, कालो मध्याह्नादिः वयो यौवनम्, अवस्था मृगयावेषः, आदिपदग्राह्याः प्रियंवदाऽनसूयासहचारिणीत्व–वृक्षसेकादिव्यापाराश्च । साधारणतयोपस्थापनानन्तरं पूर्वव्यापारस्य भावकत्वस्य महिमनि सामर्थ्ये पङ्गौ विधुरे सति । तृतीयस्य भोगकृत्त्वस्य भोजकत्वस्य व्यापारस्य । निगीर्णयो रभिभूतयो रजस्तमयोर्गुणयोः । रजस्तमसी अभिभूयावस्थानमुद्रेकस्तद्युक्तेन उद्रिक्तेन सत्वेन जनितो यः साक्षात्कारः । साक्षात्कारस्वरूपमाह–निजेति । निजाया आत्माख्यायाः चितः स्वभावा स्वरूपा या निर्वृतिरानन्दस्तत्र विश्रान्तिरन्यत्सर्वं विहाय तन्मयीभवनम् । एतद् रूपेण साक्षात्कारेण विषयीकृतः भावनया वासनया उपनीतः, अतः साधारणात्मा सम्बन्धिविशेषस्वीकारपरिहाररहितो रत्यादिः स्थायीभावो रसः ।

पूर्ववदिहापि व्यवस्थेति प्रदर्शयन्नाह–तत्रेति । चिद्विषयो रत्यादिः, रतिविशिष्टा चिदेव रस इति पूर्वं यथा, तथैव भुज्यमानो भोगविषयो रत्यादिः, रत्यादिभोगो वा इत्युभयमेव उभयं वस्तु रत्यादिः चिद्वा, रसः रस इति व्यवह्रियमाणं दृश्यते । भोगः चर्वणा, रसना,

आस्वादनमिति यावत् । रत्यादिविषयाणां संवन्धात् संबलनात् । ब्रह्मास्वादसविधवर्त्ती ब्रह्मानुभवसब्रह्मचारी । न तु स एवेत्यर्थः । उपसंहरन्नाह–एवम् उक्तप्रकारेण । काव्यरूपस्य शब्दस्य अन्यशब्दविलक्षणस्य त्रयोंऽशा भागा व्यापाराः इत्यर्थः । अभिधा भावना चैव तद्भोगीकृतिरेव चेति । तत्राभिधा वाच्यविषये, भावना भावकत्वं कारणादीनां साधारणतासम्पादनविषये, भोगीकृतिः भोगकृत्वं भोजकत्वमिति यावत् रसविषयो सहृदयनिष्ठो व्यापारः।

निष्कर्षयन्नाह–मतस्येति । एतस्य भट्टनायकनाम्ना निर्दिष्टस्य मतस्य सिद्धान्तस्य पूर्वस्मात् मतात् अभिनवगुप्तमम्मटादिसिद्धान्तापेक्षया भावकत्वस्य व्यापारान्तरस्य स्वीकार एव विशेषो भेदः । भोगस्तु व्यक्तिः व्यञ्जनेत्यर्थः। चर्वणास्वादनभोगापरनामा प्रतीतिरिति का.मु.ध्व.१८० पृष्ठे(लोचनकारोक्तेः)। कुत इत्याह–भोगकृत्वं व्यञ्जनादविशिष्टम् समानम्। भोगीकरणव्यापारश्च काव्यस्य रसविषयः सहृदयनिष्ठः ध्वननात्मैव, नान्यत् किञ्चिदिति लोचनकारेक्तेः । अन्येति । भावकत्वभोगाभ्यां भिन्ना सैव अभिनवगुप्तादिप्रोक्तैव सरणिः मार्गः।

इदन्तु बोध्यम्–पण्डितराजेन रसलक्षणनिरूपणे–भावनाविशेषमहिम्ना विगलित–दुष्यन्तरमणीत्वादिभिरित्युक्तं तदेव दुष्यन्तरमणीत्वादिविशेषाणां विगलनं प्रमोषः साधारणनायकनायिकाद्युपस्थापनञ्च भट्टनायकमतेऽपि, अथ च भावना भावकत्वं साधारणीकरणमेव । तदुक्तं लोचनकारेण तच्चैतद्भावकत्वं नाम रसान् प्रति यत्काव्यस्य तद्विभावादीनां साधारणत्वापादनम् । इति । एवं चात्र विषये भट्टनायकमतमेवानुसृतम्, तर्हि किमुच्यते ? मतस्यैतस्य पूर्वस्मान्मताद्भावकत्वव्यापारान्तरस्वीकार एव विशेष इति ।

''नव्यास्तु'' इति । काव्ये नाट्ये चेति । काव्यं (केवल) शब्दार्थौ, नाट्यमाहार्य आरोपः, तस्मिन् । अत्र काव्यग्रहणेनैव नाट्यस्यापि ग्रहणं प्राप्तमथापि तदभिनयप्राधान्यमनुसृत्य तथोक्तिः । यद्यपि रघुवंशादि सार्थकशब्दरूपं यथा वर्त्तते तथा अभिज्ञानशाकुन्तलमपि सार्थकशब्दरूपं काव्यमेव, नास्ति कश्चिद्भेदस्तथापि एकत्रार्थः अभिनेतुमनर्हः, अन्यत्राभिनेतुमर्हः । एतदभिप्रायेणैव पृथगुक्तिः। प्रकाशितेषु एकत्र शाब्दबोधविषयं प्रापितेषु, अन्यत्राभिनयैश्चतुर्विधैः प्रदर्शितेषु सत्सु । व्यञ्जनव्यापारेण विभावादिभिः सम्भूय प्रादुर्भावितेन

अलौकिकेन व्यञ्जनानामकव्यापारेण । गृहीतायाम् सामाजिकैर्ज्ञातायां दुष्यन्तः शकुन्तलाविषयकरतिमान् इत्येवंरूपायां दुष्यन्तादिनिष्ठायां शकुन्तलालम्बनिकायां रतौ । सामाजिकानां हृदि व्यक्तायामित्यर्थः ।

अनन्तरं तादृशव्यक्तेरुत्तरम् । सहृदयतया निजहृदयसंवादेन उल्लासित उन्मिषितस्य काव्यार्थविषयकभावनाविशेषस्य दोषस्य । अस्यायमाशयः नैयायिकैः स्वीकृतोऽनुभवजन्यः स्मृतिहेतुर्भावनाविशेषोऽत्र नास्ति । स तु आत्मनो गुणः । अयं तु भावनाविशेषः "द्रुते चित्ते विनिक्षिप्तः स्वाकारो यस्तु वस्तुनेत्युक्तेरन्तःकरणधर्मो दोषः । अत एवोक्तं मधुसूदनसरस्वतीपादैः" "न तु विनश्यता ज्ञानेन जनितस्तार्किकैः परिकल्पित आत्मगुण" इति । ज्ञानस्य त्रिक्षणावस्थायित्वान्नश्यता ज्ञानेनेत्युक्तम् । अत्र मतद्वयम् व्याप्यधर्मेण कारणत्वसम्भवे व्यापकधर्मोऽन्यथा सिद्ध इति नयात् स्मृतिं प्रति अनुभवत्वेन कारणत्वं न तु ज्ञानत्वेन ज्ञानस्य कारणत्वम् । तथा च नहि स्मृतिः स्मृतिहेतुर्भवतीति प्राचीनाः । स्मृतिं प्रति संस्कारं च प्रति ज्ञानस्य कारणता न त्वनुभवत्वेनानुभवस्य, संस्कारस्य स्मृत्यात्मकफलनाश्यतया प्रथमस्मरणेन तज्जनकसंस्कारस्य नाशात् एकवारमनुभूतस्य एकवारस्मरणे सति पुनः स्मरणाभावप्रसङ्गः । ज्ञानत्वेन हेतुतायां तु प्रथमानुभवनाशेऽपि स्मृत्या पुनः संस्कारः । तेन पुनः स्मृतिरिति स्मृतिरपि स्मृतेर्हेतुरिति नवीनाः । दृढतरसंस्कारस्य स्मृत्यात्मकफलनाश्यत्वं नाङ्गीक्रियते नवनवफलोद्गमेऽपि वृक्षादिषु तथाननुभवादिति जरत्तराः। महिम्ना सामर्थ्येन ।

कल्पितेति । कल्पितेन मनोमयेन दुष्यन्तत्वेन अवच्छादिते अर्थात् दुष्यन्तत्व–रूपावच्छादकेन विशिष्टे सम्बद्धे इति यावत् । अयं भावः । अवपूर्वके छद् धातौ खण्डशक्तिः। व्यापारजन्यं फलं कर्मणि प्रत्ययस्थले प्रधानम्, फलजनको व्यापारः कर्तरि प्रत्ययस्थले प्रधानम् । तथा चात्र फलस्थानीया विशेष्यता, व्यापारस्थानीया अवच्छेदकता । कर्त्तरि प्रत्ययस्थले विशेष्यता विशेषणम्, अवच्छेदकता विशेष्यम् । कर्मजप्रत्ययस्थले विशेष्यता विशेष्यम्, अवच्छेदकता विशेषणम् । एवञ्च कर्मणि प्रत्ययस्थले दुष्यन्तत्वावच्छादिते इत्यस्यायमर्थः; दुष्यन्तत्वनिष्ठावच्छेदकतानिरूपकविशेष्यताश्रये स्वात्मनि अहमर्थे । कर्तरि प्रत्ययस्थले अवच्छादक इत्यस्यायमर्थः स्वात्मभूताहमर्थनिष्ठविशेष्यतानिरूपितावच्छेदकताश्रयो

दुष्यन्तत्वम् ।

एवम्भूते स्वात्मनि रत्यादिः स्थायी । समुत्पद्यमानस्तत्कालं जन्यमानः । कथं जन्यमान इति दृष्टान्तयति – अज्ञानेति । अज्ञानमविद्या अवच्छिन्नं विशिष्टं सम्बद्धमिति यावत् येन शुक्तिकाशकलेन इति बहुव्रीहिः तस्मिन् अज्ञानावच्छिन्ने अज्ञानाश्रयावच्छेदके इत्यर्थः । अज्ञानम् अविद्या तदाश्रयः शुक्तिकाशकलावच्छिन्नं चैतन्यं तदवच्छेदकम् शुक्तिकाशकलम्। अथवा अज्ञानेन अवच्छिन्नं सम्बद्धमिति तृतीयातत्पुरुषः । तस्मिन् अज्ञानावच्छिन्ने अज्ञानसम्बद्धे । सम्बन्धश्चात्र स्वाश्रयावच्छेदकत्वरूपः । स्वमज्ञानमविद्या पूर्ववत् । तादृशे शुक्तिकाशकले यथा आविद्यिकः रजतखण्डः समुत्पद्यते तथैव तादृशे स्वात्मनि समुत्पद्यमानः अनिर्वचनीयः सदसद्विलक्षणः साक्षिभास्यः इन्द्रियादिप्रमाणव्यापारमन्तरेण केवलसाक्षिवेद्यः। शकुन्तलाविषयकः शकुन्तलालम्बनको रत्यादिरेव रसः ।

अयं चेति । अयं समुत्पद्यमानो रत्यादिः दोषविशेषस्य भावनाख्यस्य कार्यः जन्यः एवञ्च भ्रमः । प्रत्यक्षं ज्ञानं द्विविधम्, यथार्थमयथार्थञ्च । तत्रायथार्थञ्च यदा दोषेण जन्यं तदा भ्रमः यदा इच्छया कल्पितं तदा आरोपः ।

अर्थात् दोषेण जन्यं भ्रमत्वेन प्रथितम्, इच्छया कल्पितम् आरोपत्वेन प्रतीतमिति । तथा चात्र दोषजन्यत्वात् भ्रम इति । नाश्यश्चेति । तस्य दोषविशेषस्य नाशेन तिरोधानेन अयं रत्यादिः नाश्यः तिरोहितो भवति । अत्र तन्नाशेन नाश्य इति भावेन नाश्यश्च तन्नाशस्येति कथनं "कर्तृकर्मणेः कृति" रिति सूत्रेण कृद्योगे कर्तरि षष्ठीविधानानुरोधात् ।

स्वोत्तरभाविनेति । स्वं समुत्पद्यमानः साक्षिभास्यो रत्यादिः । तस्मादुत्तरस्मिन् काले भवितुं शीलेन जायमानेन अलौकिकेन लोकोत्तरेण आह्लादेन सह यः समुत्पद्यमानरत्यादेर्भेदः पार्थक्यं तस्याग्रहादज्ञानात् सुखपदेन सुखमिति पदेन व्यपदेश्यो वाच्यो भवति । स्वपूर्वेति। स्वं समुत्पद्यमानो रत्यादिः तस्मात् पूर्वस्मिन् काले उपस्थितेन व्यञ्जनया दुःष्यन्तादौ ज्ञातेन शकुन्तलाविषयकरत्यादिना सह यः समुत्पद्यमानरत्यादेः तदाग्रहः भेदाग्रहः तस्मात्, अथवा पूर्वापि रतिः परापि रतिरिति एकाकारप्रतीत्या रतित्वेन एकत्वस्य अध्यवसायात् ज्ञानाद्वा व्यङ्ग्यः वर्णानीयश्च उच्यते ।

अवच्छादकम् अहमर्थनिष्ठविशेष्यतानिरूपितावच्छेदकताश्रयरूपं दुष्यन्तत्वम–

निर्वचनीयं मनोमयं कल्पितमेव । अवच्छादकत्वं च रत्यादिविशिष्टो रत्यादिप्रकारको योऽभेदबोधस्तस्मिन् विशेष्यतावच्छेदकत्वम् । अयमिह सुस्पष्टार्थः । पूर्वम् "अहं दुष्यन्तः" इति ज्ञानं, तत्र अहमर्थो विशेष्यम्, अनिर्वचनीयं दुःष्यन्तत्वं विशेष्यतावच्छेदकम् अवच्छादकं च कथ्यते । तत्पश्चात् "अहं दुष्यन्तः शकुन्तलाविषयकरतिमान्", इति बोधः । अत्र अहमर्थे रत्यादिः प्रकारो विशेषणमिति यावत् । एवं च रत्यादिर्विशेषणं प्रकारो यत्र दुष्यन्ताद्यभेदविषयके बोधे स बोधो रत्यादिविशिष्टो रत्यादिप्रकारकः "अहं दुष्यन्त शकुन्तलाविषयकरतिमानि"त्याकारकः तस्मिन् बोधे विशेष्यतावच्छेदकत्वं नाम शकुन्तलाविषयकरतित्वावच्छिन्नप्रकारतानिरूपिता या अहमर्थनिष्ठविशेष्यता तादृशविशेष्यतया निरूपितं यत् समवायसम्बन्धावच्छिन्नं दुष्यन्तत्वनिष्ठमवच्छेदकत्वं तदेव । अन्यनिष्ठस्य वस्तुनः कथमन्येन आस्वाद्यतेति रीत्या दुष्यन्तनिष्ठस्य रत्यादेः समाजिकैरनास्वाद्यत्वान्न रसत्वम्, ननु कुतो नास्वाद्यत्वमत आह स्वनिष्ठेति । अतत्सम्बन्धिभिः सामाजिकैः सह सम्बन्धमकुर्वद्भिः शकुन्तलादिभिर्विभावादिभिः स्वनिष्ठस्य सामाजिकनिष्ठस्य तस्य रत्यादेः कथं प्रकाशोऽर्थान्नाभिव्यक्तिः । ननु स्वस्मिन् सामाजिके दुष्यन्ताद्यभेदज्ञानं शकुन्तलादिभिः सह सम्बन्धप्रयोजकमस्तु तत्राह – बाधबुद्धिरपराहतेति । "तद्वत्ताबुद्धिं तदभाववत्ताबुद्धिः प्रतिबध्नाति" इति नियमात् "नाहं दुष्यन्तः" इतिभेदबुद्धिरहं दुष्यन्त इत्यभेदबुद्धिं प्रतिबध्नाति, स्वस्मिन्नाधुनिकत्वस्य कापुरुषत्वस्य च दुष्यन्ते च धराधौरेयत्वस्य तत्कालिकत्वस्य च ज्ञानात् । इत्यादिकं सर्वं निरस्तमपास्तम् । अयं भावः । लौकिकसन्निकर्षाजन्यं दोषविशेषाजन्यमनाहार्यज्ञानमेव बाधबुद्ध्या प्रतिबध्यम् न तु दोषजन्यमाहार्यं ज्ञानम् । एवञ्चेदं अहं दुष्यन्तः शकुन्तलाविषयकरतिमानित्याकारकं ज्ञानं दोषविशेषजन्यमाहार्यमेवातो न प्रतिबध्यं केनापीति ।

ननु दोषस्तु सर्वथा सर्वैरपि हेय एव तर्हि किमिति दोषविशेषः स्वीक्रियते इत्यत आह – यदपीति । प्राचीनैराचार्यैः विभावादीनां यदपि साधारण्यं दुष्यन्तरमणीत्वादिरूपशकुन्तलात्वादिविशेषांशपरिहारेण कामिनीत्वादि सामान्य मुक्तं स्वीकृतमिति भावः । तदपि दोषविशेषस्य भावनाविशेषस्य कल्पनमनुमननं विना दुरुपपादम्, उपपादयितुमशक्यम् । कुत एतदित्याह – काव्येनेति । काव्येनेति तृतीयाया घटकत्वमर्थः।

यतो हि शकुन्तलात्वादिः प्रकारो यत्र बोधे तद्बोधजनकैः काव्यघटकशकुन्तलादिशब्दैः शकुन्तलादयो विशेषभूता अर्था एव प्रतिपाद्याः, तेषां च सामाजिकैः सहासम्बन्धात् कथं रत्याद्युद्बोधकत्वं स्यात् अर्थात् न स्यात्, कथं तर्हि रसः । इति सर्वमाकुलं जातं, तदर्थं तेषां साधारण्यमावश्यकं, साधारण्यमूलं च दोषः । तदेतदुक्तम् – अतोऽवश्येति । यतः साधारण्यमावश्यकमतस्तदर्थमवश्यं कल्प्ये स्वीकार्ये दोषे सति, तेनैव दोषविशेषेणैव दुष्यन्ताद्यभेदबुद्धिरपि स्वात्मनि अहमर्थे सूपपादा उपपादयितुं शक्या ।

ननु सुखजनकसुन्दरवस्तुस्थले सर्वोऽपि "अहं दुष्यन्तः" इत्यभेदं कर्त्तुं धावतु नाम सुखस्य सर्वैरिष्यमाणत्वात् । परन्तु दुःखस्या सर्वैरपि हेयत्वात्, स्त्रीपुत्रादिविरहरूपहेयदुःख–जनकभीषणवस्तुस्थले को वा शोकादिमद्दशरथाद्यभेदं कर्त्तुं वाञ्छिष्यति एवं करुणबीभत्सभयानकरसेषु कथं सुखरूपता, इत्यादि सर्वमाशङ्क्य प्रवर्त्तते – नन्वेवमिति । एवमभेदबुद्धेः सद्भावेन यथा दुष्यन्ते रतेः सुखविशेषजनकता तथैव सहृदयेऽपि रतेः सुखविशेषजनकताऽस्तु किन्तु करुणादिषु रसेषु शोकादेः स्थायिनः सहृदयानां हृदये आह्लादस्य हेतुत्वं जनकत्वं कथं स्यात् यतः तेषां 'शोकादीनां" दुःखजनकतया प्रसिद्धिः। प्रत्युत विपरीतम् । नायको दुष्यन्तादिर्यदि सुखी तर्हि तदभिन्नमात्मानं मन्वानः सहृदयोऽपि सुखी, स यदि दुःखी तर्हि तादृशः सहृदयोऽपि दुःखीति भावः ।

न चेति । यदि सत्यमेव वस्तु दुःखजनकं तर्हि रङ्गरजतादेः रज्जुसर्पादेः सर्वथाऽपि मिथ्याभूतात् सुखविस्मयादीनां भयकम्पादीनामुत्पादाभावप्रसङ्गः । न च सर्पादेर्मिथ्याभूतत्वात्तथात्वं केवलम्, अपि तु कल्पितत्वेन मिथ्याभूताया रतेरपि सहृदये सुखजनकतायाः अनुपपत्तेरसङ्गत्यापत्तेश्च । अस्मिन्मते रतिः कल्पिता । अन्यमम्मटादिमते तु प्राग्विनिविष्टवासनारूपा स्वीयैव सा चर्व्यतेऽतो न कल्पितेति ध्येयम् ।

वस्तुतस्तु सत्यं मिथ्येति चर्चा वस्तुविषये न करणीया, यतः कदाचित् कस्यचित् सत्यसिंहादिभयकारणेभ्योऽपि भयं नोदेति सुखकारणेभ्योऽपि न सुखम् । कदाचिदसतोऽपि वस्तुनः भयकारणत्वरहितादपि भयं, सुखहेतुत्वशून्यादपि सुखमुदेति । कोऽयं हेतुरिति गवेषणायां विलक्षणा परिस्थितिरेवेति क्रमः । यतो हि अन्यशब्दवैलक्षण्यं हि काव्यात्मनः शब्दस्य व्यञ्जकशक्त्यनुगृहीतस्य, यद्वशादभिधाऽपि विलक्षणैव । बहुशोऽध्यक्षीकृता

अपि नवनवाः, अरमणीया अपि रमणीयाः, प्रतिभासन्ते पदार्थाः । अथ च काव्यशब्दोपस्थापिता त एव पदार्थाः यथा स्वदन्ते न तथाध्यक्षतः । तस्मात् कार्यानुरोधेन कारणस्य कल्पनीयतया आह्लादप्रयोजकत्वमिव दुःखप्रतिबन्धकत्वमपि वृद्धपितामहाद्युत्सङ्गस्थशिशोः श्मश्रूत्कर्षणादेरिव दिव्या क्रियासामयिकमर्दनादेरिव कल्पनीयमिति ।

ननु काव्यव्यापारज आस्वाद इत्युक्तिरसमञ्जसैव । यदि हि काव्यव्यापारो व्यञ्जना। ततश्च केवलं दुष्यन्तस्य शकुन्तलायां रतिर्गृह्यते । तदनन्तरं भावनाविशेषेण स्वात्मनि दुष्यन्ताद्यभेदस्ततो रतिः तत आस्वादः । इति स्थितिरित्यत आह–जन्यत्वञ्चेति । आस्वादस्य काव्यव्यापारजन्यत्वञ्च स्वं काव्यव्यापारः तस्मात् । "तदुदितः स हि यो यदनन्तरः" इति न्यायात्स्वस्मात्काव्यव्यापारात् जन्यत्वं भावनाया उदटङ्कि । वस्तुतस्तु सहृदयतया जन्या भावना । एवं च स्वस्मादनन्तरं या सहृदयतोल्लासिता भावना । तज्जन्या या नायकाभिन्ने स्वस्मिन् रतिः तद्विषयक आस्वादः । इति परम्परसम्बन्धेन आस्वादस्य काव्यव्यापारजन्यत्वमिति भावः । तेन जन्यत्वस्योक्तस्वरूपस्वीकारेण । प्रतिबध्यते निरस्यते । इत्याहुरिति "नव्यास्तु इति पूर्वेणान्वयः ।

"परे तु" इति । व्यञ्जनाव्यापारस्य दुष्यन्तादौ शकुन्तलादिविषयकरत्यादिग्राहकस्य अनभ्युपगमोऽस्वीकारः । तथा दुष्यन्तत्वावच्छादिते स्वात्मनि अनिर्वचनीयो रत्यादिः समुत्पद्यते इत्येवं रीत्या स्वीकृतस्य अनिर्वचनीयख्यातेश्चानभ्युपगमः । तथापि प्रागुक्तस्य भावनाविशेषरूपस्य दोषस्य महिम्ना सामर्थ्येन अत्र महिम्नेति तृतीयार्थो जन्यत्वम् । स्वात्मनि अहमर्थे । अस्य बोध इत्यत्रान्वयः । बोधो रसः । अत्र बोधे चत्वारि विशेषणानि। दुष्यन्ततादात्म्यावगाहित्वं, शकुन्तलाविषयकरतिमदभेदविषयकत्वं, मानसत्वं, विलक्षणविषयिताशालित्वञ्चेति । एवञ्च दुष्यन्ततादात्म्यावगाही शकुन्तलाविषय–करतिमदभेदविषयको मानसो विलक्षणविषयिताशाली बोधो रसः। निरूपकतासम्बन्धेन विलक्षणविषयताशालीति वस्तुतो बोधो विषयी भवति तत्र च विषयिता तिष्ठति । तथा च विषयिताशाली बोध इत्युचितः पाठः । काव्यार्थभावनाजन्येति पाठोऽप्यधिकः। भावनाविशेषमहिमजन्यत्वस्य पूर्वमुक्तत्वात् ।

"शकुन्तलाविषयकरतिमान् न" इत्याकारको भेदः अमरसिंहादौ कस्मिन्नपि

व्यक्तिविशेषे। तादृशभेदस्य अभावः दुष्यन्ते । तत्रैव दुष्यन्ते रतिरपि । भेदाभावस्य प्रतियोगितावच्छेदकरूपतया भेदाभावो रतिरूपः। एवञ्च शकुन्तलाविषयकरति–मदभेदेत्यस्यार्थः शकुन्तलाविषयकरतिरिति । विषयो यस्य बोधस्येति बहुव्रीहौ कप् । तादृशभेदाभावनिरूपितविषयितावान् बोध इति प्रतिफलितम् ।

इदन्तु बोध्यम्, तादात्म्यसम्बन्धेन यः कोऽपि पदार्थः पटादिः स स्वस्मिन्नेव पटादावेव वर्त्तते न तु तन्तुप्रभृतौ, गृहेऽन्यत्र वा । तथा च तादात्म्यसम्बन्धेन पदार्थस्याभाव एव अन्योन्याभावो भेद इति यावत् । एवं च तादाम्यसम्बन्धावच्छिन्नप्रतियोगिताक इति भेदस्य स्वरूपम् । प्रकृतेऽपि दुष्यन्ततादात्म्यसम्बन्धावच्छिन्ना या शकुन्तलाविषयकरतिमन्निष्ठा प्रतियोगिता तन्निरूपको भेद इति । अन्यथा मातरि शकुन्तलायां पुत्रस्य प्रेम,पुत्र्यां तस्या पितुरपि तत् । एवं च सा प्रतियोगिता पुत्रस्य पितुर्वा तादात्म्यसम्बन्धावच्छिन्नापि स्यात् तन्मा भवतु तदर्थं दुष्यन्ततादात्म्यसम्बन्धावच्छिन्ना प्रतियोगिता, इत्युक्तम्, ततश्च स भेदः प्रतियोगितावच्छेदकीभूततादृशरतिमद्दुष्यन्तं विहाय अन्यत्र वर्त्तते । तस्य भेदस्य अभावो रतिरूपो दुष्यन्ते इति सर्वं समञ्जसम् ।

ननु तादृशभेदाभावनिरूपितविषयितावान् बोध इति प्रतिफलितमिति प्रगुक्तं, तत्कथम्, यतो यथा विषयितानिरूपिता विषयता भवति । उत्तरति–यन्निरूपितत्वं यस्य तदाश्रयनिरूपितत्वमपि तस्येति नियमात् विषयेणाऽपि निरूपिता विषयिता भवति । ततश्च तादृशभेदाभावनिरूपितविषयितावानित्युक्तं साधु । सा च विषयिता विलक्षणा । अतएव विलक्षणविषयिताशलीत्युक्तम् । विषयितायां वैलक्षण्यं च शकुन्तलाविषयकरतिमद्भेद–निष्ठप्रतियोगिताकत्वाभावत्वगतद्वित्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोग्यवच्छेदकतानिरूपित–निरूपकतानिरूपितत्वरूपम् ।

अत्र लक्षणे निरूपकतापदमवधृत्य समन्वयः करणीयः । विषयिताया निरूपकता तर्त्तते शकुन्तलाविषयकरतिमद्भेदाभावे तादृशभेदाभावनिरूपितविषयितावानित्युक्तेः । सा निरूपकता किंधर्मावच्छिन्नेति गवेषणायाम् । एष नियमः। यद्धर्मविशिष्टं निरूपकं स धर्मो निरूपकतावच्छेदकः। प्रकृते भेदाभावरूपं निरूपकं तादृशभेदनिष्ठप्रतियोगिताकत्वा–भावत्वद्वयविशिष्टं, ततः ताभ्यां धर्माभ्यामवच्छिन्ना निरूपकता जाता । तत्र पर्याप्तिसम्बन्धेन

अवच्छेदकतावत् तादृशधर्मद्वयमिति प्रतीतिसाक्षिका निरूपकतावच्छेदकता तादृशभेदनिष्ठप्रतियोगिताकत्वाभावत्वद्वये वर्त्तते । पर्याप्त्यनुयोगि तादृशधर्मद्वयम् । अनुयोगितावच्छेदकं तादृशधर्मगतं द्वित्वम्, पर्याप्तिप्रतियोगिनी अवच्छेदकता । तथा च तादृशद्वित्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोग्यवच्छेदकतानिरूपितनिरूपकतानिरूपितत्वमेव।

ननु पूर्वं कदाचिदपि स्वगततया शकुन्तलारतेरगृहीतत्वात् संस्काराभावात् कथमिदानीं शकुन्तलाविषयकरतिमद्भेदाभावविषयको बोध इति चेदुच्यते अयं मानसः साक्षात्कारः । इयं मानसी सृष्टिरित्यर्थः । मानोरथो रसोऽस्मिन् मत इत्यायातम् ।

नन्वियं मानसी सृष्टिः स्वप्नेऽपि । तथा च स्वाप्नोऽपि बोधो रस इति प्राप्तमत आह–स्वाप्नेति । यत्स्वप्नेऽपि तादृशो बोधो भवति किन्तु स्वाप्नस्तादृशो बोधो न काव्यार्थचिन्तनजन्मा न काव्यार्थभावनाजन्यः, इति अतो न रसः। काव्यार्थचिन्तनजन्मन एव बोधस्य रसत्वमित्यभिमानः। अत्र स्वाप्नादिस्तु इतिपदे आदिपदार्थः चित्रजन्यो बोधः। स्वाप्नः, मानसः, औपनायिकः, चैत्र इति चतुर्विधबोधस्य विभावादिसंसृष्टरत्यादिविषयकस्य रसत्वं वर्त्तते । विभावादिभिः संसृष्टो रत्यादी रस इति स्वप्नेऽपि काव्यपदार्थानां चिन्तनं को वारयति तत्रापि यदि काव्यार्थभावनया विभावाद्युपस्थितिस्तदा रसोऽस्तु । स्वप्ने वा नाटकं पश्यति तर्हि तत्रापि कुतो न सः । ननु विभावादिजीवितावधी रस इति हेतोः चित्रदर्शनादपि विभावाद्युपस्थितिरिति तत्र चित्रेऽपि यदा रस आचार्यैरभ्युपगम्यते ततः काव्यार्थचिन्तनजन्मा एव रस अन्यो नेति को दुराग्रहः। इति ।

तेनेति । तेन काव्यार्थभावनाजन्यत्वाभावेन तत्र स्वाप्नादिबोधे न तादृशस्य काव्यव्यापारजन्याह्लादसदृशस्य आह्लादस्य आपत्तिर्ज्ञानम् । न तादृशाह्लादापत्तिरित्यपि विचारणीयमेव । यथा अदृष्टोत्पन्नप्रतिभातः विलक्षणं काव्यं, व्युत्पत्त्यभ्यासाभ्यामुत्पन्न–प्रतिभातः विलक्षणं काव्यं यथा तादृशं नहि भवति तथा स्वाप्नविभावादिसामग्रीतो विलक्षण आस्वादः, मानसविभावादिसामग्रीतो विलक्षण अस्वादः, औपनायिकविभावादिहेतुभ्यो विलक्षणः सः, चित्रगतविभावादितो विलक्षणः सः, न तु सर्वेभ्यः समान एवेति कथं तर्हि तादृशाह्लादापत्तिः स्यादिति ।

आशङ्कते–एवमपीति । काव्यार्थभावनाजन्मनो बोधस्य रसत्वस्वीकारेऽपि स्वस्मिन्

सामाजिके अविद्यमानस्य रत्यादेरनुभवः, पूर्वं कदाचिदपि सामाजिकैः स्वगततया शकुन्तलारतेरगृहीतत्वेन संस्काराभावात् इदानीं काव्यार्थभावनायां नाट्याभिनयदर्शनवेलायां वा शकुन्तलाविषयकरतिमद्भेदाभावबोधः कथं नाम स्यात् भवेत् ।

उत्तरति–मैवमिति । एवंरूपा शङ्का माविष्कारणीया । अयं पूर्वोक्तो बोधः, लौकिकसाक्षात्कारो न, लौकिकसन्निकर्षजन्यं प्रत्यक्षं ज्ञानं नास्ति येन विषयतासम्बन्धेन प्रत्यक्षं प्रति अभेदसम्बन्धेन विषयः कारणमिति नियमहेतुना अवश्यं विषयेन्द्रियसन्निकर्षाय विषयसद्भावोऽपेक्षणीयः वाञ्छनीयः स्यात् । अपि तु अयं बोधो भ्रमः ।

''अपि तु भ्रमः'' इति लेखो विचारणीयः । भ्रमे हि अनिर्वचनीयख्यातेरावश्यकत्वात्। अत्र तु अनिर्वचनीयख्यातेरनभ्युपगमेऽपीति इत्युक्तेः तस्या अस्वीकारात् कथं नाम भ्रमः। असदर्थविषयकत्वादयं बोधो भ्रम इत्यपि वक्तुं न शक्यते स्वाप्नस्यापि असदर्थविषयकस्य बोधस्य त्वन्मते रसत्वेन सङ्ग्रह्यत्वापत्तेः। विशेष्यावृत्तिधर्मप्रकारकं ज्ञानं भ्रम इत्यपि न, तथा सति संशयस्यापि तथात्वापत्तिः स्यादिति । ननु मानसबोधस्य रसत्वस्वीकारे आस्वाद्यमानतैकप्राणो रस इत्युक्तिः कथमत आह–आस्वादनस्येति । आस्वादनं रसविषयकमिति । आस्वादनं रसविषयकमिति शब्दस्य व्यवहारे प्रयोगे आलम्बनं बीजं रत्यादिविषयकत्वम् ।

इत्यपीति । न केवलं बोधो रस इति वदन्ति किन्तु तदुपपत्त्यर्थं 'स्वाप्नादिस्तु'' इत्यारभ्य ''आलम्बनः'' इतिपर्यन्तं पदार्थमपि वदन्ति ।

एतैश्चेति । एतैः ''परे तु'' इति सङ्केतेन गृहीतैराचार्यैरिति शेषः । त्रिविधोऽपि त्रिप्रकारको बोधो रसपदार्थतया रसपदवाच्यतया अभ्युपेयः । स्वीकार्यः । त्रीन् प्रकारान् निर्दिशति–स्वेति ।

प्रथमः प्रकारः–स्वात्मनि अहमर्थे । दुष्यन्तत्वं धर्मितावच्छेदकं यत्रेति अत्र धर्मी विशेष्यः अहमर्थः तत्र धर्मिता, तदवच्छेदकं धर्मितावच्छेदकं दुष्यन्तत्वमिति सङ्गतिः। दुष्यन्तत्वधर्मितावच्छेदकं यत् शकुन्तलाविषयकरतिवैशिष्ट्यं तदवगाही तादृशरतिप्रकारताविषयको बोधः। अयमत्र स्फुटोऽर्थः। दुष्यन्तोऽहं शकुन्तलाविषय-करतिमानित्याकारको बोधः। एतस्य परिष्कारः – दुष्यन्तत्वावच्छिन्न–

स्वनिष्ठविशेष्यतानिरूपितशकुन्तलाविषयकरतित्वावच्छिन्नप्रकारताको बोधः। दुष्यन्तत्वावच्छिन्ना या, स्वनिष्ठा विशेष्यता, तादृशविशेष्यतानिरूपिता या शकुन्तलाविषयकरतित्वावच्छिन्ना प्रकारता तादृशप्रकारताविषयको बोध इति यावत् ।

द्वितीयः प्रकारः। स्वात्मत्वं विशेषणं यत्रेति स्वात्मत्वविशिष्टं तस्मिन् स्वात्मनि । शकुन्तलाविषयिका रतिर्विशेषणं यत्र, शकुन्तलाविषयकरतिमान् दुष्यन्त इत्येवं रीत्या रतिर्दुष्यन्ते विशेषणं; तथा च शकुन्तलाविषयकरतिविशिष्टस्य दुष्यन्तस्य तादात्म्यमभेदमवगाहते विषयीकरोति स बोधः। अयमिह स्पष्टार्थः। "अहं शकुन्तला–विषयकरतिमद्दुष्यन्तः" इत्याकारको बोधः । परिष्कृतरूपं च शकुन्तलाविषयकरति–दुष्यन्तत्वोभयधर्मावच्छिन्न–तादात्म्यसम्बन्धावच्छिन्नप्रकारतानिरूपित–स्वनिष्ठविशेष्यताको द्वितीयो बोधः। शकुन्तलाविषयिणी रतिः, दुष्यन्तत्वं च एताभ्यामुभाभ्यां धर्माभ्यामवच्छिन्ना तथा तादात्म्यसम्बन्धावच्छिन्ना या शकुन्तलाविषयकरतिमद्दुष्यन्तनिष्ठा प्रकारता तादृशप्रकारतानिरूपिता या स्वनिष्ठा विशेष्यता तादृशविशेष्यताविषयको बोधो द्वितीयः।

तृतीयः प्रकारः– स्वेति । स्वात्मत्वविशिष्टे स्वात्मनि । दुष्यन्तत्वं च शकुन्तलाविषयकरतिश्चेति दुष्यन्तत्वशकुन्तलाविषयकरती । तयोर्वैशिष्ट्यमवगाहते । अयमस्मिन् विशदार्थः । अहं, दुष्यन्तः, शकुन्तलाविषयकरतिमाँश्चेति एकस्मिन् द्वयमितिवद् बोधः। परिष्करणम्–दुष्यन्तत्वावच्छिन्नप्रकारतानिरूपिता सती शकुन्तलाविषयकरति–त्वावच्छिन्नप्रकारतानिरूपिता या स्वनिष्ठाविशेष्यता तन्निरूपको बोधस्तृतीयः ।

एवं विनिगमनाभावात् त्रिविधो बोध एवात्र अभुपगमनीयः न तु शकुन्तलाविषयकरतिमानहं दुष्यन्त इति चतुर्थो बोधः। हेतुश्चात्र विशिष्टवैशिष्ट्यावगाहिनि बोधे विशेषणतावच्छेदकप्रकारकनिश्चयस्येव विशेष्यतावच्छेदकप्रकारकनिश्चयस्यापि हेतुत्वेन पूर्वं स्वस्मिन् शकुन्तलाविषयकरतेरगृह्यमाणतया निरुक्तबोधोदयाऽसम्भवात् । अयं भावः। शकुन्तलाविषयकरतिमानहं दुष्यन्त इति बोधः (विशिष्टस्य वैशिष्ट्यं सम्बन्धमवगाहते इति) विशिष्टवैशिष्ट्यावगाही वर्त्तते । प्रकृते च शकुन्तलाविशिष्टा रतिः, तस्या वैशिष्ट्यं विशेष्येऽहमर्थे । तथा चायं बोधो तादृशो वर्त्तते । अतोऽहमर्थनिष्ठविशेष्यताया अवच्छेदकस्य विशेषणस्य शकुन्तलाविषयकरतेर्ज्ञानं पूर्वं स्वस्मिन्नपेक्षितं तच्च अहमर्थे

सामाजिकेऽसम्भवमेवेति । अत्र वैशिष्ट्यं सम्बन्धः। स च समवायः तादात्म्यं वा ।

शब्दात् अप्रतीतत्वात् काव्यघटितात् कस्मादपि शब्दात् रतिर्वाच्या नहि भवतीत्यर्थः। चेष्टालिङ्गकं चेष्टाहेतुकम् । दुष्यन्तोऽयं, शकुन्तलाविषयकरतिमान्, शकुन्तलाविषयककटाक्षा–दिरूपचेष्टावत्त्वात् । यन्नैवं तन्नैवम् । इयं शकुन्तलाविषयककटाक्षादिरूपचेष्टा, प्रसिद्धकारणातिरिक्तकारणजन्या अनुभावत्वात् यन्नैवं तन्नैवमिति अनुमानद्वयम् । आदौ भावनाविशेषस्य प्रारम्भे । विशेषणस्य रत्यादेः ज्ञानार्थमभ्युपेयं स्वीकार्यमिति ।

मुख्यतया वस्तुगत्या साक्षात् रत्यादेः दुष्यन्तादिगतत्वात्, रत्यादेश्च रसत्वात् रत्यादिरूपो रसो यद्यपि दुष्यन्तादिगत एव । तथापि कमनीयानां स्वाभाविकसुन्दराणां विभावादीनामभिनयेन प्रदर्शने कोविदे निपुणे दुष्यन्तादेरनुकर्त्तरि नटे, पाठ्यकाव्ये रघुवंशादिस्थले काव्यपाठके, श्रव्यकाव्ये श्रोतरि तद्रूपतानुसन्धानात् अर्थात् तादृशवेषभूषादिनेपथ्यग्रहणादिजन्यात् सादृश्यज्ञानरूपदोषात् । दुष्यन्तस्वरूपताज्ञानात् समारोप्य दुष्यन्तोऽयमिति समारोपं कृत्वा शकुन्तलाविषयकरतिमानिति साक्षात्क्रियते अनुभूयते । अस्मिन् भट्टलोल्लटमते दुष्यन्तोऽयं शकुन्तलाविषयकरतिमानित्यादिः साक्षात्कारः प्राग्वत् लोकवत् । धर्मिणि दुष्यन्ते अंशे लौकिकेन सन्निकर्षेण नायकयोः परस्परमवलोकनस्थले सम्भोगेन, तयोः परस्परं कटाक्षनिक्षेपणे संयुक्तसमवायेन जन्यत्वात् लौकिकः साक्षात्कारः। आरोप्ये नटादौ अंशे अलौकिकसन्निकर्षो ज्ञानं तेन जन्योऽत एव अलौकिको शास्त्रीयानुभवमात्रकल्प्य इत्युच्यते।

दुष्यन्तेति । दुष्यन्तत्वेन गृहीते चतुर्विधाभिनयप्रदर्शनकोविदे नटे अभिनयमाहात्म्यात् दुष्यन्तोऽयमिति ज्ञानं भवति, एवञ्च तत्त्वेन ज्ञाते पक्षतावच्छेदकदुष्यन्तत्वविशिष्टे पक्षे नटे दुष्यन्तादिगतो रत्यादिरनुमीयते । तत्र हेतुं वदति–विभावादीति । नटो नटी च केवलमभिनयतः । अतो रोमाञ्चादयः चिन्तादयश्च कृत्रिमा अवास्तवाः, सत्यं; तथापि अभिनयमाहात्म्यात् अकृत्रिमत्वेन वास्तवत्वेन ते ज्ञायन्ते । एवञ्च शकुन्तलाविषयकर–तिनिरूपितभ्रमात्मकव्याप्तिप्रकारकं रोमाञ्चत्वेन रोमाञ्चविशेष्यकं यत् ज्ञानं, तस्मात् दुष्यान्तत्वेन ज्ञाते नटे विशेष्ये रतिरनुमीयते । तथा च फलितार्थः– दुष्यन्तत्वावच्छिन्नोद्देश्यतानिरूपित–समवायसम्बन्धावच्छिन्नशकुन्तलाविषय–करतित्वावच्छिन्नविधेयताकानुमितिं प्रति शकुन्तलाविषयकरतित्वावच्छिन्नप्रकारतानिरूपित–

व्याप्तित्वावच्छिन्नप्रकारतानिरूपिता या कृत्रिमरोमाञ्चादित्वचिन्तादित्वावच्छिन्नप्रकारता, तन्निरूपिता या दुष्यन्तत्वावच्छिन्ना नटनिष्ठा विशेष्यता तादृशविशेष्यताशालिपरामर्शः कारणम्।

समाने विषये प्रत्यक्षं बलवत्, अनुमितिर्दुर्बला, किन्तु भिन्ने विषयेऽनुमितिर्बलवती। दुष्यन्तत्वेन ज्ञातो नटः प्रत्यक्षः, तद्विभावादयोऽपि प्रत्यक्षः । किन्तु रतिस्तु न प्रत्यक्षा । अतस्तद्विषयेऽनुमितिसामग्र्या बलवत्वादित्युक्तम् ।

विभावेति । समुदिताः एकत्र समवायेनोपस्थिताः विभावादयस्त्रयः रसाः इति । एवमत्र एकादशपक्षाः रसविषये निरूपिताः । चत्वारः पक्षा अन्येऽपि वर्त्तन्ते । तथा हि – केचन विभावादीनां संयोगो रस इति, एकेऽनुकार्यो रस इति, अपरे विभावानुभावमात्रमेव विशिष्टसामग्र्या समर्प्यमाणं तद्विभावनीयानुभावनीयस्थायिरूपचित्तवृत्त्युचितवासनानुषक्तं स्वनिर्वृतिचर्वणाविशिष्टमेव रस इति, तन्नाव्यमेव अनुकरणमेव रस इत्यपि वदन्ति । एवं मिलित्वा पञ्चदश पक्षाः।

तत्रेति । एषु पक्षेषु भरतसूत्रस्वारस्यं प्रदर्शयितुं भिन्नभिन्नव्याख्यातृहृदयं निष्कर्षयन्नाह– ‘‘व्याख्यायते’’ इति । अत्र व्याख्याने संयोगादिति पदस्य, निष्पत्तिरितिपदस्य च स्वीयं स्वीयमनुभवमनुसर्तृणां अनुभवभेद एव कारणम् । व्याख्या बुद्धिबलापेक्षा सा नोपेक्ष्या सुखोन्मुखैरिति श्रीहर्षोक्तेः । रसान्तरेति । विभावादीनां मध्ये एकस्य विभावस्य वा अनुभावस्य वा व्यभिचारिणो वा रसान्तरसामान्यं वर्तते तस्मात् नियतैकस्य रसस्य व्यञ्जकता तत्रानुपपन्नेति भरतसूत्रे तृणारणिमणिन्यायो नानुसृतः किन्तु दण्डचक्रादिन्यायोऽनुसृत इति ध्येयम् ।

एवमिति । मिलितानां रसव्यञ्जकत्वं प्रमाणसिद्धं तथापि क्वचित् परिमृदित–मृणालीम्लानमङ्गमित्यादौ एकस्मादेवासाधारणाद्रसाभिव्यञ्जकत्वं परिदृश्यते तत्रेतरद् द्वयमाक्षिप्यैव न तु तद्द्वयं विना रसाभिव्यक्तिरिति न व्यभिचारः शङ्कनीयः ।

इत्थमिति । इत्थममुना प्रकारेण शेमुषीभिः बुद्धिभिः। अवसितोऽपि ज्ञातोऽपि । नानारूपतया अनेकप्रकारतया । मनीषिभिः चिरन्तनचिन्तकैः। परमाह्लादेन लोकोत्तरानन्देन सह यः प्रतीतेरविनाभावो नियतसम्बन्धः तस्य भावस्तत्ता तया । प्रपञ्चे विश्वस्मिन्नस्मिन्। रमणीयतामावहतीति रमणीयार्थप्रतिपादकः शब्दः काव्यमिति लक्षितमतो नात्र विवाद आस्थेय इति रहस्योक्तिः पण्डितराजस्य ।

शान्तस्येति । शान्तो हि रसः, शमवता पुरुषेण साध्यो निष्पाद्यः प्रयोज्यः। नटे च चतुर्विधाभिनयप्रदर्शयितरि पुरुषे तस्य शमस्य रागाभावस्य असम्भवात् सम्भावयितुमपि अशक्यात् । नाट्ये रूपके अष्टावेव न न्यूना नातिरिक्ताः रसा वर्त्तन्ते । तत्र नाट्ये दशसु रूपकेषु शान्तो न युज्यते प्रयोगेणाभिनीय प्रदर्शयितुं न शक्यते इति भावः ।

तच्चेति । तदुक्तमपरे न क्षमन्ते सहन्ते । तथाहीत्यादिना सहनाभावं दर्शयति । असङ्गतो युक्तिशून्यः सत्प्रतिपक्षो हेतुरित्यर्थः । नटस्तु पात्रं दुग्धादेरिवास्वादाभावस्तत्र । सामाजिका रसिका इति सिद्धान्तः। तेषां शमयुक्तत्वेन तेषु शान्तरसस्योद्बोधे बाधकं नास्तीति ।

नन्वेवं नटस्य पात्रतया शमवत्ता निवार्यते तर्हि कथं तेन शमोऽभिनेयः स्यादित्यत्राह– तस्येति–प्रतिबन्द्या समाधत्ते । यदि नटे शमाभावात् शमाभिनयप्रदर्शनमनुपन्नं तर्हि भयक्रोधादीनामपि अभावेन तेषामपि अभिनयः कथं कर्तुं शक्यः।

अथेति पक्षान्तरमुद्भावयति । अस्तु नटेन अभिनेतुं शक्यः, परं नाट्ये सर्वविधरागद्वेषकृतिशून्यस्य शान्तस्य विरोधिनां रागादिविषयसंवलितानां गीतवाद्यानां सत्वात् सद्भावात् सामाजिकेष्वपि कथं तस्यानुभवाख्यः उद्रेकः इति चेदुच्यते । करुणबीभत्सादिष्विव फलबलेन फलानुरोधात् विरोधस्य विरोधितायाःअकल्पनात् कल्पनानर्हत्वात् शान्तोद्रेकः सम्भाव्यत एव ।

विषयेति । सामान्यतः अवच्छेदकावच्छेदन विषयचिन्तामात्रं निषिद्ध्यते विरोधित्वात्तर्हि शान्तालम्बनविभावः संसारानित्यत्वम् । तदुद्दीपनविभावाः पुराणश्रवणादयोऽपि विषया एव तेषामपि विरोधः स्यात् ।

अत एवेति । अत एव एतदुक्ताभिप्रायेणैव । तदचारु नाट्येऽष्टावेव रसा इति केषाञ्चित् कथनमसुन्दरम् । यतो हेतोः नटः पात्रं वर्त्तते अतः कञ्चिदपि रसं स न स्वदते तस्य रस्वास्वादो नास्तीत्यर्थः । अभ्युपगम्य ब्रूते–यैरपीति । बाधकस्याभावादिति एको हेतुः । अखिलविद्वदनुभवसिद्धत्वं च द्वितीयो हेतुः काव्ये रसपरिग्रहविषये । अतः शान्तोऽपि नवमो रसोऽवश्यं स्वीकरणीयः । स्वोक्तौ मम्मटाचार्यान् प्रमाणयति –उपसमहार्षुरिति ।

ननु स्थायिभावावच्छिन्ना चिदेव रसः स्मृतः इत्युक्तेः रसेभ्यः स्थायिभावानां को

भेद इत्याकाङ्क्षायामाह– रसेभ्य इति । अयं भावः यथा विशालो वृक्षः, तत्र कपेः संयोगः सर्वावयवेषु भवितुं नार्हति । यत्र मूलावच्छेदेन संयोगस्तत्र मूलमवच्छेदकं संयोगस्य । तथैव व्यापकं चैतन्यम् । तादृशं चैतन्यमविद्याऽऽवरीतुं न हि शक्नोति किन्तु केनाप्यवच्छिन्नं चैतन्यं साऽऽवृणेति प्रकृते रत्याद्यवच्छिन्नं चैतन्यमविद्याऽऽवृणोति । तदावरणभङ्गार्थं व्यञ्जना, अन्तःकरणपरिणामो वृत्तिर्वा भोगो वा तत्तन्मतेषु वर्तते । परमत्र घटावच्छिन्नाकाशाद् घटादेरिवेति दृष्टान्तस्य कोऽत्रोपयोग इति विचारणीयम् । घटावच्छिन्नाकाशाद् यो हि घटादेः भेदः स एव भेदो रसेभ्यः स्थायिभावानामिति प्रथमद्वितीयमतयोर भिनवगुप्तभट्टनायकसिद्धान्तयोरस्ति । तृतीये नव्यास्तु मते । रसस्तु सत्यरजतसदृशः। अनिर्वचनीयः सक्षिभास्यो रत्यादिरित्युक्तेः स्थायिभावोऽसत्यरजतस्थानीयः । चतुर्थे परे तु मते विषयस्य ज्ञानादिव स्थायिभावस्य रसाद्भेदः । नष्टो घटो ज्ञाने हेतुर्नहि भवति । यो हि विद्यमानः स हेतुः, स एव विषयोऽपीति रीत्या विषयविधया स्थायिभावः कारणमिति परमार्थः ।

स्थायित्वस्य व्याख्यामाह–तत्रेति । अमीषां श्लोके निर्दिष्टानां रत्यादीनां भावनां चित्तवृत्तीनां प्रबन्धं यावत् स्थिरत्वात् स्थायित्वम् । शङ्कते–न चेति । योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वनियमात् चित्तवृत्तिरूपाणां तेषां स्थिरत्वं दुर्लभं दुष्प्रापम् । वासनारूपतया संस्कारेण तु व्यभिचारिष्वपि स्थिरत्वमतिव्याप्तम् । उत्तरति–मुहुर्मुहुरिति । पुनः पुनरभिव्यक्तिरेव स्थायीभवनयोग्यतां प्रकाशयति । विद्युद्द्योतप्रायत्वं च कादाचित्कत्वमत एव व्यभिचारित्वं च प्रकटयति ।

यदाहुरिति वृद्धसम्मतिं प्रदर्शयति–विरुद्धैरिति । विरुद्धैः विजातीयैः। अविरुद्धैः सजातीयैः । भावैर्यो न विच्छिद्यते परिहृतो नहि भवति । परिहरणं तु दूरापेतं परमन्यान् भावान् आत्मभावं स्वस्वरूपतामाशु तत्क्षणमेव नयति स भावः स्थायी । दृष्टान्तोऽत्र लवणाकरः लवणोत्पत्तिखनिः । स यथा स्वात्मनि गतं सर्वविधं वस्तुजातं लवणमेव सम्पादयति तथायमपि । ततोऽयं भावः स्थायीति निर्दिष्टः ।

चिरमिति । ये भावाः चिरं चिरकालं चित्ते अन्तःकरणेऽवतिष्ठन्ते प्रतिष्ठिता भवन्ति, तथा अनुबन्धिभिः कारणता प्राप्तैः विभावादिभिः सम्बन्ध्यन्ते संयुज्यन्ते । अत एव रसत्वं

प्रपद्यन्ते रसावस्थां प्राप्नुवन्ति । अत्र साहित्यशास्त्रे ते भावाः स्थायिनः प्रसिद्धाः। रसावस्थः परं भावः स्थायितां प्रतिपद्यते इत्युक्तेः ।

सजातीयेति । इतरभावस्यात्मभावोपनायकत्वे सति सजातीयविजातीय भावना–भिभाव्यत्वे सति यावद्रसं वर्त्तमानत्वम् स्थायित्वम् ।

केचिदाचार्याः रत्यादीनामन्यतमत्वं स्थायिनो लक्षणमाहुः । तल्लक्षणं नेति । उद्बुद्धमात्रः न तु पुष्टः स्थायी अपि व्यभिचारी भवति । 'उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते' इत्युक्तेः। यथा–

विच्छिन्नबाहुं पतितं पुरस्तादागत्य भूरिश्रवसं समीक्ष्य ।

प्रेम्णा समालिङ्गितबाहुखण्डं विमुक्तकण्ठं विललाप बाला । इत्यत्र करुणे रतिः व्यभिचारिभावः । रत्याद्यन्यतमत्वं तु अत्रापि वर्त्तते । इत्यतिव्याप्तिर्लक्षणस्येति मत्वा ब्रूते रत्यादीनां मध्ये एकस्य भावस्य शोकादेः प्ररूढत्वे पुष्टत्वे अन्यस्य रत्यादेरप्ररूढत्वे व्यभिचारित्वस्योपगमात् स्वीकारात् । बहु विभावादिजन्यत्वं प्ररूढत्वं पुष्टत्वम् । अल्पं विभावादिजन्यत्वम्, अस्फुटं विभावादिजन्यत्वमप्ररूढत्वमपुष्टत्वम् । बहुत्वाल्पत्वे जनतक्रिया विशेषणे ।

बह्वल्पविभावजन्यत्वेन स्थायित्वव्यभिचारित्वे भवतः इत्यत्र वृद्धमतं समुपस्थापयति। रत्यादय इति । स्पष्टम् । भूयिष्ठं भूयः यथा स्यात्तथा ।

यदेति । यदा तु प्रधानस्य स्थायिभावस्य परिपोषार्थं सोऽपि अप्रधानोऽपि भावः बहुविभावजः क्रियते तदा तु रसवदलङ्कारः। यथा–

अयं स रसनोत्कर्षी पीनस्तनविमर्दनः । नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनःकरः । इत्यत्र करुणस्थायिनः शोकस्य परिपोषार्थं स्वीकृतो रतिभावः भुजखण्डावलोकनोद्दीपितः रोदनाद्यनुभावितोऽपि न स्थायी । किन्तु रसवदलङ्कारः ।

तत्र भावानां मध्ये । रत्यादीनां स्वरूपमाह – स्त्रीपुंसयोरिति । अन्योन्यालम्बन इत्यव्याप्तं पूर्वरागे, तस्मादिदं लक्षणं बोध्यम् । इष्टवस्तुसमीहाजनिता मनोवृत्तिरपूर्णा रतिः। सा च क्वचिद्दर्शनेन, कुत्रचिच्छ्रवणेन, कुत्रचित्स्मरणेन वा । सैव पूर्णा रसः ! इति बोध्यम् । रतिरपेक्षात्मकं ज्ञानम् । रतिरिच्छेति द्विधा मतम् ।

वैल्कव्यस्येति। वैल्कव्यस्य कर्त्तव्याकर्त्तव्यज्ञानाभावस्य व्याकुलत्वस्य। प्राधान्यादिति शेषः। वधादीत्यत्र आदिपदादवज्ञादेर्ग्रहणम् । अयं क्रोधः। औन्नत्याख्यः औद्धत्याख्यः उत्साहः।

वागिति । वाचः, अङ्गस्य । आदिपदात् वेषादेः परिग्रहः । विकारः वैसादृश्यं भेद इति यावत् । वाचोऽङ्गादेश्च विकारो यद्यपि भयक्रोधशोकादिष्वपि भवति तथापि भये गोपनप्रयत्नसद्भावः, क्रोधे प्रज्वलनम्, शोके वैल्कव्यम् दुःखमिति हासादन्यत्वं तेषाम् । हासः सुखं तत्र तु कुतूहलतया विकासो मनसो भवति इति बोध्यम् ।

भयेऽपि वैल्कव्यं, शोकेऽपि तत्; इत्यतो व्यावृत्तिं दर्शयति – परमानर्थविषये प्रवृत्तिरिति। उभयत्रापि सा चेत्तर्हि कारणभेदात् कार्यभेदोऽवसेयः ।

कदर्येति। कदर्यं कुत्सितम्। विलोकनमुपलक्षणं घ्राणनस्पर्शनस्मरण श्रवणादीनामिति बोध्यम् ।

आलम्बनतयेति । यमालम्ब्यैव रतिरुत्पद्यते स आलम्बनविभावः । कदाचित् चन्द्रचन्द्रिकाद्यालम्ब्यापि रतेरुदयदर्शनादित्युद्दीपनव्यावृत्त्यर्थमेवकारो बोध्यः। यत्र विशेष्यतासम्बन्धेन रतिर्वर्त्तते तत्र तादात्म्येनालम्बनविभावः कारणम् । यत्र प्रकृष्टरतिजनकज्ञानविषयत्वसम्बन्धेन प्रकृष्टा रतिर्वर्त्तते तत्र तादात्म्येनोद्दीपनविभावः कारणम्। एवञ्च विशेष्यताप्रकृष्टरतिजनकज्ञानविषयतान्यतरसम्बन्धावच्छिन्ना या रतिनिष्ठा कार्यता, तादृशकार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्ना कारणता, तादृशकारणतावत्त्वं विभावत्वमिति विभावसामान्यलक्षणम् ।

यानि चेति । कार्यतया प्रसिद्धानि तानि अनुभावशब्देन व्यपदिश्यन्ते । अनु पश्चाद् भाव उत्पत्तिरिति व्युत्पत्तिः । अथवा अनुभावयन्ति अनुभवगोचरतां नयन्ति रतिं ये ते अनुभावा इति वा व्युत्पत्तिः ।

नन्वेवं पश्चादुत्पत्तिशालित्वमनुभावत्वं रत्यादिष्वतिप्रसक्तम्, यतो नायिकादेर्दर्शनाद्युत्तर–कालं यथा कटाक्षादेर्निष्पत्तिस्तथैव रत्यादेरपि; रसानुभवजनकत्वमनुभावत्वं च विभावेष्वतिव्याप्तमिति चेन्न । रत्यादिस्थायिभावेभ्यः पश्चादित्यर्थकरणात्पूर्वलक्षणति–प्रसक्तिर्गता । एवञ्च अवच्छेदकतासमवायान्यतरसम्बन्धावच्छिन्ना या स्थायिभावनिष्ठा कारणता तादृशकारणतानिरूपिता या समवायसम्बन्धावच्छिन्ना कार्यता

तादृशकार्यत्वमनुभावत्वम् । द्वितीयलक्षणेऽतिव्यातिवारणाय करणत्वेनेति निवेशनीयम् । ननु करणं च व्यापारवदसाधारणं कारणं भवति, कटाक्षरसज्ञानयोर्मध्ये रतिज्ञानं व्यापारः। कटाक्षज्ञानजन्यत्वे सति कटाक्षज्ञानजन्यं रसज्ञानमपि सम्पादयति रतिज्ञानम् । एवमपि विभावादिषु सैव स्थितिरतिप्रसक्तिरिति चेन्न, करणत्वमत्र फलायोगव्यवच्छेदसम्बन्धित्वम् फलेन सह यः अयोगव्यवच्छेदरूपो नियतः सम्बन्धः तच्छालित्वमित्यर्थः। अर्थात् येन करणेन फलमवश्यंभावि तादृशं करणत्वं नास्ति विभावेषु इत्यतिव्याप्तिर्नास्ति । तच्चानुभावेष्वेव ।

ननु अङ्कुरितमपि बीजं यावन्नोद्दीप्यते तावदनङ्कुरितप्रायं, कटाक्षादिभिश्च रसीभवतां स्थायिभावानामङ्कुरणमेव सम्पाद्यते न तु रसरूपं फलम्, रसीभावयोग्यत्वप्रत्यायनं नामोद्दीपनमेव ततश्च कटाक्षादीनामुद्दीपनविभावत्वमेवायातमिति चेदनुमन्यते । कटाक्षादीनां द्विधा स्थितिः। रतिगतप्रकर्षजनकज्ञानविषयत्वसम्बन्धेनोद्दीपनविभावत्वं, रतिकरणत्वेनानु–भावत्वं तेषाम् ।

स चानुभावश्चतुर्विधः कायिकवाचिकाहार्यिकसात्त्विकभेदात् । कायिकाः भुजक्षेपादयः। मानसाः प्रमोदादयः । आहार्यिका नाट्ये चतुर्भुजत्वज्ञानादयः । सात्विका रोमाञ्चादयोऽष्टौ।

ननु स्थायिभावोद्बोधनार्थं विभावस्य, तत्पोषणार्थं च व्यभिचारिणाः परमनुभावस्य कीदृशी अपेक्षेति । चेत् । स्थायिनां रसीभावयोग्यताप्रत्यायनरूपामपेक्षां गृहाण ।आन्तरो हि भावः स्थायी, तस्य रसीभावयोग्यतायाः प्रत्यायकेन विना कथं प्रत्यय इति प्रत्ययार्थमनुभावस्यापेक्षेति । सर्वं समञ्जसम् ।

अनुभावानां प्रसङ्गात् सात्विकानामपि निर्वचनादिकं लिख्यते । पण्डितराजेनाऽत्र विषये नेङ्गितमपि । ननु स्तम्भाद्यष्टसात्त्विकानां कुतो नानुभावत्वं कुत भावत्वञ्चेति प्रश्ने पृथग्भावा भवन्त्वन्येऽनुभावत्वेऽपि सात्विकाः ।

सत्त्वादेव समुत्पत्तेस्तथा तद्भावभावनादिति । उत्तरम् । अयं भावः। स्तम्भाद्यष्टौ सात्विका यद्यपि अनुभावा एव तथापि सत्वात्समुत्पत्तेरेव समुत्पन्नत्वादेव, तेभ्यः पृथग्भवन्ति, तथा तद्भावस्य भावकचेतसो भावनात् वासनात् भावा अपि । नन्वेवं सत्वात्समुत्पत्तेरेव, अर्थात् रजस्तमोभ्यामस्पृष्टं मनः सत्वमिहोच्यते, परगतहर्षदुःखादिभावनायामत्य–

न्तानुकूलान्तःकरणं सत्वमित्युक्तेश्च सत्त्वं नाम मनः अन्तःकरणं ततः उत्पन्नत्वात्, तथा भावकचेतसो भावनात्, सकलेषु रसेषु सञ्चारणाच्च चित्तवृत्तिविशेषा व्यभिचारिण एवैते सात्विका न त्वनुभावभेदाः इति चेदुच्यते । सत्त्वमत्र जीवच्छरीरं तत आगताः शरीरधर्मा इत्यर्थः। एवं च शरीरधर्मत्वे सति भावत्वं सात्विकभावत्वम् । व्यभिचारिणां तु आन्तरधर्मतया वारणं जातम् । अतएव अनुभावेभ्यः पृथक्त्वं च तेषां केवलं शरीरधर्मत्वादिति बोध्यम्।

**तत्र–स्तम्भः १ स्वेदो २ ऽथ रोमाञ्चः ३ स्वरभङ्गो४ ऽथ वेपथुः ५ ।**
**वैवर्ण्य ६ मश्रु ७ प्रलय ८ इत्यष्टौ सात्विका मताः॥**

शरीरधर्मत्वे सति गतिनिरोधः स्तम्भः १ । यद्यपि सामान्यतो गतिनिरोधो निद्रायामपस्मारे च तथापि तौ मनोधर्मौ न शरीरधर्मौ इति नातिव्याप्तिः। प्रलयभावे अन्तश्चेष्टायाः सत्त्वम्। अत्र गतिसामान्यनिरोधः। अस्य विभावाः कारणानि हर्षरागभयदुःखविषादविस्मयक्रोधाः। वपुषि सलिलोद्गमः स्वेदः २ । अस्य विभावाः कारणानि । मनस्तापहर्षलज्जाक्रोधभयश्रम–पीडाऽऽघातमूर्च्छाः। केनापि विकारेण जायमानं रोमोत्थानं रोमाञ्चः ३ । केवलशोकजन्यमानरोमोत्थानव्यावृत्तये विकारेणेत्युक्तम् अस्य विभावाः आलिङ्गनहर्षभयक्रोधाः। गद्गदत्वप्रयोजकं स्वरवैलक्षण्यं स्वरभङ्गः ४ । अनुकरणस्थलेऽपि स्वरवैलक्षण्यं तदतिप्रसक्तिनिवृत्तिहेतोः गद्गगदत्वप्रयोजकमिति विशेषणमुपात्तम् । अस्य विभावाः क्रोधभयहर्षमदाः। भावत्वे सति शरीरतदवयवस्पन्दो वेपथुः ५ । भावत्वं नाम रसानुकूलत्वं तथा च शकुनादिसूचकनेत्रादिस्पन्दे रसानुकूलत्वरूपभावत्वाभावान्नातिप्रसक्तिः स्पन्दे तदवयवविशेषणान्मधुरस्मितादौ नाव्याप्तिः। अस्य विभावाः आलिङ्गनहर्षभीत्यादयः। भावत्वे सति विकारप्रभवप्रकृतवर्णान्यथाभावो वैवर्ण्यम् ६ । जराद्यवस्थाभिः शीतातपादिभिश्च जायमानवर्णान्यथात्वेऽतिव्याप्तिवारणाय सत्यन्तपदोपादानम् । अस्य विभावाः मोहभयक्रोधादयः। मनोविकारजनितमक्षिसलिलमश्रु ७ । धूमशीतादिजनिताश्रुव्यावृत्तये मनोविकारेति विशेषणम् । अस्य विभावाः– दर्पामर्ष भयशोकादयः। चेष्टाबाह्यज्ञानयोर्निरोधः प्रलयः ८ । अस्य विभावाः रागौत्क्यव्यादयः। जृम्भायां भावत्वं नास्ति शुद्धः शरीरधर्म एव सा । अङ्गमोटनं नेत्रव्यापारणमपि तथैव अत एते सर्वेऽपि अनुभावा एव ।

यानि सहेति । सहचरन्ति मुख्यकारणेन सह कार्यं सम्पादयन्ति इत्यर्थः। ते च

निर्वेदादयः। तत्र निर्वेदस्य द्वयी गतिः स स्थायी अपि व्यभिचारी च। रसपर्यन्तस्थायित्वेतस्ततो रसेषु सञ्चारित्वरूपोपाधिभेदमादाय तथेतिबोध्यम् ।

पण्डितराजेन शृङ्गारकरुणशान्तरौद्राणां चतुर्णामेव रसानां विभावानुभावसञ्चारिणो निर्दिष्टा अन्येषां हास्यवीरभयानकबीभत्साद्भुतानां पञ्चानां रसानां ते नोक्ताः । तत्र शृङ्गारे– रहः स्थानादय इत्यत्र आदिपदात् प्रियजनाः नायिकानायकयोः सखायः सख्यश्च । गान्धर्वं गानं, काव्यसेवनादयः उद्दीपनविभावा बोध्याः ।

करुणे–बन्धुनाशादय इत्यत्रादिपदात् शाप, क्लेश, बन्धन, व्यसन, बन्धुदारिद्र्यादयो विभावाः अन्येऽपि बोध्याः । हास्ये स्थायीभावः हासः। विभावाः

**विपरीताऽलङ्कारैर्विकृताचाराभिधानवेशैश्च ।**
**विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो हास्यः ॥**

अनुभावाः अङ्गवैकृतादयश्च विकृतवाक्यानि च । अक्षि–सङ्कोच–वदन–स्मेरतादयः। वीरे उत्साहः स्थायी भावः । विभावाः– आलम्बनानि विजेतव्यः, उत्साहाध्यवसायः अविषादित्वम्, विस्मयाभावः, मोहहेतुः क्रोधः, विजयेच्छा, बलसम्पत्तिप्रभृतयः विजेतव्यादिचेष्टाद्याः । तत्रोद्दीपनविभावा ज्ञायमाना एव गमकाः । ते च स्वनिष्ठाः परनिष्ठा वा । अनुभावाश्चात्र स्वनिष्ठा एव । सहायान्वेषणादयः । शूरताया धीरतायाः प्रकाशकाश्चेष्टावाक्यादयः, पराक्रमः प्रदर्शनम्, प्रभावोल्लेखः चाञ्चल्याभावः अश्रुपातादयो बोध्याः । धर्म–युद्ध–दान–दयोपाधिभेदेन भिन्नस्य वीरस्य अनुभावा अपि भिन्नाः तदनुसारिणो बोध्याः। सञ्चारिणः–धृति–मति–गर्व–स्मृति–तर्क–रोमाञ्चाः । भयानके – भयं स्थायी भावः। विभावाश्च–विकृतरवयुक्तसत्त्वदर्शनम्, सङ्ग्रामः, अरण्यम्, शून्यस्थानगमनम्, गुरुनृपाद्यपराधः, धाटी, बन्धुबन्धनश्रवणम्, श्मशानदर्शनादिश्च तत्रत्याकारगतघोरता च । अनुभावाश्च–करचरणनेत्रमस्तकादिसर्वाङ्गानां कम्पनम्, ओष्ठकष्ठतालूनां शुष्कतादिः, रोमाञ्च, वदनवैवर्ण्यम्, प्रलयः, स्वेदः, दिक्प्रेक्षणम्, स्वरभेदादयश्च ।

बीभत्से–जुगुप्सा स्थायी भावः। विभावाश्च–अनभिमतदर्शनश्रवणादिः, दुष्टगन्धरसस्पर्शाः, मांसरुधिरमेदः प्रभृतयः । मांसादिषु कृमिपातादयश्चोद्दीपनविभावाः । उद्वेजकपदार्थाश्च । अनुभावाश्च – मुखनासिकयोः विघूर्णनम् आच्छादनं च । अत्यन्तं

करपादयोः पातनम् । सर्वाङ्गसङ्कोचः निष्ठीवनादिश्च । व्यभिचारिणः–मोहोऽपस्मार, आवेगो व्याधिः।

अद्भुते विस्मयः स्थायी भावः । विभावाः लोकोत्तरं वाक्यं, तस्य लोकोत्तरोऽर्थः, लोकोत्तरं शिल्पं, कर्म, रूपम्, माया, इन्द्रजालम्, विलक्षणवस्तुलाभाश्च आलम्बनविभावः। तेषां गुणानां महिमा उद्दीपनविभावः । अनुभावाः –स्वरभेदः, वेपथुः, गद्गदवचनम्, रोमाञ्चः, नयनस्फारः हाहाकारः, साधुवादः निर्निमेषप्रेक्षणम् । व्यभिचारिणाः – वितर्कः, आवेगः, भ्रान्तिः, स्मयः, हर्षाद्याः ।

सर्वेषां रसानामालम्बनोद्दीपनविषये सूत्रमेकं निर्दिशति –एवं यस्या इति । यस्याः चित्तवृत्तेः मनोधर्मस्य यो विषयः यो हेतुः स तस्याः चित्तवृत्तेरालम्बनम् । तस्याः चित्तवृत्तेर्निमित्तानि कारणानि चोद्दीपनानीति बोध्यम् ।

शृङ्गारस्य विभागकारणमुपन्यस्यन् विभागं दर्शयति–तत्र रसेषु । शृङ्गारो द्विविधः संयोगो वियोगश्च। अत्र वियोग इत्येव पाठः। न तु विप्रलम्भ इति पाठः। वियोगकालावच्छिन्नेति, एवं वियोगो न वैयधिकरण्यमिति, संयोगवियोगाख्यौ वृत्तिविशेषाविति, वियुक्तश्चास्मीति सर्वत्रापि वियोगशब्दस्यैव प्रयोगदर्शनात् । बहुवारमुल्लेखानुरोधो न्याय्यः । अथ चात्र संयोगवियोगौ नैयायिकाभिमतौ गुणौ न, किन्तु तौ अन्तःकरणवृत्तिविशेषौ । रतिस्थायिकत्वे सति अहं संयुक्तः संयोगभागस्मीति अनुभवसाक्षिकः, रतिस्थायिकत्वे सति वियुक्तः वियोगभागस्मीति अनुभवसाक्षिकः चित्तवृत्तिविशेषः । तथा च विप्रलम्भ इति पाठस्वीकारे रतिस्थायिकत्वे सति विप्रलब्धास्मीति विप्रलम्भभागिन्यस्मीति नायिकायामेव विप्रलम्भाख्यो शृङ्गारभेदोऽनुगतः स्यात् । तस्या भेदेष्वेव विप्रलब्धायाः "विप्रलब्धोक्तसमयमप्राप्तेऽवमानिते" तिरूपेण परिगणितत्वात् । नायकभेदेषु विप्रलब्धनामकस्य नायकस्यापरिगणनाच्च । एवञ्च यत्र क्वापि शृङ्गारस्य द्वितीयभेदार्थकतया विप्रलम्भशब्दप्रयोगः स दृष्टः । विपलम्भ इति नाम सञ्ज्ञा चेत्तदा न दोषः । अक्षिभ्यामन्धोऽपि नयनसुख इतिवत् नाम्नां निर्वचनं नास्ति ।

रतेः संयोगकालावच्छिन्नत्वे संयोगकालविशिष्टा रतिरित्येवमन्यत्र । संयोगवियोगशब्दयोः नैयायिकाभिमतार्थसन्देहं निराकुरुते–संयोगश्चेति । संयोगोऽत्र दम्पत्योः

स्त्रीपुंसयोः सामानाधिकरण्यं, बहिरिन्द्रियसम्बन्धो न, एकतल्पशयनेऽपीर्ष्यादिसद्भावे मानविप्रलम्भेतिव्याप्तेः एकतल्पशयनकारितया बहिरिन्द्रियसम्बन्धस्य विद्यमानत्वात् । श्वशुरादिसन्निधौ बहिरिन्द्रियसम्बन्धाभावेऽपि संयुक्तावावामिति चित्तवृत्तिविशेषशालिनोः सम्भोगे चाव्याप्तेर्वियोगो न वैयधिकरण्यं न बहिरिन्द्रियसम्बन्धाभावः ।

वाचो माङ्गलिकी इति । प्रवासो भिन्नदेशत्वमिति लक्षणकस्य वियोगस्योदाहरणमिदम् । प्रवत्स्यत्पतिका नायिकात्र वर्त्तते । पत्युः प्रयाणसमयो न तु स गतः परदेशं, प्रस्थानवेलायां जने गृहजने माङ्गलिकी मङ्गलजनिका वाचो वचनानि, अनल्पं प्रभूतं जल्पति उच्चारयति सति केलिमन्दिरस्य क्रीडागृहस्य मारुतायनमुखे वातायनैकदेशे विन्यस्तं स्थापितं वक्त्राम्बुजम् कमलसदृशं मुखं यया सा । निःश्वासैः भाविविरहजनितदुःखेन श्वासवायुभिः ग्लपितोऽधरोष्ठो यस्याः सा । उपरिष्टात् पतन्तो ये बाष्पास्तैः आर्द्रौ वक्षसि रुहौ उरसि जातौ यस्याः सा । लोले चञ्चले विलोचने नेत्रे यस्याः सा बाला शिव ! शिव! प्राणेशं जीवितेश्वरमालोकते पश्यति । देशान्तरगमनं न स्वरूपसद्दुःखजनकमपि तु देशान्तरगमनज्ञानमेव ।

आविर्भूतेति । अभिलाषाख्यस्य वियोगस्योदाहरणम् । यदवधि यद्दिनादारभ्य नन्दसूनोः श्रीकृष्णस्य निखिलानां जननयनानामाकर्षणे वशीकरणे स्वीयत्वकरणे कार्मणज्ञा यन्त्र–तन्त्र–मन्त्राभिज्ञा, मधुस्यन्दिनी माध्वीकवर्षिणी काचित् विलक्षणा कान्तिः शरीरशोभा आविर्भूता गोचरीकृता । तदवधि तद्दिनादारभ्य कुलमृगदृशां कुलवधूनामपि किमुत अन्याङ्गनानां मुखे दीर्घः अधिकप्रवाहशाली श्वासः । गण्डयोर्युग्मे कपोलयोः पाण्डिमा पाण्डुभावः । चेतसि शून्या वृत्तिः निरुद्देश्यो व्यापारः प्रादुरासीत् ।

अत्रालम्बनस्य श्रीकृष्णस्य, तादृशकान्तिविलोकन–दीर्घश्वास–गण्डपाण्डुत्वादेरनुभावस्य तद्व्यङ्ग्यहर्षौत्सुक्यचिन्तादेश्च व्यभिचारिणः संयोगादभिव्यज्यमाना रतिर्वियोगकालावच्छिन्नत्वाद्विप्रलम्भरसव्यपदेशहेतुः।

नयनेति । या नववधूः नयनयोरञ्चलानां पक्ष्मणामवमर्शं स्पर्शमपि पुरा कदाचिन्न सेहे न सोढवती । सैव इदानीं गन्तुकेन प्रयास्यता दयितेन वल्लभेन आलिङ्गिताऽपि जोषं तूष्णीं तस्थौ निषेधं वा विधिं वा कर्त्तुं न पारयामास ।

अत्र नववधूरालम्बनम्, प्रयास्यन् पतिर्वालम्बनम् । एकत्र जोषावस्थानमनुभावः।

अपरत्र आलिङ्गनमनुभावः । एकत्र विधिनिषेधकरणापारणं नाम जडता व्यभिचारी भावः। तेषां संयोगादभिव्यज्यमाना रतिर्वियोगकालावच्छिन्नत्वाद्विप्रलम्भरसव्यपदेश हेतुः । इमं विप्रलम्भं प्राञ्चः काव्यप्रकाशकारादयः ।

अपहायेति । सकलानां बान्धवानां का दशा भविष्यतीति चिन्ता विचारमपहाय परित्यज्य, गुरूणां कुले समुदाये अथवा गुरूणां कुलस्य पितृमातृप्रभृतीनां स्वस्मिन् यः प्रणयः प्रमा तमुद्वास्य परिक्षिप्य । हे विनयशालिन् ! तनय ! पुत्र ! कथमिव परलोकस्य पथिकः स्वर्गलोकस्य पान्थोऽभूः । अत्र शोकः स्थायी करुणो रसः । विभावादयस्तूत्का एव ।

मलयानिलेति । कालकूटो विषम् । भोगिनः सर्पस्य भोगः फणा । तत्र श्वपचश्चाण्डालः। आत्मभूः ब्रह्मा । ‘‘ब्रह्मात्मभूः सुरज्येष्ठः’’ इत्यमरः। निरन्तरा भेदशून्या । अन्तरं भेदः। ‘‘अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये’’ इत्यमरः। परमात्मनि स्थितिः, वृत्तिः। अत्र निर्वेदस्तत्वज्ञानाज्जातः स्थायी भावः। शान्तो रसः।

प्रथमार्धे पूर्वार्धे मलयानिलः कालकूटः, रमणीकेशपाशः सर्पफणा इति उत्तमाधमयोर्विन्यासः। द्वितीयार्धे उत्तरार्धे चाण्डालः, ब्रह्म चेति अधमोत्तमयोः वचनं न दोषः । वक्तुर्ब्रह्मात्मकतया उत्तमाधमप्रतीतिवैकल्यादिति । इदं वक्ष्यमाणं पद्यं शान्ते नोदाहार्यम्।

सुरस्रोतस्विन्या इति । सुराणां देवानां स्रोतस्विनी प्रवाहिणी गङ्गा तस्याः पुलिनम्। तोयोत्थितं तत्पुलिनमित्यमरः। अधितिष्ठन् आश्रितः । ‘‘पुलिनमधितिष्ठन्’’ अत्र अधिशीङ्स्थासां कर्मेति कर्म । नयनयोः नेत्रयोः मुद्रां वृत्तिमन्तः अन्तर्मुखीं विधायास्थाय । अथ समाधिविधानानन्तरं सपदि झटिति विषयान् विषिन्वन्ति बध्नन्ति ये तान् विद्राव्य दूरीकृत्य। विषयविद्रावणफलमाह–विधूतेति । विधूतमन्तः, अन्तःकरणस्य ध्वान्तमज्ञानं यस्य एवंभूतोऽहं मधुरादपि मधुरायाम् अत्यन्तं मधुरायां नवः नूतनः नभस्यस्य भाद्रपदमासस्य । ‘‘स्युर्नभस्यप्रौष्ठपदभाद्रभाद्रपदा समाः’’ इत्यमरः । अम्बुदो जलधरः । तस्य रुगिव रुग् यस्याः । तस्यां कस्याञ्चन चमत्कारिण्यां चिति परमेश्वरे कदा निमग्नः स्याम् ।

ननु अत्रापि निर्वेदस्य व्यक्ततया शान्तरसत्वं कुतो नेत्याह –‘‘अत्रापि अद्यापि’’ इति। कथं तर्हि मलयानिलेति पद्येऽपि परमात्मविषयककविरतौ निर्वेदस्य गुणीभूततया

शान्तरसध्वनिव्यपदेशहेतुत्वमित्याह–इदञ्चेति । अयं गुम्फः रचना । स्विन्याः, तिष्ठन्, तर्मुद्रा, विद्राव्य, तर्ध्वा, इत्यादिरूपः ओजस्वी दीप्तिशाली । इति हेतोरेतत्पद्यमुदाहरणं भवितुं नार्हम् । ननु मलयानिलसमन्धिन्याशङ्का तु तदवस्थैवेत्याह–पूर्वपद्ये तु "परमात्मनि स्थितिः" इति अनेन कथने वक्तुः तेन परमात्मना सह तादूप्यस्याभेदस्यावगमात् परमात्मविषयिण्याः रतेः कविनिष्ठाया अप्रतिपत्तिरज्ञानम् ।

नवेति । नवं नवीनमत एव उच्छलितं विकसद् यौवनं तेन स्फुरन् वृद्धिं गच्छन् अखर्वो महान् गर्वज्वरो अहङ्कारोष्मा यस्य सः । तस्मिन् । अत एव मदीयगुरोर्महादेवस्य कार्मुकं धनुः गलितं साध्वसं भयं यस्मिन् ब्रश्चनकर्मणि तद् यथा स्यात्तथा वृश्चति छेदनकर्त्तरि त्वयि अयं भैरवो भीषणो मम परश्वधः परशुः निर्दयं निष्कृपं यथा स्यात्तथा पततु । निर्दयपतनहेतुत्वे परश्वधविशेषणमाह–दलितेति । दलिता विदारिताः ये दृप्तानां गर्वितानां भूभृतां राज्ञां गलाः तेभ्यः स्खलतो निर्गच्छतो रुधिरस्य धस्मरः पानकर्त्ता ।

ध्वनिविशेषः धनुष्टङ्कारः । गुरुपदेनात्र भार्गवस्य गुरुः साम्बशिवो ग्राह्यः । नामग्रहणेत्यत्र भार्गवकर्त्तृकं नामग्रहणम् । अन्यत्र गुरुद्रोहिभर्त्सनातिरिक्ते प्रणामादिस्थले । प्रकृते गुरुद्रोहिभर्त्सनस्थले क्रोधे । अजहत्स्थार्थलक्षणा उपादान लक्षणा मूलं हेतुर्यस्य तत् ध्वननम् । लक्षणामूलभूतं ध्वननं यत्र तेन अनेन मदीयेति पदेन । ममैव गुरोः योऽहं गुरोः पितुराज्ञयाऽकृत्यमपि मातुर्वधमाचरम्, अथ च गुरुशिरःकर्त्तनकार्येकक्षत्रियविषयकामर्षवशात् समस्तां महीमेकविंशतिवारं क्षत्रियशून्यामकार्षम् । एतेन गुरुविषये कियद्गौरवं यस्य मम सोहमिति गर्वस्यैवोत्कर्षः प्रकाश्यते । एकस्य क्षत्रियस्य कृते क्षत्रियजातिवधः मातुर्वधश्चेति विवेकशून्यस्यैव कार्यमिति क्रोधस्याधिक्यम् ।

धनुरिति । धनुषो विदलनं श्रीरामकृतशिवचापस्य त्रोटनं तस्माद्ध्वनेः शब्दस्य श्रवणं तत्क्षणे श्रवणसमये एव आविर्भवन्ती जायमाना महागुरोः जमदग्नेः वधस्य हत्यायाः स्मृतिः स्मरणं यस्य सः । श्वसनानां वधस्मरणजनितकोपावेशाज्जायमानानां निःश्वासानां वेगेन धूतः कम्पितोऽधरोष्ठो यस्य सः । तादृशावेशादेव विलोचनेभ्यो विनिःसरन्ती निर्गच्छन्ती बहलानां विस्फुलिङ्गानामग्निकणानां व्रजः समूहो यस्य । अत एव रघुप्रवरं रघुवंशे श्रेष्ठं भगवन्तंश्रीरमचन्द्रमाक्षिपन् भर्त्सयन् जामदग्न्यो जमदग्निपुत्रः परशुरामो मुनिर्जयति

सर्वोत्कर्षेण वर्त्तते ।

अपराधस्य आयुधविद्यागुरुरुद्रधनुर्भङ्गजन्यागसः आस्पदेन आश्रयेण । बीजभूतायां कविः पण्डितराजो यद् भार्गवप्रभावं वर्णयति तत्र बीजं निमित्तं तत्र भार्गवविषये कवेः पण्डितेन्द्रस्य रतिः । आद्यः चतुर्षु प्रथमो दानवीरः। कियदिति । अर्थयित्रे याचकाय द्विजाय ब्राह्मणाय यद् अरमणीयं परिधानवशादर्पणानर्हं कवचं, तथा तादृशे कुण्डले कर्णभूषणे च अर्पयामि ददामि । इदमर्पणं मे सूर्यनारायणांशस्य वदान्यप्रवरस्य मम कृते कियदल्पमित्यर्थः । यदि ब्राह्मणोऽयं याचेत तर्हि अकरुणं निर्दयं यथास्यात्तथा द्राक् झटिति कृपाणेन तरवारिणा अवकृत्य अवच्छेद्य अत एव निर्यान्ती निःसरन्ती बहला रुधिरस्य धारा यस्मादेवंभूतं मौलिमपि शिरोऽपि आवेदयामि अर्पयामि । अत्र अवश्यवक्तव्योऽपिरनुक्त–इत्यनभिहितवाच्यत्वं दोषः ।

मे इत्यर्थेति । अत्र मे इति पदेन गर्वः प्रकाश्यते । तत्रायं क्रमः। मे कर्णास्येत्यर्थस्यानुपयुक्ततया सर्वस्वदातृत्वे अन्यस्मिन् अर्थे सङ्क्रान्तं तत्र मूलमजहत्स्थार्था लक्षणा । लोकोत्तरस्मात् साक्षान्नारायणतया लोकश्रेष्ठात् पितुः । मौलितः प्राक् मौलिमिति श्लोकस्थमौलिपदात् प्राक् पूर्वम् । ततः परं मौलिमितिपदादुत्तरम् ।

यस्येति । अवनेः पृथिव्याः मण्डलं तस्मादागतं यत् वियद्वन्दीन्द्राणां स्वर्गीयस्तुतिपाठकानां वृन्दं समूहस्तदाननात् तन्मुखात् यस्य राज्ञः। उद्दामामुत्कटां, दिवानिशं रात्रिन्दिवमर्थिषु याचकेषु विलसन्ती व्याप्नुवानां दानप्रवाहस्य प्रथां वदान्यतायाः प्रसिद्धिमाकर्ण्य श्रुत्वा सुरेन्द्रसुरभिः कामधेनुः ईर्ष्यया सहनाभावेन । "अक्षान्तिरीर्ष्या" इत्यमरः । निर्भरं परिपूर्णं यथा स्यात्तथा फुल्लानामुद्गतानां रोम्णां निवरो यत्र एवम्भूतं तथा व्यावल्गत् । वल्ग गतौ इत्यस्मात् शतृ । समुच्छलद् दुग्धसम्भृतत्वाद्धेतोः । यत् ऊधः पयसामाशयस्ततः स्रवन्तः प्रस्नुवन्तो ये पीयूषप्रकरा अमृतनिवहास्तैः प्रावृट्पयोघायते वर्षामेघायते ।

वदनेति । वदनाद्विनिर्गतं यद्राज्ञो दानवर्णनम् । तेनोद्दीपितः । असूयादिभिरत्यादिपदात् गर्वामर्षमदाः । ईर्ष्यारोमाञ्चोधःस्रवणैर्व्यञ्जिताः ।

साब्धिद्वीपेति । अब्धयः प्रशान्तमहासागरप्रभृतयः । द्वीपाः जम्बूपूर्वा अन्तरीपाः ।

कुलाचलाः महेन्द्रो मलयः सह्य इत्यष्टौ कुलपर्वताः । तैः सहितां, सप्तान्तराणि अवकाशाः भेदाःलोका इति यावत् यस्यां सा । ''अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये'' इत्यमरः। सप्तलोकां वसुमतीं भूमिं तथा सर्वां द्यामपि सम्पूर्णं स्वर्गमपि आक्रम्य पद्भ्यो विक्षिप्य। सस्मितेन मधुरहासयुतेन हरिणा वामनावतारेण मन्दमीषत् । द्वाभ्यामेव पद्भ्यां द्यावापृथिव्योराक्रमणात् समालोकने उत्कृष्टानन्दः । तेन विदलन् समुद्गच्छन् यो रोमाञ्चः। तेन युक्तः । व्यानम्रीकृता आनतीकृता कन्धरा ग्रीवा येन सोऽसुरवरः दैत्यराजो बलिः। स चासौ क्षणः समयो यस्मिन्न्यासे तद् यथा स्यात्तथा भगवतः पुरः समक्षं मौलिं मस्तकं न्यस्तवान् स्थापितवान् ।

प्रागिति । प्राग् यस्योद्दामेति पद्यार्थे अन्यगतस्य कामगवीगतस्य तस्य उत्साहस्य राजगतस्तुतेरुत्कर्षकत्वस्येव प्रकृते साब्धिद्वीपेति पद्यार्थे राजगतस्यापि दैत्यराजनिष्ठस्यापि तस्योत्साहस्य तथात्वात् । प्रकृताप्रकृतगतत्वेनोत्साहस्याश्रयभेदेऽपि स्तुत्युत्कर्षकत्वं तुल्यमुभयत्र । श्रीवत्सलाञ्छनस्य काव्यप्रकाशटीकायाः सारबोधिनीनामाया कर्तुस्तथा साहित्यदर्पणकारस्य चोक्तं त्यागः सप्तेति पद्ये वीरो रस इति कथितमुदाहरणम्, एतेन उदाहरणप्रत्युदाहरणाभ्यां प्रदर्शितेन रसध्वनिगुणीभूतव्यङ्ग्ययोः नियतस्वरूपेण परास्तमपहस्तितम् । तस्य त्याग इत्युदाहरणस्य । गुणीभूतं व्यङ्ग्यं यत्र तस्य भावस्तत्वं तेन । रसध्वनेरुदाहरणप्रसङ्गेऽवसरे ।

द्वितीयो दयावीरः । न कपोत इति । हे कपोत ! श्येनात्समुद्भवमण्वपि भयं सूक्ष्ममपि साध्वसं भवन्तं मा स्पृशतु मा भवतु । कुत इत्याह–इदमिति । अद्य मया भवदायुषः कुशलकरम् दीर्घजीवित्वस्य सम्पादकमिदं पुरोवर्ति मदीयं कलेवरं शरीरं तृणीकृतम् श्येनरूपेण प्राप्तायाग्नये आहुतीकृतमिति भावः । अत्रायुः पदमायुःकरणे लाक्षणिकम् ।

अत्र कदाचिदिन्द्रसभायां शिवे राज्ञो दानवीरताविषये ऋषीणां देवानां च परस्परं विवादः समजनि । तत्परीक्षणार्थं द्वौ इन्द्राग्नी समागतौ । तत्रेन्द्रः कपोतवेषेण, अग्निः श्येनरूपेण प्राप्तौ । ताभ्यां कृते शिवे राज्ञः (अत्र उभावपि प्रकृतौ उभाभ्यामपि सन्तोष्टव्यमिति) उभौ प्रति इमे उक्ती स्तः ।

न कपोतेति । हे श्येन ! वाजेति नाम्नाख्यात पक्षिन् ! तव मनागपि ईषदपि स्पृहा

वाञ्छा कपोतपोतकम्, पोतोऽर्भकः। पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुरित्यमरः। मा स्पृशतु तद्विषयिणी मा भवतु । भवते समर्पितमावेदितम् । चारुतरमतीवसुन्दरम् ।

एषा श्लोकरूपा उक्तिः । पूर्वा कपोतं प्रति उत्तरा श्येनं प्रति । शङ्कते नचेति । अत्र न कपोतेति पद्ययोः शरीरदानस्य प्रत्ययात् तृणीकृतं समर्पितमित्याभ्यां पदाभ्यां शिबिकर्तृकस्य स्वशरीरसम्बन्धित्यागस्य ज्ञानात् । शिबिर्दानवीर इति ध्वन्यते इति वाच्यम् । उत्तरति–न । श्येनो भक्षकः कपोतो भक्ष्यः । एवं च तयोः तद्भावापन्नत्वेन हेतुना श्येनः शिविराजशरीरविषये अर्थी नास्तीत्यतोऽत्र पद्ययोस्तस्य शरीरदानस्याप्रतिपत्तिरज्ञानम् । ननु श्येनार्थं शिबिकर्तृकस्वशरीरदानस्यैव तृणीकृतसमर्पितपदाभ्यां प्रतीतेरिति चेन्न । तादृशनिवेदनस्य। कपोतशरीरस्य त्राणं रक्षणमेव उपाधिरभिसन्धिर्यस्य निवेदनस्य । मम शरीरं भक्ष तत्परिवर्तनेऽस्य शरीरं त्यजेत्यभिसन्धेः स्वरूपम् । तत् कपोतशरीरत्राणोपाधिकम् तस्य भावस्तत्ता तया । एवं भूतेन हेतुना तन्निवेदनं विनिमयपदवाच्यं परिवर्त्तनाभिधेयमित्यर्थः।

तृतीयो युद्धवीरः। रणे दीनानिति । हे दशवदन ! रावण ! रणे युद्धे दीनान् बलाभावादसहायान् देवान् पुरोडाशभक्षकान् विद्राव्य तेषां विद्रावणं सम्पाद्य प्रभावे स्वोत्कर्षे प्रागल्भ्यं धृष्टत्वं वहति धारयति त्वयि दीनविद्रावके, मम विराधकबन्धवालिनां नाशकस्य परिकरः युद्धस्य यत्नः। यत्नारम्भौ परिकरौ इति त्रिकाण्डशेषः। कोऽयं न कर्त्तव्य इत्यर्थः। अत्र तुः अवधारणे । तुः स्याद्भेदेऽवधारणे" इत्यमरः । तर्हि कुत्र परिकरः स्यादित्याह– ललाटेति । ललाटे भाले । उद्यन्ती उद्गच्छन्ती या ज्वाला अर्चिः। तया कवलितो भक्षितः। जगज्जालस्य विभवोऽपारैश्वर्यं येन स भवः शिवः । मे रामचन्द्रस्य परशुरामविमर्दकस्य। कोदण्डात् धनुषः च्युतानां विशिखानां बाणानां वेगं प्रवाहं कलयतु धारयतु ।

तद्गतस्य देवनिष्ठस्य कातर्यस्य दीनत्वस्य प्रकाशनं द्वारं यस्याः सा अनुद्धता अनुत्कटा एव वृत्तिरित्यन्वयः ।

चतुर्थो धर्मवीरः। हयेति । हयाननस्य हयग्रीवस्य स्मरणेन निरन्तरचिन्तनेन । उल्लङ्घितः पारङ्गमितः वाङ्मयरूपोऽम्बुधिः शास्त्ररूपोऽब्धिर्येन सोऽहं तयोः पुरः स्थितोऽस्मि ।

धमतु । ध्मा अध्माने इत्यस्य लोटि रूपम् । आध्मानं दहनं करोतु धोंकिनीति प्रसिद्धया श्वसनिकाया दहनं वर्धयतु इत्यर्थः ।

फणिषु प्रवीरः श्रेष्ठः शेषनागः । कमठः कूर्मः । तां धराम् । हे पुरुहूत ! पुरु हूयते यस्मै तत्सम्बुद्धौ । पक्षकोणे निजगरुतां प्रदेशे । अक्लमं श्रान्तिरहितं यथा स्यात्तथा । प्रकृतेऽपीति । प्रकृते सत्यपाण्डित्यक्षमाबलोपाधिके वीरेऽपि स्थायिनः उत्साहस्य प्रतीतिरपह्नोतुमशक्या अनन्तरोक्तेषु व्यवधानराहित्येन इदानीमेवोक्तेषु पद्येषु इति वक्तव्ये पद्ये इत्युक्तिर्जात्यभिप्रायेण । व्यत्यस्तचरमपादे सपदीति, अपि वक्तीति, अपि बहलेति, परिहरत्विति पद्यसमुदाये । राजाज्ञेति । यथा राजाज्ञासु शब्दमात्रस्य प्राधान्यं तथा ''सत्यपाण्डित्यादिषु नोत्साहः प्रतीयते; दयावीरादिषु प्रतीयते इत्यत्रापि केवलं शब्द्यते नत्वर्थगवेषणा इति भावः । तेन हृतचेतनत्वेन गम्यं व्यङ्ग्यं, रोमाञ्चादिवाचकशब्दाभावादित्यर्थः ।

ननु यदि भगवतो मुखं पश्यन्त्या यशोदया एवमुच्यते तदा तु वरं प्राधान्येन विस्मयस्य स्थितिः परन्तु प्रकरणादिपर्यालोचनेन सूनुवदनमवलोकितवत्या तयोच्यते ततः प्रीतेरेव प्राधान्यं विस्मयस्य गुणीभाव इति चेत् । उच्यते । पुत्रो वा परमेश्वरो वा भृत्यो वा दासी वा यः कोऽपि वा भवतु । यत्र गगनस्यापि गम्भीरिमा गलन् वर्त्तते । यद् वीक्ष्य हृतचेतनत्वं सम्पद्यते तत्र कथं न विस्मयः । किं पुत्रादौ सत्यपि प्रेम्णि विलक्षणतादर्शने विस्मयो नोदेतु, को हेतुः । नास्ति हेतुरतो रसोऽत्राद्भुत इत्येव सुस्थम् ।

एवमिति । एवं प्रकरणादिपर्यालोचने ''अयं बालो मम पुत्रः'' इति तस्या यशोदाया निश्चयेन प्रतिबन्धादवरोधात् अयं कश्चिन्महापुरुष इति तस्या यशोदायास्तत्र श्रीकृष्णे भक्तिरपि उत्पत्तुं नेष्टे न समर्था । अतः उत्पत्यभावात् तस्यामपि भक्तावपि विस्मयस्य गुणीभावो न शङ्क्यः ।

भक्तिरिति । अत्र चित्रमिति पद्ये पश्यामि देवानित्यादि वाक्यसन्दर्भे । अस्य विस्मयस्य । चेत् स्थूलतो दर्शनेन भक्तिर्नैव प्रतीयते तर्हि दरे ईषन्मुकुलिते लोचने विधाय विदांकुर्वन्तु जानन्तु । अर्थात् तत्रत्यपूर्वापरसन्दर्भं पर्यालोचयन्तु ।

रतिकाले मुखं स्त्रीणां, शुद्धमाखेटकेशुनाम् ।
धर्मकार्ये गवां पृष्ठं पवित्रमिति धार्मिकाः ॥ इति वचनात्

गवां पृष्ठमेवाङ्गं पवित्रं न तु पूर्वमङ्गम् । आत्मस्थ इति इदं तु बोध्यमस्मिन्नुद्धृतांशविषये

अस्य हास्यस्य भेदद्वयं मतम् । एको हास्य आत्मस्थः । द्वितीयः सः परसंस्थः । इत्युल्लेखः कुतो हास्यविषये एव ।

एष सिद्धान्तः स्वनिष्ठत्वपरनिष्ठत्वरूपोऽन्येष्वपि रसेषु समानः, तेषु तं कुतो न प्रत्यपीपदत् । अथ च लौकिकभावानां विषय एव आत्मस्थत्वपरस्थत्वादिगवेषणा । काव्योपात्तभावस्थले तु अलौकिकविभावनादिव्यापारवशात्तत्सर्वमपि विलीनं भवतीति । अतः साधारणीकरणं रसस्थले विज्ञाय विद्वद्भिरिदं पर्यालोचनीयमेवेति ।

आत्मस्थ इति । द्रष्टुर्दर्शकस्य विभावेक्षणमात्रतः विकृतवेषभूषाव्यवहारादि–रूपविभावदर्शनादेव उत्पन्नो हासः आत्मस्थः । यः परस्थो हास्यरसस्तज्ज्ञैः हास्यविद्भिः परिकीर्तितः, असौ हास्यः हसन्तमपरमन्यं पुरुषं द्रष्टुः । अत्र तृन् प्रत्ययः । हसत्पुरुषदर्शकस्य हृदये उत्पन्नः इति पूर्वेणान्वयः । ननु विभावेक्षणाद्भावस्योत्पत्तिः भवति । अत्र तु विभावमपश्यन्नपि हसन्तं पुरुषं केवलं दृष्ट्वा हसति इति कुतो विभाव इति चेदाह– विभाव इति । यो विभावः हसतः पुरुषस्य भवति स एव विभावः हसन्तं पुरुषं द्रष्टुरपि उपजायते भवतीत्यन्वयः । द्रष्टुर्विभावः सोपजायते इति पाठः । अन्यथा असङ्गतिर्महती स्यात्, तद्यथा – ''हसन्तमपरं दृष्ट्वा विभावश्चोपजायते'' इति पाठे, व्याकरणस्य नियमात् समानकर्तृकयोः पूर्वकाले क्त्वाभवनरूपात् । यो हि दृष्ट्वेत्यत्र दृशिधातोः कर्त्ता स एव यदि उपजायते इत्यत्र जायतेरपि स्यात्तदा क्त्वा प्रत्ययः । एवं यः हसन्तं पुरुषं पश्यति स एव (विभावश्च) विभावोऽपि उप जायते इत्यन्वयः स्यात् । ततश्चात्रास्माभिरुपदर्शितः प्रथमं, स एवान्वयो बोध्यः ।

अयं भावः । सामान्यतः परकीयविकृताचारवेषभूषादिं दृष्टा सर्वोपि हसति । उत्तमः पुरुषस्त्वन्यो यः परकीयविकृताचारवेषभूषां दृष्ट्वापि गाम्भीर्यात् कदाचिन्नापि हसति । परमपरं हसन्तं दृष्ट्वा विभावमनीक्षमाणोऽपि हसति । सर्गनिसर्ग एवेदृशः यत् परहासेक्षणे च सति तत्क्षणादेव हसति । यथा आम्लजम्बीरादिरसमास्वादयन्तमपरं पुरुषं दृष्ट्वा अन्यस्यापि दर्शकस्य मुखे तदास्वादानुरूपो दन्तोदकविकारः सञ्जायते तथा हसादयोऽपि रसाः तद्विभावकाः सङ्क्रामन्ति । अथवा एवं सङ्गतिः करणीया । (स्त्रीपुत्रादिवियोगेन) शोकाकुलं, क्रोधाविष्टम्, उत्साहसन्नद्धं, जुगुप्सासन्नं सुहृदमनुपश्यन् स्वयमपि तथाविधः

तादृशो भवति । एवं भयाकुलं विस्मयाभिभूतं दृष्ट्वा अन्योऽपि तथाविधो भवतीति सर्वेषु रसेषु परात्मस्थत्वं समम् । परमितरदेतम्, कदाचित् शोकादिविशिष्टः सुहृदेव विभावो भवति कदाचित्तस्यैव विभावः सुहृदोऽपि विभाव इति ।

नन्विति । दुःखद्वेषी सुखलुब्धः सर्वोऽपि प्राणी स्वानुकूलेन प्राणिना सह रिंसते एवं यो हि रिरंसुः स आश्रयः। यः रिरंसायामनुकूलः सः आलम्बनः । तथैव यः उपहसति स उपहासक्रियाकर्त्ता आश्रयः। यमुपहसति स आलम्बन इति क्रमः सर्वेषु रसेष्वावश्यको वर्त्तते ।

परमियं व्यवस्था शृङ्गारस्थले तु स्पष्टा भवितुं शक्या कः कां वानुरञ्जते । अथ च काव्येषु तथा तथोपनिबध्यतेऽपि कविभिः । हास्ये तु नैवम् । को हसति को वा नेत्येवमाश्रयस्य साक्षादुपनिबन्धो न दृश्यते काव्येषु । एवं चाश्रय निबन्धनाभावात्कथं साधारण्यादभेदो भवतु । ततश्च कथं रसानुभूतिः । यतो हि काव्योपनिबद्धाश्रयेण सह साधारण्यादभेदं मन्वानः सहृदयो भावकः रसमनुभवति । काव्यात् चित्राच्चालौकिकरसानुभावकाः अनन्ता इदानीन्तना सहृदयाः लौकिकस्य परिमितस्य अतीतस्य भावस्याश्रयाः भवितुं नार्हन्तीति विप्रतिपत्तिमनुपपत्तिं समाधत्ते पण्डितराजः । सत्यमिति ।

यद्यप्येवं तथापि एष आश्रयः ; आलम्बनानुरोधात् कस्येदमालम्बनमित्यन्य–थानुपपत्त्याऽऽक्षिप्यते । ततो विभावादिसाधारण्यादभेदप्रतीतौ सामाजिकादिभिः हास्यरसोऽनुभूयते । इति प्राचीनाः सहित्यदर्पणकारादयः ।

पण्डितराजस्तु । यदीहाश्रयो नाक्षिप्यते तदा स्वीयचरित रामायण श्रोतू रामस्येव स्वीयचरितमयनाटकद्रष्टुर्युधिष्टिरादेरिव सहृदयभावकानामपि स्वीयकान्तावर्णनात्मक–काव्याभिनयाभ्यां रसानुभूतिर्भविष्यतीति ।

जुगुप्सायां तु तादृशवाक्यप्रयोक्तैवाश्रयः समाक्षिप्यते आलम्बनानुरोधादिति । हास्यसमाना स्थितिर्न । मम तु मतं हास्येऽपि तादृशवाक्यप्रयोक्ता एवाश्रयो भवतु कापि क्षतिर्नास्ति ।

एषामिति । शृङ्गारध्वनिः, वीरध्वनिः, अद्भुतरसध्वनिरिति व्यपदेशस्य व्यवहारस्य हेतुरेषां शृङ्गारादिरसानां वाच्यापेक्षया प्रधानता । तथा चोक्तम्–इदमुत्तममतिशयिनि व्यङ्ग्ये

वाच्याद् ध्वनिर्बुधैः कथितः इति । किन्तु एषां गुणीभावे अर्थात् वाच्यापेक्षया अथवा इतररसापेक्षया एषां शृङ्गारादीनामप्रधानत्वे फलतः वाच्यस्य प्रधानत्वे रसालङ्कार इति व्यवहारः। इति सामान्यतो मतम् ।

विशेषमतमाह–केचित्त्विति । ननु प्रधानस्यैव अलङ्कार्यस्यैव रसत्वमुपस्कारकस्यैव अलङ्कारत्वं तत्कथं रसोऽपि अलङ्कारोपीत्याह–रसेति । प्राक्तनीनसंस्कारवशप्रयुज्य–मानब्राह्मणश्रमणपदवदितिभावः । यथा अलङ्कारध्वनिरिति व्यवहारस्तथा रसालङ्कार इति व्यपदेशोऽपि साधीयान् ।

भक्तिरसस्यातिरिक्तरससद्भावे कथं रसनामेतावत्त्वमित्याशंकते–अथ कथमिति ।

विनिगमकाभावादिति । देवादिविषया रतिर्भावः कामिनीविषया रतिः शृङ्गाररस इति अत्र का युक्तिः । कुतो न वैपरीत्यम् । स्वातन्त्र्याऽयोगादिति । तत्तच्छास्त्रे तत्तच्छास्त्रिणामेव वचनं प्रमाणम् । स्वातन्त्र्यस्य मुनिवचनपराहतत्वादयोग इति ध्येयम् । अन्यथा मुनिवचनानामप्रमाणत्वे अविलं दर्शनं निखिलं शास्त्रं व्याकुलं स्यात् । निखिलशास्त्रव्यवस्था भज्यतेति परमार्थः ।

कैरपि विरोध इति । अत्र अपिर्भिन्नक्रमः । तथा च कैः सह विरोधोऽपीत्यन्वयः । तत्रेति । तत्र तस्यां स्थितौ । यस्यां स्थितौ परस्परं विरोधः तस्यां स्थितौ । तदभिव्यञ्जके प्रकृतरसाभिव्यञ्जके काव्ये । तेन विरुद्धस्य प्रकृतेन विरोधमाचरतो रसस्याङ्गानां षोषकाणां निबन्धं ग्रन्थनम् । तस्य प्रकृतस्य अभिव्यक्तौ व्यञ्जने विरुद्धो रसः प्रकृतं रसं बाधेत तस्य प्रतितिमवरून्ध्यात् ।

सुन्दोपसुन्दन्यायेनेति । तिलोत्तमाप्सरसं दृष्टवतोर्द्वयोः भ्रात्रोः सुन्दोपसुन्दयो राक्षस–योर्यथा परस्परं ममेयं ममेयमिति विरुध्यतोः विनाशस्तथा उभयोरसयोरपि उपहतिः स्यादिति भावः।

आद्य स्थितिविरोध इति । द्वयोर्विरुद्धयोः रसयोः एकस्मिन्नधिकरणे देवदत्तरूपे नास्ति वृत्तिर्यस्य तस्य भावस्तत्ता । अर्थात् यथा एकस्मिन् देवदत्ते सिंहाद् भयमपि अथ च तत्रैव देवदत्ते तस्य हननार्थमुत्साहोऽपि कथमिदं, सम्भाव्येतातो नैवास्ति भयोत्साहयोरेकत्र समावेशः । अयमेव तदधिकरणावृत्तिरिति नाम्ना व्यवह्रियते । द्वितीयो ज्ञानविरोधः इति ।

तस्य ज्ञानेन प्रतिबध्यं ज्ञानं यस्य सः तज्ज्ञानप्रतिबध्यज्ञानकः तस्य भावस्तत्त्वम् तदेव लक्षणं यस्य विरोधस्य स विरोधस्तल्लक्षणः । अयं भावः । चित्तवृत्तिरूपस्थायिनां रसत्वम् । ते च इच्छारूपतया ज्ञानरूपतया वा गुणा एव । ततश्च योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वनियमात् तज्ज्ञानप्रतिबध्यज्ञानकत्वलक्षणो द्वितीयो विरोधः सङ्गच्छते। इति ।

ननु विरोधः सद्वितीयत्वे अनानन्दनरूपतायाञ्च भवति। रसस्तु अद्वितीयाः आनन्दमयश्च तत्कथं विरोधतत्परिहारौ समुल्लिख्येति इत्यत आह–रसपदेनेति। रसस्य उपाधिः तदुपाधिः।

कुण्डलीति । मृगारातेः सिंहस्य पुरः समक्षं मृगा इव । कुण्डलीकृतः प्रत्यञ्चाया आकर्षणेन वर्तुलीकृतः कोदण्डो धनुर्याभ्यां तादृशौ दोर्दण्डौ यस्य तस्य तव पुरः परे शत्रवः नैवावतस्थिरे स्थातुं न शेकुः। इदं प्रथमस्य स्थितिविरोधस्य परिहारार्थमुदाहरणम्। अत्र तवेत्यनेन प्रकृतनायकगतो वीररसो वर्णितः, अपि च "परे नैवावतस्थिरे" इत्यनेन प्रतिनायके भयानकस्य स्थापनं कृतम् ।

सन्धिकर्त्तुरिति । युध्यमानयोः द्वयोः राज्योर्विरोधपरिहारार्थं सन्धिं कारयितुं मध्ये स्थितस्य राज्य इवेत्यर्थः । सन्धिं कारयितुरित्यर्थे सन्धिकर्त्तुरिति पदमन्तर्भावितण्यर्थार्थकं बोध्यम् ।

द्वितीयोऽपि तज्ज्ञानप्रतिबध्यज्ञानकत्वलक्षणोऽपि विरोधो निवर्तते दूरं गतो भवति ।

द्वितीयविरोधपरिहारार्थं द्वितीयं पद्यरूपमुदाहरणमाह–यथा वेति। फेरवः शृगालास्तेषां नारीभिः शृगालीभिः। आवृतान् आच्छादितान् । स्वर्गस्य लाभेन प्राप्त्या आक्षिप्तो व्यक्तो वीररसोऽन्तर्मध्ये निवेशितः स्थापितः । ननु साकारयोः सावयवयोर्द्वयोः पदार्थयोर्मध्ये सावयवस्य साकारस्य पदार्थस्य स्थापनं भवितुमर्हति। काव्ये तु इदं सर्वं बौद्धमेव न तु साकारं वस्तु, ततः कथं द्वयो रसयोर्मध्ये अन्यस्य रसस्य स्थापनमित्याशंकां निवर्त्तयितुमाह– अन्तर्निवेशश्चेति । तयोरुभयोर्विरुद्धयो रसयोः यः चर्वणाकालः तदन्तर्वर्तिनि काले गता अनुभूता इत्यर्थः चर्वणा यस्य रसस्य अन्तर्निविष्टस्य स तादृशचर्वणाकस्तस्य भावस्तत्त्वम्। अङ्गत्वानुपपत्तिप्रसङ्गादिति। यदि अङ्गिना सह अङ्गस्य विरोधः, यदि च अन्यस्मिन्नङ्गिनि अङ्गयोः परस्परं विरोधो भवेत्तर्हि अङ्गत्वमेवानुपपन्नमयुक्तं स्यात् । विरोधः समयोर्भवति

अङ्गाङ्गिनोर्विरोधे तु अङ्गत्वस्य अनुपपत्तिरितिप्रसङ्गः अवसरः स्यादिति भावः।

अङ्गांगिनोर्विरोधपरिहारायोदाहरणम् –

प्रत्युद्गतेति । सखीभिः सविनयं प्रत्युद्गता, हे सखि ? ''स्वागतं ते'' इति सादरं वयस्काभिर्व्याहृता । सहसा हासेन युता अत एव स्मेरैरीषद् हास्ययुक्तैः स्मरस्य सचिवैः कामस्योद्रेके सहायभूतैः सरसावलोकैः सस्पृहदर्शनैः अथ च मञ्ज्वी सुन्दरी रचना येषां तैः वचनैः वाक्यैरद्य मां यः सर्वथाऽनुगतः यं त्वमपि प्राणवल्लभं मनुषे तं मां लेशतोऽपि अल्पमपि न सत्करोषि समादृणोसि तत् कथमिति हे बाले ! वद । अत्र अङ्गी शोकः। शृङ्गारोऽङ्गम् ।

शोक एवेति । प्रकृतत्वात् वर्णनीयत्वत् शोक एवात्र निरुक्तसामग्र्या प्रतीयते इति प्रागृह्यते आग्रहः क्रियते ।

नायिकाश्रया नायिकागता । स्मर्यमाणायाः संस्कारस्य उद्बोधेन स्मृतिपथमागतायास्तस्या रतेः ।

उत्क्षिप्ता इति । कण्टकैर्द्रुमाङ्गभूतक्षुद्रकीलकाकारैः अन्यत्र रोमाञ्चैः । ''रोमाञ्चे च द्रुमाङ्गे च कण्टको भस्करेऽपि च'' इति विश्वः। चिताः व्याप्ताः अन्यत्र युक्ताः। के के भूमिरुहाः शालाः। गहनेषु विपिनेषु । अटव्यरण्यं विपिनं अहनं काननं वनमित्यमरः। यान्तीनां गच्छन्तीनाम् । भवतां प्रतिभटाः प्रतिद्वन्द्विनो ये क्ष्मापालाः भूमिपालाः । तेषां वामभ्रुवाम् नायिकानां तानि तानि वस्तूनि त्वरया न गृह्णन्ति अपितु गृह्णन्तीत्यर्थः । कीदृशाः किं वस्तु गृह्णन्तीत्याशयेनाह–उत्क्षिप्ताः । तेषां भूमिरुहाणां कण्टकव्याप्तशाखाभ्यः स्वं रक्षितुमुत्क्षिप्ताः उन्नतीकृताःकबरीभरं केशपाशं गृह्णन्ति । विवलिता वक्रीकृताः । पार्श्वद्वयम् द्वौ पार्श्वौ । न्यक्कृताः अधःकृताः पादाम्भोजयोर्युगम् चरणकमलयोः युगलम् । रुषा क्रोधेन । दूरेण दूरं परिहृता त्यक्ताः। चेलस्य वस्त्रस्य अञ्चलं प्रान्तं गृह्णन्तीत्यन्वयः।

अत्र पद्ये । भवत्पदेन कश्चिद्वर्णनीयो राजा बोध्यः। तस्य वर्णनं कश्चिच्चाटुकारः प्रशंसाविधया करोति । अतः चाटुकारनिष्ठो राजविषयको रतिः स्थायी भावोऽङ्गी । तत्र भावे करुणशृङ्गारावङ्गतां गतौ । तौ च तरुकर्त्तृकं यद्रिपुकामिन्याः कबर्यादेर्ग्रहणं तद्रूपेण अप्रकृतव्यवहारेण, कामिकर्तृकं यद्रिपुकामिन्याः कबर्यादेर्ग्रहणं तद्रूपेण अप्रकृतव्यवहारेण

व्यक्तौ । इमौ प्रकृताप्रकृतव्यवहारौ च समासोक्तेरवयवौ । एवं चात्र परस्परं विरुद्धयोरपि मन्त्रिणोरिव करुणशृङ्गारयोरेकस्मिन् राजनीव राजविषयकरतिभावेऽङ्गतया समावेशो न दोष इति ध्येयम् ।

विरोधसद्भावेऽपि रसयो रसानां वा एकत्र सन्निवेशे विरोधपरिहारस्य प्रकारान्तरं प्रदर्शयन्नाह – किञ्चिति । प्रकृतस्य रसस्य परिपुष्टिम् "उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयत" इत्युक्तेः रत्यादेः रसरूपताप्राप्तिमिच्छता कविना विरोधिनोऽपि रसस्य निबन्धनं स्थापनं यदि कार्यमेव तर्हि बाध्यत्वेन । ननु तथा सत्यपि कथं विरोधपरिहार इति चेदुच्यते – तथा सति बाध्यतया निबन्धने हि वैरिणो विजयकरणेन वर्ण्यस्य राज्ञ इव रसस्य कापि शोभा स्पृहणीयतया निष्पत्तिः चर्वणा सम्पद्यते भवति ।

ननु रसेषु बाध्यबाधकभावः अहिनकुलयोरिवास्ति अथवा प्रकाशान्धकारयोरिवास्ति चेदाह–बाध्यत्वं चेति । अयं भावः । सूर्येऽस्तमिते रात्रेरवसरोऽतोऽन्धकारस्य प्रसारः सर्वत्र भवितुमर्हः किन्तु चन्द्रस्य प्रबलप्रकाशस्तमवरुणद्धि तथैव प्रकृतस्य रसस्य स्वेषु अङ्गेषु विद्यमानेषु स्वीयेषूपोद्बलकेषु कारणेषु सत्स्वपि विरोधिनो रसस्य प्रबलैः समर्थैरङ्गैः कारणैः निष्पत्तेश्चर्वणायाः प्रतिबन्धोऽवरोधो बाध्यत्वं कथ्यते । तदीयेति । तदीयस्य व्यभिचारिभावेन पोष्यस्य रसस्य निष्पत्तेः प्रतिबन्धमात्रात् । नत्विति । अनभिव्यक्त्या अप्रकाशेन व्यभिचारिण इत्यर्थः । व्यभिचारिणोऽभिव्यक्तौ व्यञ्जने कोऽपि बाधको नास्तीत्यर्थः। नचेति । विरोधिनो रसस्य अङ्गानामभिव्यक्त्या प्रकाशेन प्रतिबन्धादवरोधात् प्रकृतरसस्य व्यभिचारिणामभिव्यक्तिर्नास्तीति न वाच्यम् । यस्मिन् समये विरोधिनो रसस्य अङ्गाभिव्यञ्जकानां शब्दार्थानां ज्ञानस्य सन्निधानम् सामीप्यं नास्ति । अर्थात् समयभेदात् प्रकृतरसस्य अप्रकृतरसस्य च अङ्गभूतानां व्यभिचारिभावानां मध्ये परस्परं प्रतिबध्यप्रतिबन्धकभावो नास्ति । समयभेदेऽपि तादृशभावकल्पने प्रमाणं नास्ति । प्रमाणाभावेऽपि तादृशं कल्प्यते तर्हि भावानां शबलता सम्मिश्रता क्व स्यात् । एवं हि तस्या उच्छेदस्यैव आपत्तिः स्यात् ।

नितान्तमिति । नितान्तं परिपूर्णरूपं यथा स्यात्तथा यौवनेन युवावस्थया उन्मत्ताः कर्त्तव्याकर्त्तव्यविषयेऽविवेकिन एव सदा सर्वदा आहवे सति युद्धे सति गाढं रक्तं रुधिरं

येषां ते तथाभूताः । ये तव अरयः शत्रवः हे वीर ! वसुन्धरामालिङ्ग्य भूमौ निपत्य शेरते कथाशेषतां गताः । एकोऽर्थः ।

नितान्तं यौवनेन उन्मत्ता यौवनसुलभकामवासनयाऽऽकुला अतएव सदा आहवे रतिबन्धे गाढानुरागिणः तथा च वसुन्धरां तन्नाम्नीं नायिकां समाश्लिष्य शेरते शयनं कुर्वन्तीति।

अत्र यौवनोन्मत्तत्वगाढरक्तत्व–समालिङ्गन कर्त्तृत्व शयनैः कर्तृत्वरूपैः विशेषणैः समानैः विरुद्धौ द्वौ करुणशृङ्गारावभिव्यङ्क्तः । समानविशेषणत्वादत्र विरोधो नास्तीति भावः।

अनास्वाद्येति । रसशृङ्गारादिस्वशब्दैरभिधाने रसेषु अनास्वाद्यत्वमापतति । तेषां रसानामास्वादः केवलं व्यक्त्यधीन इति प्रागुक्तम् ।

आस्वाद्यतेति । ननु आस्वाद्यो रसः । स च यदा व्यङ्ग्यो भवेत्तदा तत्रास्वाद्यता । एवं च आस्वाद्यताया अवच्छेदकं व्यङ्ग्यत्वं तेन रूपेण रसस्य प्रत्ययोऽपेक्षितः । चेद् व्यङ्ग्यस्य वाच्यता सम्पाद्यते तर्हि आस्वाद्यतावच्छेदक रूपेण व्यङ्ग्यत्वेन प्रत्ययो न जन्यते अतः रसस्य वाच्यवृत्तिः वाच्यीकरणं कापेयकल्पं कपिवृत्तिसदृशवृत्तिकरणम् । कपिर्यथा भक्षयितुः सकाशात् चणकादिकं भुंक्ते पश्चात्तत्रैव भक्षयितुर्गृहे उपद्रौति तथा च सर्वं विरसीक्रियते। तथैव प्रकृतेऽपि विभावादिभिर्व्यज्यमानस्य रसस्य रसादिशब्दैरभिधानेन विरसत्वं सम्पाद्यते।

एवं रसवत् । तयोरसम्यक्प्रत्ययविलम्बप्रत्यययोर्दोषता । ययो रसयोः समम् बलं । यश्च रसः प्रकृष्टबलसम्पन्नः । यश्च रसः प्रकृतरसप्रतिकूलः । एवं भूतस्य रसस्य अङ्गानां कारणानां निबन्धनं ग्रन्थनं तु प्रकृतस्य रसस्य पोषे पुष्टौ प्रातीपिकं विरुद्धमिति दोषः। नायकसम्बन्धिभ्यस्तेभ्य इति । तानि च चरितानि च ताश्च सम्पदश्चेति तानि । नपुंसकमनपुंसंकेनैकवच्चान्यतरस्यामिति सूत्रेण अनपुंसकयोगे नपुंसकं शिष्यते तथा विकल्पेन एकवत्वविधानाद् बहुत्वं च । तत्र च अतिशयापेक्षा चतुर्थी विभक्तिः । ततश्च नायकसम्बन्धिभ्यः चरितेभ्यः अथ च नायकसम्बन्धिनीभ्यः संपद्भ्यश्चातिशयो वैलक्षण्यं न विर्णनीयः ।

तथा सति नायकस्य चरितसम्पदादेरपेक्षया प्रतिनायकस्य तयोरतिशयवर्णने सति । तत्प्रयुक्तः नायकोत्कर्षापेक्षो रसपोषश्च । तस्य प्रतिनायकस्य अभिभावकः दर्पशामकः । तादृशस्य अभिभावकनायकोत्कर्षाङ्गताविरुद्धस्य प्रतिनायकोत्कर्षवर्णनस्य । तयोः रसालम्बनाश्रययोरनुसन्धानस्याधीना । तयो रसालम्बनाश्रययोः। अनुसन्धानं ज्ञानम् । भङ्गश्चेति। रसभङ्गश्चेत्यर्थः । बाहुजस्य क्षत्रियस्य प्रतिग्रहः दानग्रहणम् । निगमस्य वेदस्य । दारोपसङ्ग्रहः स्त्रीसेवनम् । धीरोदात्ते उत्साहः । धीरोद्धते क्रोधः । धीरललिते कामिनीरतिः । धीरशान्ते निर्वेदः प्रधानभूत इति सर्वत्रान्वयः । दिव्येष्विव अदिव्येषु तादृशक्रोधस्य वर्णनमनुचितमिति भावः । कविसम्प्रदायानुरोधादेव साधारणीकरणम् कल्पनीयमिति भावः। अन्यथा कविसम्प्रदायानुरोधाभावे । तन्निदर्शनेन गीतगोविन्दादिप्रबन्धेषु जयदेवादिकृततादृशवर्णनरूपदृष्टान्तेन । इदानींतनेन कविना । साम्प्रतं युक्तम् ।

अनौचित्यादिति । उचितस्य हि यो भावस्तदौचित्यं प्रचक्षते । प्रस्तुतानुगुण्यमित्यर्थः। तद्विरुद्धमनौचित्यं तस्मात् । ऋते विहाय अन्यत् किमपि रसभङ्गस्य रसनाशस्य कारणं हेतुर्नास्ति । प्रसिद्धं यदौचित्यं प्रस्तावानुगुण्यं तस्य बन्धो रचना । रसस्य परा उत्कृष्टा उपनिषत् रहस्यम् ।

अनौचित्यमपि कदाचित् प्रसङ्गात् रसपुष्टिकरं भवतीत्याह–यावतेति । न वार्यते स्वीक्रियते इत्यर्थः । रसविघ्नकरमनौचित्यं निषेध्यमेव । तस्यानौचित्यस्य ।

अनौचित्यस्यापि रसपुष्टिकरत्वोदाहरणमाह–ब्रह्मन्निति । सीतायाः रल्लकमेव भल्लः ‘‘भाला’’ इति हिन्द्यां प्रसिद्धः आयुधविशेषः । अत एव अनौचित्यं न दोष इत्यन्वयः ।

कस्यचित् नाटकस्य हनुमान्नाटकस्येत्यर्थः । सीताविषयको यो विप्रलम्भशृङ्गारः । तस्याङ्गीभूतः अङ्गतां गतो यो वीरो रसः तस्याऽऽक्षेपकं व्यञ्जकं यत्परमैश्वर्यं तस्य पोषकतया परमेश्वराणामेव द्वारि भृत्यास्तिष्ठन्तीति प्रतिपादकतया । दौवारिकः द्वारपालः। तस्य यत् ब्रह्मबृहस्पतिनारदतुम्बुरूणामधिक्षेपपरं भर्त्सनात्मकं वचनं तस्य अनौचित्यम् ।

एवमेव ब्रह्मन्निति पद्यवत् । अरे रे सद्यस्तत्क्षणमेव समुत्पाटितः उत्खानितः अत एव हरितो यः कुशस्तत्र ग्रन्थिः। तन्मया तत्स्वरूपा अक्षमाला रुद्राक्षमालेति यावत् तस्याः परिवृत्त्या भ्रमणेन विस्रम्भितं बालविधवानामन्तःकरणं यैस्ते ब्राह्मणाः। अत्र वर्णानां ब्राह्मणो

गुरुरित्युक्त्या ब्राह्मणस्य गुरुत्वम् । तथा च नीचं प्रति प्रयोक्तव्ययोः अरे रे पदयोः गुरुभूतब्राह्मणं प्रति प्रयोगो दोषावहः। तथापि विदूषकवचने हास्यानुगुणत्वेन हास्यपोषकत्वेन वर्त्तमानत्वात् तदनौचित्यं तथा दुष्टं नेत्यर्थः।

एषा रसविरोधतत्परिहारपरिपाटी । दिग् दिशा मार्गः उपदर्शिता प्रकाशिता । अनया दिशा ।

विभिन्न–मतप्रदर्शनपुरःसरं लक्षणप्रमाणाभ्यां निरूपितेषु निगदितेषु एतेषु शृङ्गारादिषु रसेषु माधुर्यौजःप्रसादान् त्रीन् त्रिसंख्याकान् गुणानाहुराचार्या इति शेषः । त्रीनिति 'त्रयस्ते न पुनर्दश' ति काव्यप्रकाशे मम्मटोक्तं शिष्यान् स्मारयितुं साभिप्रायो निर्देशः । गुणानिति। अयं भावः । यथा सङ्ख्याया वृद्धये गणितज्ञाः गुणनं कुर्वन्ति तथा अन्यत्रापि लोके शास्त्रे च स हि सर्वो गुणपदव्यवहार्यो यो गुणिनः उत्कर्षाय भवति । गुणनं गुण इति व्युत्पत्तेः। स च गुणोऽत्र काव्ये सहृदयहृदयावर्जको धर्मविशेष एव । आहुरिति गुणानां त्रित्वे स्वस्यानास्थां सूचयितुम्, ''जरत्तरास्तु'' इत्यादिना दशगुणानामग्रे निरूपणात् ।

तत्र तेषु गुणेषु संयोगाख्ये सम्भोगनामके शृङ्गारे यन्माधुर्यं ततो शृङ्गारस्थ माधुर्यादतिशयितमधिकं माधुर्यं करुणे रसे, ताभ्यां शृङ्गारकरुणागतमाधुर्याभ्यामतिशयितं विप्रलम्भे, तेभ्योऽपि अतिशयितं शान्ते रसे ।

ननु कुत एतत्पूर्वपूर्वापेक्षया उत्तरोत्तरस्मिन् माधुर्यमतिशयितमिति हेतुमाह–उत्तरोत्तरं यथा स्यात्तथा अतिशयिताया अधिकाया चित्तद्रुते रसेभ्य एभ्यो मनसो द्रवीभावस्य जननात् सम्पादनात् । पूर्वरसापेक्षया उत्तरस्मिन् रसे माधुर्यस्यातिशयितत्वे हेतुरेभ्यो रसेभ्योऽतिशयेन मनसो द्रवीभाव एवेत्याशयः । इति केचित् ।

संयोगशृङ्गारात् संभोगशृङ्गारापेक्षया करुणशान्तयोर्निरतिशयितं माधुर्यं, ताभ्यां करुणशान्तयोरपेक्षया माधुर्यं विप्रलम्भे वियोगशृङ्गारेऽस्तीत्यपरे ।

संयोगशृङ्गारात् सम्भोगशृङ्गारपेक्षया करुणविप्रलम्भशान्तेषु रसेषु अतिशयितमेव न पुनस्तत्रापि करुणविप्रलम्भशान्तेष्वपि तारतम्यम् अल्पाधिकभावः । प्रथममतवत् परस्परमापेक्षिकमतिशयितत्त्वं नास्तीति भावः। इत्यन्ये आचार्याः।

एतानि मतानि समीक्षितुं पण्डितराजः आह–तत्रेति । तत्र त्रिषु मतेषु प्रथमचरममतयोः

प्रथमस्मिन् शृङ्गारे सम्भोगाख्ये यन्माधुर्यमित्यादि मते, तृतीये चरमे संयोगादिति च मते "करुणे विप्रलम्भे चेत्यादि" प्राचां काव्यप्रकाशकाराणां सूत्रं कारिकारूपमनुकूलं समर्थकम्। तस्य सूत्रस्य व्याख्याद्वयं सम्भवति । व्याख्याद्वये कारणमाह–उत्तरस्मिन् "दीप्त्यात्मविस्तृतेर्हेतुरिति सूत्रे गतस्य वर्त्तमानस्य क्रमेणेति पदस्य अपकर्षः व्याघुट्य अनुवृत्तिः । अनपकर्षस्तथा अननुवृतिः । ताभ्यामपकर्षानपकर्षाभ्यां व्यख्याद्वयस्य सम्भवात् प्राप्तेः ।

अपकर्षे व्याख्या=क्रमेण माधुर्यमतिशयितमित्यर्थः । एवं प्रथमसूत्रं सङ्गतम् । क्रमेणेति पदस्य अनपकर्षे सति तृतीयं सङ्गतम् । मध्यस्थे प्रथमतृतीय मतयोर्मध्यगते मते करुणशान्ताभ्यां रसाभ्यामपेक्षया विप्रलम्भरससम्बन्धिनो माधुर्यस्यातिशये यदि सहृदयानां विदुषामनुभवो मानसं प्रत्यक्षं साक्षी तदा स अनुभवः प्रमाणम् ।

एवं माधुर्यं निरूप्य ओजः प्रसादयोर्गुणयोर्विषये क्रमेण अतिशयितत्वमाह वीरेति। तत्र कारणमाह–उत्तरोत्तरमिति । गुणद्वयेति–ओजःप्रसादगुणद्वयसम्बन्धः । प्रसादस्य साधारण्यं प्रकटयितुमाह–प्रसादस्त्विति ।

यथा सङ्ख्यासु गुणनस्य फलं सङ्ख्यावृद्धिः,लोकेऽपि यस्य गुणाः कथ्यन्ते तस्योत्कर्षःप्रतीयते तथैव काव्ये रसगतगुणानां किं फलमित्याह–गुणानामिति । अयं भावः। काव्यं ये पठन्ति शृण्वन्ति पश्यन्ति तेषां भावुकानां सहृदयानां माधुर्यादिगुणविशिष्टरसानुभवात् क्रमेण द्रुतिनामिका; दीप्तिसमाह्वया; विकासाख्या चित्तवृत्तिर्जायते । तदेतदुक्तं= तत्तद्गुणविशिष्टरसचर्वणाजन्या इति यावदिति ।

नन्वेवं भवदुक्तरीत्या गुणा रसमात्रधर्मा इति प्राप्तं भवति परं मधुरा रचना, ओजस्वी बन्धः, प्रसन्नौ शब्दार्थौ इति सहृदयगोष्ठीषु व्यवहाराः प्रचलन्तीत्यत आह–औपचारिका इति । इमे व्यवहारा उपचारेण लक्षणया भवन्ति । यथा शूरत्वमात्मनो धर्मस्तथापि किमस्य शूरत्वे वक्तव्यम्, अस्य तु आकार एव शूर इति व्यवहारो भवति तथैव मधुरा रचना इत्यादिगोष्ठीव्यवहारा अपि प्रचलन्तीति भावः ।

गुणाः शब्दधर्माः अर्थधर्माश्चेति जरत्तरवामनादिमतमनुसरन् पण्डितराजो गुणा रसमात्रधर्मा इति मम्मटादीनां मतमाक्षेप्तुमाह–येऽमीति । अमी इदानीमेव निरूपिता ये

माधुर्यौजःप्रसादा गुणा रसस्यैव धर्मा नान्यस्येति रूपेण उक्ताः मम्मटादिभिरिति शेषः । तेषां गुणानां रसधर्मत्वे किं मानम् प्रत्यक्षादिप्रमाणेषु कतमत् प्रमाणं तेषां तद्धर्मत्वे साधकमित्यर्थः ।

अथोच्येत, माधुर्यादयो गुणा रसेषु प्रत्यक्षमनुभूयन्त इति चेन्न । अनुभवं दूषयति। दाहादेरिति । यथा अग्नेर्गुणः उष्णस्पर्शः, अग्नेः कार्यं दाहः, आदिपदार्थः प्रकाशनञ्च; पृथक् पृथक् अनुभूयेते तथा रसकार्यं चित्तद्रुत्यादि रसधर्मा माधुर्यादयः पृथक् २ नानुभूयन्तेऽतो माधुर्यादिगुणानां रसधर्मत्वे प्रत्यक्षं न प्रमाणम् । अन्येषां भिन्नानाम् ।

गुणानां रसधर्मत्वे प्रत्यक्षप्रमाणाभावेऽनुमानं प्रमाणमस्त्वित्याह–तादृशगुणेति । अत्रायं निष्कर्षः । द्रुतिदीप्तिविकासरूपकार्याणि प्रति रसः कारणमिति सामान्यतो वक्तुं न पार्यते, यतो हि रसो द्रुत्यादिकारणमिति स्वीकारे यथा शृङ्गारो रसस्तथा वीरोऽपि रसः; तर्हि कथं न शृङ्गाराद् दीप्तिर्जायताम्, वीराद्वा कथं न द्रुतिर्जायताम्, किमेतस्य निरासकं स्यात् । एतद्दोषनिरासार्थं यदि कश्चित् क्षमस्तर्हि विशिष्टकार्यकारणभाव एव । अतः सामान्यकार्यकारणभावं विहाय तत्तद्गुणविशिष्टो रसो द्रुत्यादिकारणमिति वक्तव्यम्, ततश्च कारणतावच्छेदकतया गुणानामनुमानं कर्त्तव्यम् । तत्प्रकारश्चायम्=द्रुत्यादिनिष्ठकार्यतानिरूपिता गुणानामनुमानं कर्त्तव्यम् । तत्प्रकारश्चायम् = द्रुत्यादिनिष्ठकार्यतानिरूपिता या तत्तद्गुणविशिष्टरसनिष्ठा कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्, घटनिष्ठकार्यतानिरूपितदण्डनिष्ठकारणतावत् । यथा दण्डादिनिष्ठाकारणता दण्डत्वादिधर्मावच्छिन्ना तथा तत्तद्गुणविशिष्टरसनिष्ठाकारणता तत्तद्गुणरूपधर्मावच्छिन्ना, निरवच्छिन्नायाः करणताया असम्भवात्, या या कारणता सा सा किञ्चिद्धर्मावच्छिन्ना एवञ्च गुणरूपो धर्मोऽत्रानुमीयते ।

अथवा माधुर्यादिकं किञ्चिदाश्रितं गुणत्वात्, यत्र यत्र गुणत्वं तत्र किञ्चिदाश्रितत्वं; यथा ज्ञानादिषु । एवञ्च माधुर्यादयो गुणा रसाश्रिता रसधर्मा इति, अनुमीयते ।

नानुमानं गुणानां रसधर्मत्वसाधकमिति प्रदर्शयितुमाह–प्रातिस्विकेति । द्रुत्यादिनिष्ठाकार्यतानिरुपिताया रसनिष्ठकारणतया उपपत्तये यदि गुणाः कल्प्यन्ते तर्हि गौरवं स्यादतो द्रुत्यादि प्रति रसानां कारणता प्रातिस्विकरुपेण सम्पादनीया । "स्वं स्वं प्रति" इति प्रतिस्वं प्रत्येकम्, एकैकमिति यावत् । प्रतिस्वं एकैकस्मिन् भवः प्रातिस्विकः

प्रत्येकपदार्थगतासाधारणधर्मः। प्रकृते च प्रत्येकपदार्थो रसोऽतः प्रत्येकरसः शृङ्गारादिः तद्गतासाधारणधर्मः शृङ्गारत्वं करुणत्वं वीरत्वम् । तदादिरूपेणेतिभावः।

शङ्का = प्रातिस्विकरुपेण अर्थात् प्रत्येकशृङ्गारत्वादिरूपेण रसानां कारणत्वकल्पनायां शृङ्गारादीनां नवत्वात् नवकार्यकारणभावाः स्युरतो माधुर्यवत्वेन अर्थात् माधुर्यविशिष्टाः शृङ्गार–करुण–विप्रलम्भ–शान्ताः द्रुतिकारणानि, ओजो विशिष्टा वीर–बीभत्स–रौद्रा दीप्तिकारणानि, प्रसादगुणविशिष्टा अद्भुतहास्यभयानका विकासकारणानि इत्येवं त्रयः कार्यकारणभावा इति नवाऽपेक्षया त्रिषु लाघवमिति न वाच्यम्। परेण मम्मटादिना "आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम् । करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्" "दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः । बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण तु" इत्युक्तदिशा सम्भोगे, करुणे, विप्रलम्भे, शान्तेऽतिशयितं माधुर्यं क्रमेणेति रीत्या मधुर–मधुरतर–मधुरतमरसानां ये धर्माः, वीरबीभत्सरौद्रेष्वोजसः क्रमेणाधिक्यमिति रीत्या ओजस्वि+ओजस्वितर+ओजस्वितमरसानां ये धर्माः अद्भुत–हास्य=भयानकेषु प्रसादोऽतिशयितः क्रमेणेति रीत्या प्रसन्न–प्रसन्नतमरसानां ये धर्मा माधुर्य–माधुर्यतरमाधुर्यतमाः; ओजः;+ओजस्तर+ओजस्तमाः, प्रसाद–प्रसादतर–प्रसादतमा गुणाः; तेषां गुणानां क्रमेण पृथक् द्रुति–द्रुतितर–द्रुतितमकार्यं प्रति, दीप्ति–दीप्तितर–दीप्तितमकार्यं प्रति, विकास–विकासतर–विकासतमकार्यं प्रति प्रयोजकत्वमभ्युपगतमतो माधुर्यवत्त्वेन ओजस्वित्वेन प्रसादवत्वेन कारणतायाः स्वीकारे प्रत्युत गौरवं स्यात् ।

अत्र मधुरत्वमधुरतरत्वादि गुणानामिति दुष्पाठः । द्रुतत्वद्रुततरत्वादीति पाठः । द्रुतं चित्तं तस्य धर्मो द्रुतत्वं द्रुतिरिति बोध्यम् । गुरुभूतत्वादिति पाठः । पूर्वं "गुणकल्पने गौरवादिति" मध्ये "लघुभूतमिति" पश्चाच्च "लाघवमिति" पाठेषु गौरवलाघवघटितेषु सत्सु मध्ये गडुभूतत्वादिति पाठस्य का सङ्गतिः । अतो गडुभूतत्वादित्यपाठः ।

कार्येति । अत्रेयमक्षरयोजना । कार्येषु द्रुतत्वादिषु द्रुत्यादिषु तारतम्यं तरतमभावः अल्पाधिकभाव इति यावत् तस्य प्रयोजकतया हेतुतया अभ्युपगमः स्वीकारः परेण कृत इत्यन्वयः । तेन अभ्युपगमेन । इत्थममुना व्याख्यानप्रकारेण प्रातिस्विकरूपेणैव रसानां द्रुत्यादेः कारणत्वे लाघवम् । मम्मटविश्वनाथादिकथितरीत्या गुणाः द्रुत्यादीनां कारणानीत्येकः। एवमपि प्रत्यक्षेण गुणानामसिद्धत्वात् कारणतावच्छेदकतयाऽनुमानेन तत्सिद्धिमभ्युपगम्य

माधुर्यादिगुणविशिष्टाः शृङ्गारादयो रसाः द्रुतिप्रभृतीनां कारणानीति द्वितीयः पक्षः । अत्राऽपि विशिष्टस्य कार्यकारणभावस्य गुरुभूतत्वात् । एवं त्रयः पक्षा एव प्रकृतस्थले प्राप्ता दर्शिताश्च । सामान्यो रसो द्रुतिप्रभृतिकारणमिति चतुर्थः पक्षोऽनुपयुक्तत्वकोटौ गतः ।

ननु प्रातिस्विकरूपेण रसानां कारणत्वेऽपि परं तदुत्कर्षकाणां गुणानामस्वीकारे को हेतुरित्यत आह–किञ्चेति । आत्मनः निर्गुणतया शुद्धस्य वेदान्तेषु प्रसिद्धिः । अतः आत्मरूपे रसे माधुर्यादीनां गुणत्वमनुपपन्नमसङ्गतम् । नन्विदं स्थाय्यवच्छिन्ना, चिदेव रस इति मतानुसरणे स्यादपि, परं चिदवच्छेदको रत्यादिरेव रस इति मते तथा पूर्वमतेऽपि विशेषणांशे स्थायिनि रत्यादौ गुणस्वीकारे का हानिरित्यत आह–एवम्, आत्मभूतरसनिष्ठगुणानुपपत्तिवत् तेषां रसानामुपाधिषु आश्रयेषु रत्यादिषु अपि माधुर्यादिगुणत्वमनुपपन्नम् असङ्गतम् ।

ननु कथमनुपपन्नमित्याह–मानेति । मानस्य प्रत्यक्षादि प्रमाणस्य अभावात् । नन्वीश्वरस्य, कपिलादिसिद्धानां योगिनां वा सर्वं वस्तु प्रत्यक्षमेवेति चेदाह–परेति । परस्य नैयायिकस्य रीत्या मतेन गुणे गुणान्तरस्य स्वीकृतेरनौचित्याच्च नैयायिकैरयोग्यत्वाद् गुणे गुणानङ्गीकारः कृतोऽतो रसे तदुपाधौ च गुणो नास्तीति सिद्धम् । यया रीत्या गुणे गुणान्तरस्यानौचित्याद् रसोपाधिरत्यादिगुणत्वं माधुर्यादीनामसङ्गतमिति वदन् पण्डितराजस्तयैव रीत्या शब्दरूपे गुणे माधुर्यादिगुणान्तरस्यानौचित्यं कथं न जानाति । केवलं गजनिमीलिकैव प्रतिभाति तस्य। किंच शुद्धायां चिति माधुर्यादिगुणानामनुपपत्तावपि रत्यादिविशिष्टायां तस्यां तेषां गुणानामुपपत्तिः सत्ता सर्वस्वीकृतैव जागर्ति ।

ननु निर्गुणे आत्मनि माधुर्यादीनां गुणत्वमयुक्तं चेद्, तर्हि; शृङ्गारो मधुर इति सामानाधिकरण्येन प्रयोगरूपो व्यवहारः कथमिति पक्षान्तरमुद्भावयति अथेति । अयं भावः। गौरवात्, अनुपपत्तेः, मानाभावात्, अनौचित्याच्चेति चतुर्भिर्हेतुभी रसे गुणो नास्तीति साध्यते, अथ तर्हि शृङ्गारो मधुर इति व्यवहारः कथं किंहेतुकः; हेतुमन्तरा तथा व्यवहारो भवितुं नार्हः, परं भवति तथा व्यवहार इत्यस्ति गुणो रसे इति । अभ्युपगम्य ब्रूते– एवमिति। एवं मनुषे अर्थात् शृङ्गारादिरसेषु माधुर्यादिकमस्तीति तर्हि, माधुर्यादिकं द्रुत्यादिचित्तवृत्तेः प्रयोजकं निमित्तमस्तु जनकस्तु रस एवेति भावः ।

लाघवादाह–वा अथवा द्रुत्यादिकमेव माधुर्यादिकमस्तु । ननु द्रुतिर्द्रुते, दीप्तिर्दीप्ते, प्रसादः प्रसन्ने चित्तेऽस्ति, माधुर्यादिकञ्च मधुरादिषु रसेषु कथं तर्हि विभिन्नाधिकरणत्वात् द्रुत्यादिकमेव माधुर्यादिकमत आह–प्रयोजकतासम्बन्धेनेति । यद्यपि द्रुत्यादिकं चित्ते तथापि तत्प्रयोजकस्य माधुर्यस्य रसेऽवस्थानात् प्रयोजकतासम्बन्धेन द्रुत्यादिकमपि रसेऽस्तु कार्यकारणयोः सामानाधिकरण्यनियमात् ।

नन्वेवं शृङ्गारादिषु माधुर्यादिकं वर्त्तते इत्यायातं, तर्हि शृङ्गारो मधुर इति व्यवहारोऽसङ्गत इत्यत्राह–व्यवहारस्त्विति। वाजिगन्धा उष्णा आयुर्घृतमित्यादिवत् लक्षणया अक्षतः सम्पन्नः। वाजिगन्धा "असगन्ध" इति ख्याता ओषधिः सा उष्णतायाः जनिका । यथा आयुषो जनके घृते आयुर्व्यवहारः तद्वत् कारणे कार्योपचार इति भावः ।

ननु प्रयोजकं निमित्तं, तच्च देशः, कालः, ईश्वरः, अदृष्टमित्यातज्ज्ञानच्छे, तेषु द्रुत्यादिचित्तवृत्तिप्रयोजकंइम्, अदृष्टं, देशो वा, कालो वेति शङ्कायामाह प्रयोजकत्वञ्चेति। अदृष्टाद्यष्टभ्यो भिन्नं विलक्षणं शब्दे, अर्थे, रसे, रचनायां गतमेव प्रयोजकत्वं ग्राह्यम् अतो न व्यवहारस्य सामानधिकरण्येन द्रुत्यादिप्रयोजकः काल इत्यादिप्रयोगरूपस्य न अतिप्रसक्तिरतिव्याप्तिः। तथा च द्रुत्यादिप्रयोजकस्य माधुर्यादेः शब्दार्थरसरचनागतत्वेन ग्राह्यतायां च ईदृशस्य द्रुत्यादिप्रयोजकरूपस्य माधुर्यादेः शब्दार्थयोरपि शब्दे अर्थेऽपि च सत्वात् वर्त्तमानत्वात् उपचारो लक्षणा नैव कल्प्यः कल्पनीय इति मादृशाः पण्डितराजस्तदनुगामिनश्च । गुणवृत्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मतेति काव्यप्रकाशोऽत्र कटाक्षितः। आकारे शौर्यस्येव तेषां गुणानां शब्दार्थयोर्वृत्तिः स्थितिर्गुणवृत्या उपचारेण मता स्वीकृतेति तदर्थः।

भिन्नानामपीति । "अर्थभेदेन शब्दभेदः" "अथ च प्रत्युच्चारणं शब्दा भिद्यन्ते" इति नयाभ्यां भिन्नानां पृथग्भूतानां न तु स्वरूपतो भिन्नानां, स्वरूपतस्तु एकरूपाणामिति । अत एवोच्यते=एकत्वभाने एक एव शब्द इति ज्ञाने प्रयोजकः कारणम् । संहितया साहित्येन एकजातीयानां समानरूपाणां वर्णानां विन्यासविशेषः यस्याऽपरं नाम पर्यायो गाढत्वं तदेव श्लेषो गुणः । विद्वांस एव द्रुमाः तेभ्योऽनवरतं निरन्तरं दुह्यति दोहमाचरन् यो दारिद्र्याख्यो माद्यन् मदोन्मत्तो द्विपस्तस्य य उद्दामः उत्कटो दर्पस्तस्य ओघस्य समूहस्य

विद्रावणे नाशे प्रौढः समर्थः पञ्चाननः सिंहः । अत्र द्वद् द्रुमेत्यादि रूपेण सन्धिविधया दकाररूपैकवर्णविन्यासः येन भिन्नानामपि एकत्वं भाति ।

गाढत्वेति । बन्धस्य रचनायाः गाढत्वं निबिडत्वम् । तत्र हेतवः–अक्षराणां परसन्निकर्षः, निरन्तरं रेफस्य अधस्थत्वं, शिरस्कत्वम्, वर्गाणां प्रथमद्वितीयैः तृतीयचतुर्थैः प्रथमतृतीयैश्च संयोगाः। विसर्जनीयजिह्वामूलीयोपध्मानीयाः, गुर्वन्तता समासाश्चेत्येवमादय–स्तारतम्येनावस्थिताः । शैथिल्यं शिथिलत्वं ताभ्यां व्युत्क्रमेण विपर्ययेण पूर्वं शिथिलत्वं पश्चात् गाढत्वमित्यर्थः । मिश्रणं मेलनम् प्रसादो गुणः । तयोर्व्युत्क्रम एव समाधेरस्य भेदकः। तत्र हि तयोः क्रमेण स्थितिः।

किं ब्रूम इति । हे धरायाः पृथिव्याः आखण्डल ! इन्द्र ! वयममी कवयः तव वीरतां शूरत्वं किं ब्रूमः कथयामः । यस्मिन् काले त्वं क्रीडाकुण्डलितभ्रुशोणनयनं यथा स्यात्तथा निजं दोर्मण्डलं पश्यसि तत्कालं तस्मिन् समये माणिक्यावलिकान्तिदन्तुरतरैः, भूषासहस्रोत्करैः विन्ध्यारण्यगुहागृहावनिरुहाः उल्लासिताः प्रकाशमाप्नुवन् । क्रीडया न तु युद्धेच्छया कुण्डलिते वक्रिते भ्रुवौ, शोणे नयने च यस्मिन् दर्शनकर्मणि तत्तथा । दोष्णोर्भुजयोर्मण्डलम् । माणिक्या नामावलिः श्रोणिः। तस्य कान्त्या दीप्त्या दन्तुरतरैरतिशयोन्नतैः। भूषाणां सहस्रं तस्योत्करैः समूहैः । विन्ध्यारण्यस्य विन्ध्यपर्वतस्य गुहा दर्य एव गृहास्तत्र जाता ये अवनिरुहा वृक्षा ते तथा । अत्र कार्यकारणपौर्वापर्यविपर्ययात्मिकातिशयोक्तिरलङ्कारः। लक्षणं समन्वयमान आह–अत्र यस्मिन्नित्यादि । निगदव्याख्यातम् । अत्रौजसः सम्मेलनाद् गाढत्वम् । तदुक्तं प्रकाशे ओजोमिश्रितशैथिल्यात्मा प्रसाद इति । रीत्यभेदो नाम मार्गाभेदः। येन मार्गेणोपक्रमस्तेनैव समाप्तिश्च । आदिमध्यावसानेषु समानरूपतेति भावः ।

संयोगेति । संयोगः परो यस्मादेवंभूतो यो ह्रस्वो वर्णः, संयुक्ताद्यं दीर्घमिति "संयोगे गुरु" इति च निर्देशाद्दीर्घो गुरुर्वा, तदतिरिक्तेन दीर्घगुरुभ्याम् भिन्नेन वर्णेन घटितत्वमपेक्षितम्। तथा पृथक् पदानि यस्य बन्धस्य स पृथक्पदः । तस्य भावस्तत्त्वम् । अत्र समासदीर्घता परिहरणीयेति भावः।

अपरुषेति । अपरुषैः कोमलैः श्रुतिसुखकरैः वर्णैर्घटितत्वं युक्तत्वम् । स्वेदेति । स्वेदरूपं यदम्बु तस्य सान्द्राः सघना ये कणा बिन्दवः तैः शालते शोभते या कपोलस्य

गण्डस्य पालिः । तत्र दोलायिते ये श्रवणकुण्डले ताटङ्कौ ताभ्यां वन्दनीया प्रशंसनीया मदिरेक्षणायाः नायिकायाः कापि विलक्षणा रम्या सुन्दरी दशा, स्मरणेन मे मनसि आनन्दमङ्कुरयति उद्भावयति ।

अत्रोदाहरणे पूर्वार्धे सौकुमार्यम् । अत्र कष्टत्वं भिन्नवृत्तत्वञ्च परिहरणीयम् । झगितीति । झगिति झटिति प्रतीयमाना ज्ञायमाना अर्थास्तदन्वयश्च अर्थसङ्गतिश्च यत्र । बहुव्रीहौ कप् । तस्य भावस्तत्त्वम् । अव्यवहितेन अन्वयस्य जनकानां प्रसिद्धार्थकपदानां सद्भावे हि भवति अर्थव्यक्तिः। अत्र असाधोः, अप्रतीतस्य, अनर्थकस्य, अन्यार्थस्य, नेयार्थस्य, गूढार्थस्य, यतिभ्रंशकरस्य, सन्दिग्धस्य, अप्रयुक्तस्य पदस्य परिहारः कार्यः।

कठिनेति । कठिनानां कठोराणां वर्णानां या घटना रचना तद्रूपं यद् विकटत्वमुद्भटत्वं तल्लक्षणा उदारता ।

प्रमोदेति । प्रमोदस्य प्रकृष्टानन्दस्य भरेण तुन्दिलाः परिपूर्णाः ये प्रमथा गणाः। तैर्दत्ताभिः तालावलिभिर्विनोदिनि प्रमोदमनुभवति अत एव डमरुनामकस्य वाद्यस्य डिण्डिमरूपं ध्वानं ध्वनिं कर्त्तुं शीलं यस्य तस्मिन् विनायके सति, गतपटो दिगम्बरो नटो नृत्यति । किंभूतो नटः हठेन उद्धताभिर्जटाभिर्विकटः उद्भटः। अथ च यस्य ललाटतटात् नवा नूतनाः कृपीटयोनेः हिरण्यरेतसोऽग्नेश्छटाः कणाः विस्फुरन्तो निःसरन्तो दृश्यन्ते । अत्र कठिना वर्णाः स्पष्टं दृश्यन्ते । अत्र चतुर्वारं "टो" इत्यस्यानुमासः ।

अनुकूल इति । एतादृशी पदानां नृत्यत्प्रायत्वारूपाम् । उदारतामोजस्यन्तर्भावयितुः काव्यप्रकाशकारस्य आशयं विवृण्वतां टीकाकाराणां विपुलतया ओजसः प्रतिभानरहितायास्तस्याः टीकनमनुकूलतां न विगाहते । इति भावः।

साहङ्कारेति । हे भूमीभूषण ! हे राजन् ! साहङ्कारा कोऽयं मत्त उत्कृष्ट इति सगर्वा या सुराणामसुराणामालिः पङ्क्तिस्तस्याः करेण आकृष्टः सन् भ्रमन् यो मन्दरनामाऽचलस्ततः क्षुभ्यन् क्षोभं प्राप्नुवन् यः क्षीरधिः क्षीरसागरस्तस्य वल्गु सुन्दरं यद्वीचीनां वलयं मण्डलं तस्य याः श्रियः शोभास्तासां गर्वस्य सर्वङ्कषा सर्वथा हारिकाः । तृष्णया विपासया ताम्यन्त आकुला ये तापसाः तेषां कुलैः समूहैः सानन्दं यथा स्यात्तथा आलोकिताः दृष्टाः। भवतः कीर्त्तयः। भुवनानामाभोगं विस्तारं भूषयन्ति ।

अत्र कृष्टभ्रमन्निति क्षुभ्यत्क्षीरेति वलयश्रीगर्वसेर्वति भवत्कीर्त्तेति च ओजः।

बन्धेति । बन्धगतेत्यर्थः । गाढत्वस्य अवस्थापने शिथिलत्वस्य समाधिः परिहारः। शिथिलत्वस्यावस्थापने गाढत्वस्य परिहारः । अत एव परिपाट्या क्रमेणेत्युक्तिः । प्राचीनैः वामनाचार्यैः। अनयोः गाढत्वशिथिलत्वयोः। गाढत्वम्, आरोहः, ओज इति पर्यायः। शैथिल्यम्, अवरोह, प्रसाद इति च पर्यायः। यत्रोजःप्रसादौ नदीवेणिकावत् सम्पृक्तसरिद्द्वयसलिलवत् सम्पृक्तौ वहतस्तिष्ठतः स समाधिरिति भावः।

स्वर्गेति । यस्य आस्यसरोजम् मुखकमलम् । स्वर्गात् निर्गता निःसृता निरर्गला प्रतिबन्धरहिता या गङ्गा तस्याः तुङ्गा उन्नताः भङ्गुरा नाशस्वभावा ये तरङ्गास्तेषां सखानां सदृशानाम् । केवलममृतं ये मुञ्चन्तीति तेषां वचनानां वाणीनां लास्यगृहम् नृत्यस्थानं वर्त्तते इति शेषः ।

तदस्फुटत्वस्य विदग्धचेष्टाया अप्रकाशत्वम् । तदुपपादकयुक्तेश्च चेष्टायां विदग्धत्वोपपादकरीतेश्च । चेष्टितं चेष्टा । संसर्गो योजना ।

यावदिति । यावदर्थकानि विवक्षितार्थसमर्पकाणि पदानि यत्र बन्धे स यावदर्थकपदः। तस्य भावस्तत्त्वम् । तत्त्वादेव अर्थस्य वैमल्यं स्फुटत्वम् ।

प्रकमस्य यथारब्धान्तगमनरूपस्य अभङ्गेनात्रोटनेन अर्थानां घटनात्मकं योजनास्वरूपम् अवैषम्यम् येन शब्देन आरम्भस्तेनैव समाप्तिरिति भावः । शाब्दबोधे शब्दस्यापि प्रकारतया भानस्य

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥

इत्यादिदिशा हरिणोक्तस्य, आलङ्कारिकैः प्रक्रमाभेदपदेन व्यवहारः। प्रकान्तस्याभेदज्ञानं शाब्दबोधे शब्दस्य भानेनैव प्रतीयते इति भावः। वर्ण्यमानस्यार्थस्य प्रकर्षे प्रतिपाद्ये एकस्य एवोक्तेः रीत्यन्तरेण उक्तिर्माधुर्यम् ।

अकाण्ड इति । अकाण्डे अर्थात् परुषे अमङ्गले आतङ्कदायिनि अर्थे वर्णनीये यदपारुष्यं, माङ्गल्यं, निरातङ्कत्वं सैव सुकुमारता ।

वस्तुन इति । वस्तुनः वर्णनीयस्य पदार्थस्य । अर्थव्यक्तिः असाधारण धर्मैः वर्णने

क्रियमाणे वस्तुनः पुर इव प्रतिभासमानत्वमर्थस्य स्फुटत्वमितिभावः ।

ग्राम्येति । ग्राम्यार्थस्य परिहारः ग्राम्यत्वप्रसङ्गे अग्राम्यतायाः प्रकाशनमुदारता ।

सरसिजेति । सरसिजानां कमलानां वनं काननम्, तस्य बन्धुः विकासकः सूर्यः। तस्य श्रियो लक्ष्म्याः समारम्भकाले समारम्भसमये अर्थात् उषः समये । रजनिर्निशा तस्या रमणः सुखदः चन्द्रस्तस्य राज्यं प्रकाशविस्फारता । स एव समयः । परमपुरुषो ब्रह्मा । तस्य वक्त्रात् मुखात् उद्गतानां प्रादुर्भूतानां नराणां मानवानां ब्राह्मणानामित्यर्थः। मधुवत् मधुराणां गिरां वेदानां विनोदः समुच्चारणम् ।

खण्डितेति । खण्डितायाः ज्ञातेऽन्यासङ्गविकृतेः खण्डितेर्ष्याकषायितेतिलक्षिताया नायिकायाः नेत्रे एव कञ्जे कमले तयोरालिः । तस्या मञ्जु सुन्दरं यथा स्यात्तथा रञ्जने पण्डिताः । मण्डितोऽखिल दिशां प्रान्तो यैस्ते चण्डांशोः सूर्यस्य भानवः किरणाः भान्ति शोभन्ते ।

अवर्णित इति । अयमर्थः पूर्वं केनापि कविना वर्णितो नेत्यवर्णितपूर्वः, अर्थात् अयोनिरकारण इति यावत् । ननु कारणं विना कथं कार्यं स्यादिति नाशङ्कनीयम् । प्रसिद्धकारणातिरिक्तकारणं प्रतिषिध्यते इति न दोषः। प्रसिद्धं कारणं च अवधानम् कवित्वबीजप्रतिभोन्मेष इति यावत् । तदतिरिक्तः केनापि वर्णितोऽर्थः कारणं नास्तीति भावः। पूर्वं केनापि कविना वर्णितोऽर्थः। तस्य छाया सादृश्यं यस्य सः। अन्यच्छायायोनिरित्यर्थः। इत्येवमर्थविषये कवेः पद्यनिर्मातुरालेचनं दर्शनं तत् समाधिः। समवहितं हि चित्तमभिन–वपदार्थानप्रतिबन्धं पश्यति । नन्वेवं समवहितस्य कवेश्चित्तस्य धर्मः समाधिर्ज्ञानं, सः कथं पदार्थधर्म इति चेदाह–ज्ञानस्येति । एवं वामननिर्दिष्टानां शब्दार्थगुणानां लक्षणं किञ्चिद् व्यत्यस्य क्वचित् प्रच्याव्य निर्माय च ग्रन्थकृतोदटङ्कि केवलं दीप्तरसत्वं कान्तिरिति तु यथास्थितमेव व्यलेखीति बोध्यम् ।

अपरे त्विति । अपरे त्वित्यारभ्य इति मम्मटभट्टादयः इत्यन्तो लेखः काव्यप्रकाशानुसारीति तत एव जिज्ञासुभिर्बोध्यम् । अत्रादिपदेन साहित्यदर्पणकारोऽपि सङ्ग्राह्यः।

निर्माण इति । गिरां काव्यानां निर्माणे अभिनवरचनायां नितरां पूर्णतया मार्मिकोऽसि

मर्मस्पृगसि । अत्यन्तपाकेति पाठो विचारणीयः । फलानामत्यन्तपाको वैरस्यावहो न तु भावुकानां हृदयावर्जकः । अतः सद्योग्यपाकेति पाठः समीचीनः । सन् शोभनो, रुचिकरः। तथा योग्यस्तत्तत्फलास्वादे उचितो यो पाकस्तेन द्रवन्ती या मृद्वीका द्राक्षा तस्यास्तथा मधुनश्च माक्षिकस्य च यो माधुरीमदः माधुर्यविषयको गर्वस्तस्य परीहारे परित्याजने उद्धुराणामुद्भटानाम्, गिरां विशेषणमेतत् ।

नैचिकीनयनचुम्बितामिति । प्रशस्तं निचिकं कर्णशिरःप्रदेशो यासां ता नैचिक्य उत्तमा गाव । तासां नयनैः चुम्बितां सम्पृक्ताम् श्रियं शोभाम् ।

स्वेदेति । स्वेदाम्बुनः शारीरिकघर्मजलस्य ये सान्द्राः सघनाः कणाः बिन्दवस्तैः शालते शोभते कपोलस्य गण्डस्य पालिरेकदेशो यस्यां सा मदिरेक्षणाया दशा । अन्तःस्मितेन आभ्यन्तरिकेण मधुरहासेन आलस्यविलोकनैश्च वन्दनीया स्पृहणीया । माद्यति आभ्यां जनः ते मदिरे मादके अक्षिणी ईक्षणे यस्या सा मदिरेक्षणा तस्याः ।

अत्र नैकट्येनेति पाठे नैकट्येन वर्णैर्घटितः इति नैकट्येन प्रयुक्तैरालिङ्गित इति च वारद्वयमेकस्यैव वस्तुन उल्लेखः किमर्थः। नैकट्येन प्रयुक्तैर्वर्णैरालिङ्गित इत्येकवारमेवोल्लेखेन सर्वसिद्धिः। वस्तुतस्तु "टवर्गजिह्वामूलीयोपध्मानीयविसर्गबहुलैः, टवर्गातिरिक्तानां वर्गाणां द्वितीयचतुर्थैः, झय्रेफान्यतरघटितसंयोगपरह्रस्वैश्च वर्णैः नैकट्येन प्रयुक्तैरालिङ्गितः" इति लेखः शुद्धः स्यात् । अन्यथा पुनरुक्तिग्रस्ततया पण्डितराजलेखो नास्तीति विभावनीयं स्यात् ।

इदानीं गुणनिरूपणोत्तरं तत्तद्गुणानां माधुर्यौजःप्रसादानाम् । वर्जनीयं वस्तु अर्थात् दोषः। स्वानन्तर्थं स्वसामीप्यम्, यथा ककारे ककारसामीप्यम् । सकृत् एकवारम् । असकृत् असकृत् अनेकवारम् । स्वसमाने वर्गे भवः स्वसमानवर्ग्यः । तस्य आनन्तर्यं सामीप्यम् । यथा–कवर्ग्यस्य ककारस्य अनन्तरं समीपमेव खकारस्य गकारस्य वा प्रयोगः।

निर्माणे काव्यकरणे मार्मिका मर्मस्पृशः । तदेकवेद्यम् तैरेव ज्ञेयम् । साधारणैरपि अमार्मिकैरपि । गुरुरिति । ययोर्वर्णयोः व्यवधायकः मध्यपतितः गुरुः स्वरः अच्प्रत्याहार इति यावत् । तयोर्वर्णयोः सामीप्यजनितमश्रव्यत्वम् । उपवदति बाधते । अनपोदितमेव अबाधितमेव ।

''तान्तमा'' लेति 'नीङ्किङ्क'री'त्यत्र च 'तां' 'नी' पदे गतस्य मकारस्य, परेण तकारेण ककारेण च समानस्य अर्थात् नकारतां ङकारतां च गतत्वेन सदृशस्य वर्णस्य सत्त्वेऽपि नकारतकारयोः ङकारककारयोश्च संयोगः भिन्नपदगतो नास्ति, यतः स मकारः तामित्यस्य नीमित्यस्य च पूर्वपदस्यैव भाग इति बोध्यम् ।

हलोऽनन्तराः संयोगः । इति पाणिनीयसूत्रस्य अज्भिरव्यवहितानां हलां समवायः सम्योगनाम्ना व्यवहृतो भवति इत्यर्थकरणात् समुदायस्य संयोगसञ्ज्ञेति पक्षः । हल इति बहुत्वमविवक्षितं तदा प्रत्येकं संयोगसञ्ज्ञेति पक्षः । इति पक्षद्वयं शास्त्रेषु वर्त्तते ।

एकादेशस्येति । पूर्वपरयोरचोः स्थाने एकः गुणरूपो वृद्धिरूपो दीर्घरूपो वा आदेशो भवति । अतः पदद्वयस्य स आदेशः भागो भवतीति बोध्यम् । तथापि आदेशस्य एकत्वसङ्ख्यायुक्तत्वबुध्या पदयोः द्वित्वबुद्धिर्नहि भवति । अतः एकपदगतत्वमेव तस्य संयोगस्य वर्त्तते ।

भुजगाहितप्रकृतय इत्यादौ भुजगाः सर्पाः विटाश्च तेषु अहिता शत्रव इत्यभङ्गपदश्लेषः। सुखेषु लीनाः, सुष्ठु खे आकाशे लीनाः, सुन्दरं खलीनं येषां ते इति सभङ्गपदश्लेषः।

लोलेति । लोलानामलकानामावलिः चञ्चलानां केशानां श्रेणिः, वलन्ती चपले नयनारविन्दे नेत्रकमले । तेषां लीलया वशंवदितानि वशीकृताति लोकानां लोचनानि यया तस्या अङ्गनाया गतिः कस्य चेतो न हरति अर्थात् हरत्येव ।

एवं व्यङ्ग्येति । अयं भावः । येन योजनाविशेषेण व्यङ्ग्यस्य रसवस्त्वलङ्कारध्वनेः चर्वणा आस्वादो भवति तेन न यमकानुप्रासादीनामास्वादः किन्तु तेषां निर्माणे अनुभवे वा तदतिरिक्तस्यैव योजनाविशेषस्य अपेक्षा भवति । अतः आपाततः दृष्टिपातमात्रं यावत् न तु विचारेऽपि सति अधिकचमत्कारिणः विलक्षणास्वादजनकान् यमकानुप्रासादीन् नैव कविर्निबध्नीयात् रचयेत् । तेषां निर्माणो रसनिर्माणापेक्षया पृथक् प्रयत्न प्रास्थेयो भवति। परं सिद्धान्त एष यद् येऽलङ्कारा अपृथग् यत्नसम्पाद्याः त एवालङ्कारता गाहन्ते नान्ये । इति ।

अत्रत्यो विषयो ध्वन्यालोके द्वितीयोद्योते १६।१७।१८।१९ षोडशसप्तदशाष्टा–दशैकोनविंशकारिकासु तद्वृत्तौ च साटोपं निरूपितो जिज्ञासुभिस्तत्रैवावलोकनीयः पिष्टपेषणं

स्यादिति नोदलेखि ।

कस्तूरिकेति । स्मेरानना मधुरहासयुतवदना सती सौधस्य मौलिं शिखरं शीलय आरोह । अत्र पद्ये मुखे पूर्णचन्द्रत्वं ध्वन्यते ।

माधुर्येति । माधुर्यस्य गुणस्य भारेण अधिक्येन भङ्गुराणि नतानि अर्थात् माधुर्यं व्यञ्जयितुं सोद्योगानि यथा स्यात् तथा भासमानानि सक्षमाणि इति यावत् यानि पदानि, वर्णश्च तेषां विन्यासः समावेशो यस्यां सा । निर्मातुः कवेः व्युत्पत्तिं प्रगल्भतामुद्गिरन्ती प्रकाशनस्वभावा । गृहीतपरिपाकाम् रसालपाकयुताम् ।

अथ सङ्क्षेपेण रसानां निरूपणान्तरं भावध्वनिर्निरूप्यते लक्ष्यते । अथेति आरम्भार्थको माङ्गलिकश्च । भावध्वनिपदगतं भावत्वं किम् । को नाम भावपदस्यार्थः। किं तस्य लक्षणम् । निर्विकारात्मके चित्ते भावः। प्रथमविक्रियेति लक्षितो वा भावः। अथवा सुखदुःखादिकैर्भावैः भावकचेतसो भावनं भावः। उत भावोऽभिप्राय आशय इत्येवं कोषनिर्दिष्टोऽभिप्रायविशेषो वा भावः इति सन्दिहानः पृच्छति । उत्तरति–विभावेति । विभावानुभावाभ्यां भिन्नो रसस्य व्यञ्जको यः स भावः। शङ्कते–रसेति । एवं लक्षणे कृतेऽपि रसाभिव्यञ्जके काव्यरूपे वाक्येऽतिव्याप्तिरर्थात् लक्ष्यं भावं विहाय लक्षणस्य प्रसक्तिः, यतो हि शब्दोऽपि अर्थद्वारा व्यञ्जको भवति । अयं भावः। विभावादिसंयोगाद्रसः, तत्र विभावादयः शब्दप्रतिपाद्या एव भवन्ति; अतस्ते शब्दस्य अर्थाः। तेन तद्द्वारा शब्दोऽपि विभावानुभावाभ्यां भिन्नः सन् रसस्य व्यञ्जक इति प्राप्तं भवतीति ।

समाधत्ते–द्वारेति । अयं भावः । शब्दो न साक्षाद् रसव्यञ्जकोऽपि तु अर्थद्वारा तथा, अतो लक्षणस्य शब्दगतत्वेन प्राप्तमतिव्याप्तिदोषं निरसितुं व्यंजकत्वमेवं विशेषणघटितं निर्माणीयम् । द्वारान्तरेण निरपेक्षः व्यापारान्तराकांक्षारहितः सन् रसव्यञ्जको यः सः भावः । नन्वेवं व्यञ्जकत्वे विशेषितेऽपि लक्षणस्य यावति लक्ष्ये भावे अवर्त्तमानत्वादसम्भवनामको दोषः प्रसज्येत प्राप्तो भवति । यतो भावस्यापि साक्षाद् व्यञ्जकत्वं नास्ति तस्यापि भावनाद्वारा एव तथात्वम् । अथ प्रकारान्तरेण लक्ष्यं भावं विहाय भावनायामलक्ष्ये लक्षणप्राप्तेरतिव्यातिश्च । यतो द्वारान्तरनिरपेक्षत्वे सति रसव्यञ्जकत्वं तु भावनायामेव । सा च भावो नास्ति इति ।

अत एव च –असम्भवातिव्याप्तिभ्यामेव च । सार्वविभक्तिकवत्सार्ववचनिकः तसिः। अयं भावः । यो रसव्यञ्जकः स द्वारान्तरनिरपेक्षो भवतु इति वक्तुं न पार्यते, उक्तदोषद्वयप्राप्तेः। ननु तर्हि यो रसं व्यञ्जयति स यथा विभावानुभावाभ्यां भिन्नः । तथा शब्दभिन्नोऽपि भवतु इत्येवोच्यतामिति चेन्न । तस्य व्यञ्जकत्वस्य शब्दभिन्नतारूपविशेषणत्वे स्वीकृतेऽपि न निस्तारो न दोषान्मुक्तिरिति ।

कुत एतदिति आह–प्रधानेति । प्रधाने ध्वन्यमाने च भावे अर्थात् भावध्वनौ रसव्यञ्जकताया अभावात् लक्ष्ये भावे एव लक्षणस्याप्रवर्त्तनात् अव्याप्तिदोषापत्तेश्च । यतः सोऽपि विभावानुभावनाभ्यां शब्दादपि च भिन्नः । न केवलं व्यभिचारिण एव भावपदस्य वाच्या अपि तु भावध्वनिपदेन व्यवह्रियमाणा अपि भावपदस्य वाच्याः । इत्यभिमानः ।

तत्रापि प्रधानरूपेण व्यज्यमानभावस्थलेऽपि पार्यान्तिकबोधविषयो रस एवेति वक्तुं न शक्यते । एवं हि नाम अत्र काव्ये भावध्वनिरिति अयं भावध्वनिरिति वा व्यवहार एव विलुपेत । यतो हि चमत्कारप्रकर्षहेतुकप्रधानतायामेव भावस्य ध्वनिरिति व्यवहारः। अन्यस्मिन् कस्मिन् रसादौ प्रधाने सति भावे प्रधानत्वव्याघाताद् भावध्वनित्वव्याघातः स्यात् । प्रत्युत रसध्वनिरिति तत्र स्थले व्यवहारः स्यात् ।

ननु प्रान्ते रसोऽभिव्यज्यते, किन्तु अभिव्यज्यमाने तस्मिन् रसे चमत्कारो नास्तीति रसे ध्वनिव्यपदेशयोग्यता नास्ति इत्यादि वदितुं न शक्यम् ।

चमत्कारेण रहितस्य रसस्य व्यक्तौ प्रमाणं नास्ति । अभिव्यज्यमानो रसोऽपि चमत्काररहितोऽपीति अंशे मानाभाव एवेत्यर्थः।

रसे हीति । यद्धि प्रमाणं; काव्यमिदं शृङ्गाररसात्मकम्, काव्येऽत्र शृंगारादिको रस इत्येवं रूपेण धर्मिणं रसं ग्राहयति बोधयति तदेव प्रमाणं तत्र रसे आनन्दांशाविनाभावस्य नियमेन आनन्दांशस्य सद्भावं ग्राहयतीति प्रागेव वस्तुतस्तु वक्ष्यमाणश्रुतिस्वारस्येनेत्यत्र स्थले पूर्वमेव रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रस इत्येवं रूपेणावेदनात् कथनात् ।

ननु पूर्वं यत्र व्यङ्ग्यमप्रधानमेवेति द्वितीयकाव्यलक्षणनिरूपणे एवकार सार्थकताप्रतिपादनप्रसङ्गे पार्यन्तिकव्यङ्ग्यान्तरमादाय गुणीभूतस्यापि वाच्यापेक्षया प्रधानस्य व्यङ्ग्यस्य ध्वनित्वमेवेत्युक्तं, सम्प्रति तादृशव्यङ्ग्यस्थले भावध्वनिविलोपप्रसङ्गादिति रीत्या

ध्वनित्वं नानुमोदतेऽतो भवतो वदतो व्याघात इत्यत आह–अस्तु वेति । तथापि प्राधान्येन ध्वन्यमाने भावे रसव्यञ्जकतायाः सत्त्वादव्याप्तेर्निरासेऽपि । तथापि विभावानुभावभिन्नत्वस्येव शब्दभिन्नत्वस्यापि तद्विशेषणत्वे" इत्युक्तावपि । तस्य देशकालवयोवस्थादिनानापदार्थ–घटितपद्यवाक्यार्थस्य ।

सहृदयैरिदं वेदनीयम् = पूर्वं "स्वदेव काव्य" मिति साहित्यदर्पणकारोक्त काव्य–लक्षण–खण्डनप्रसङ्गे "अर्थमात्रस्य विभावानुभावव्यभिचार्यन्यतमत्वात्" इति दिशा सर्वोऽपि पदार्थः विभावादिस्वरूपोऽनुमतः, सम्प्रति देशकालवयोऽवस्थादिनानारूपः स एव पदार्थः विभावादिभिर्भिन्नः कथ्यते । किमेतत्पूर्वापरविरुद्धं पण्डितराजस्य लेखनम् । देशः, कालो, वयः, अवस्था इत्ययं पदार्थः उद्दीपनविभावः सर्वानुमतः । आदिपदसङ्ग्राह्यो व्यापाररूपः सर्वः पदार्थोऽनुभावः । एवं च कुतोऽतिव्याप्तिः । ततश्च विभावानुभावभिन्नत्वे सति शब्दभिन्नत्वे सति रसव्यञ्जकत्वं भावत्वमिति लक्षणं सम्पन्नमिति ।

अथ किं भावत्वमिति प्रश्नस्योत्तरणे पक्षान्तरमुद्भावयति–नापीति । ननु रसाभिव्यञ्जिका या चित्तवृत्तिस्तत्त्वं भावत्वमित्येवास्तु तल्लक्षणमिति चेन्न । तथा सति भावादिचर्वणायां भावलक्षणस्यातिप्रसक्तिः। यतो हि चर्वणा आस्वादः चित्तस्य वृत्तिः परिणामविशेष एव । सा च व्यञ्जिकाऽपि । अतस्तदतिप्रसङ्गवारणाय चर्वणाविषयेति चित्तवृत्तेर्विशेषणमुपन्यासि । चर्वणा स्वयं चर्वणाविषया नहि भवति ततस्तद्दोषमुक्तिः ।

ननु तथा निवेशेऽपि भक्षितेऽपि लशुने न शान्तो व्याधिर्यतः ।

कालेति । सा बाला विरहिणी कालागुरोर्द्रवं नितरां हालाहलतुल्य विषसदृशं विजानती जानाना नीलोत्पलमालामपि नीलकमलस्रजमपि व्यालावलिं सर्पाणामालिमामनुते स्वीकरोति।

इत्यत्र पद्ये कालागुरुद्रवविशेष्यके हालाहलसदृशत्वप्रकारके ज्ञाने भावलक्षणस्यातिव्याप्तिः। यतस्तादृशं ज्ञानमत्र विप्रलम्भेऽनुभावो न तु व्यभिचारी भावः। अथ च स ज्ञानस्वरूपोऽनुभावः रसाभिव्यञ्जकचर्वणाविषयः चित्तस्य वृत्तिश्च । तस्य ज्ञानस्य ।

प्रकारान्तरेण लक्षयति–नापीति । अखण्डं किञ्चिद्धर्मपुरस्कारेणभानरहितं भावत्वम् । तदपि न । तत्त्वे अखण्डभावत्वे प्रमाणं नास्तीति भावः । अत्र एवं स्थितौ उच्यते भावलक्षणमिति

शेषः।

निर्विकारात्मके चित्ते भावः प्रथमविक्रियेत्यादिपक्षत्रयं तु रसाभिव्यञ्जक चर्वणाविषयचित्तवृत्तित्त्वमिति भावलक्षणसमालोचनयैव गतमतो न पृथगालोचनमपेक्षते इत्यस्माभिरुपेक्षितमिति बोध्यम् ।

विभावेति । विभावः आदिपदार्थोऽनुभावः। ताभ्यां व्यज्यमानः काव्यश्रवण–प्रेक्षणानुभवनकालीनव्यञ्जनाज्ञानविषयो यो हर्षाद्यन्यतमस्तत्त्वं भावत्वम् । यदाहुरिति स्वकपोलकल्पनानिरासार्थं प्रमाणमुपन्यस्यति अञ्जितः व्यज्यमानो व्यभिचारी भावः निर्विकारात्मकचितस्य वृत्तिः परिणाम इति यावत् ।

स्थायिभावन्यायेनेति । अयं भावः। यथा शब्दप्रधान–गीतकाव्यश्रवणात्, अर्थप्रधान–दृश्यकाव्यदर्शन–शब्दार्थोभयप्रधान–नलचम्पूरघुवंशादिपाद्य–काव्य–पठनात् प्रथमं दुष्यन्तत्वशकुन्तलात्वादिना चन्द्रत्वोद्यानत्वादिना प्रतीतिः, पश्चात्स हृदयतासहकृतभावनमहिम्ना दुष्यन्तत्वादिपरिहारेण रत्याद्यालम्बनोद्दीपनविभावत्वादिनोपस्थितौ व्यञ्जनया सामाजिकगतः स्थायी रत्यादिरभिव्यज्यते तथैव स्थायिभावन्यायेन पूर्वप्रदर्शितस्थायिभावसिद्धान्तेन तादृशकाव्यात् पूर्वं दुष्यन्त तच्चेष्टयोरवगतिः, पश्चात् सहृदयतावशोन्मिषितभावनामाहात्म्येन दुष्यन्तत्वस्य तथा तच्चेष्टागततदीयत्वस्य च परिहारात्, रत्यादिविभावत्वानुभावत्वाभ्यां व्यञ्जकविभावानुभावयोरुपस्थितौ ताभ्यां व्यञ्जनया सामाजिकगतानां हर्षादीनां व्यभिचारिणामभिव्यक्तिरिति ।

सापीति । सामाजिकगतानां हर्षादीनां स्थायिभावन्यायेन अभिव्यक्तिरपि रसन्यायेन साक्षिभास्यान्तःकरणधर्मव्यंजकविभावानुभावचर्वणावशात् निरावृतानन्दस्वरूप–चित्तादात्म्यापन्नः सामाजिकगतो हर्षादिर्व्यज्यते । इत्येवं रससिद्धान्तोऽत्रानुगृहीतः । इति केचिद्वदन्ति । ननु रसस्थले विभावः आलम्बनोद्दीपनरूपेण विवक्षितः । अत्र भावध्वनौ तु सः सामान्यतो निमित्तकारणं, तत्कथं रसन्यायोऽत्रानुगृहीत इत्यत आह–अपरे मन्यन्ते – व्यङ्ग्येति । रसेभ्योऽन्यत् यद् व्यङ्ग्यं वस्तु अलङ्कारो वा तन्न्यायेन तद्रीत्या सामाजिकगतानामेव हर्षादीनामभिव्यक्तिः । अत्र निरावृतानन्दस्वरूपचित्तादात्म्यं हर्षादिषु नास्तीति हेतोः रसाङ्गता एषां दर्शिता न तु रसन्यायोऽत्रानुगृहीतः।

विभावेति, नत्विति च । अयमत्राक्षरसङ्गतिः। अत्र काव्ये एकस्मिन् कस्मिन्नपि व्यभिचारिणि हर्षादौ व्यज्यमाने विभावानुभावौ व्यञ्जकौ स्वीकृतौ तु व्यभिचार्यन्तरं व्यज्यमानव्यभिचारितोऽन्यो व्यभिचारी अवश्यं व्यञ्जकतया अपेक्ष्यते । ननु कुतो नापेक्षित इत्याह–तस्येति तस्य । व्यज्यमानव्यभिचारिभिन्नव्यभिचारिण एव प्राधान्यापत्तेः पार्यन्तिकव्यङ्ग्यान्तरापेक्षया गुणीभूतत्वेऽपि वाच्यापेक्षयाऽतिशयितचकारप्राप्तेः प्राधान्यादिति हृदयम् ।

ननु यो हि वक्तुस्तात्पर्यविषयीभूतोऽर्थस्तस्यैव प्राधान्यं, तात्पर्यं च प्रकरणाद्यधीनं, प्रकरणाद्यभावे तात्पर्याभावः। ततो न प्राधान्यप्राप्तिरिति वस्तुतत्त्वमाह वस्तुत इति । तदीयेति। प्राधान्यमनुभवतो भावस्य सामग्र्या विभावानुभावाभ्यां व्यङ्ग्यस्यात एव नान्तरीयकतया अव्यभिचारित्वेन स्थितस्य सूक्ष्मस्यान्यस्य व्यभिचरिणोऽङ्गता अस्तु न कापि क्षतिः। नन्वेवमङ्गतायां गुणीभूतव्यङ्ग्यता स्यादित्येव क्षतिरित्यत्राह–न चेति । प्रधानभावीयसामग्र्या व्यज्यमानतायां न गुणीभूतव्यङ्ग्यता तत्र तु तस्य व्यञ्जकत्वमेव, प्रधानभावीयसामग्रीतः पृथक् सामग्र्या विभावानुभावाभ्याम् । अत एव पृथक् सामग्रीव्यक्तत्वादेव । अनान्तरीयकस्य अव्यभिचरितसम्बन्धरहितस्य भावान्तरगुणीभूतस्यैव अन्यस्मिन् भावे गुणतां गतस्यैव न तु स्वतन्त्रस्येत्यर्थः भावस्य व्यक्तस्य गुणीभूतव्यङ्ग्यता स्यादिति भावः ।

प्रतिपक्षेति । प्रतिपक्षः शत्रुः । तत्कृतो यो धिक्कारः धिक् शब्दोच्चारेण तिरस्कारः तज्जन्मा । ''व्यभिचारी तथाञ्जितः'' इत्यंशानुसारं निरुद्य ''रतिर्देवादिविषया'' इत्यंशमनुसरन्नाह–गुरुदेवेति । अदो हृदयम् ।

''रत्यादिश्चेन्निरङ्गः स्याद्देवादिविषयोऽथवा
अन्याङ्गभावभाग्वा स्यान्न तदा स्थायिशब्दभाक्''
''उद्बुद्धमात्रः स्थायी च भाव इत्यमिधीयते''
''रसावस्थः परं भावः स्थायितां प्रतिपाद्यते''
''रत्यादयोऽप्यनियते रसे स्युर्व्यभिचारिणः''

इत्युक्तदिशा उद्बुद्धमात्रा अप्राप्तरसावस्था कान्तविषया रतिर्न केवला, अपि तु तादृशः अन्याङ्गभावं प्राप्तो हासादिरपि भावपदाभिधेयो भवतीति ।

चतुस्त्रिंशदिति । इदन्तु बोध्यम् । भरतादिभिः नाट्यशास्त्रादौ सर्वत्र त्रयस्त्रिंशदेव व्यभिचारिणो नामतः क्वचिच्च लक्षणोदाहरणाभ्याञ्च निर्दिष्टाः, साहित्यदर्पणकारेण त्रयस्त्रिंशदित्युपलक्षणमित्युक्तम् । अतो बहवो भेदा अन्येऽपि सन्तीति पण्डितराजेन चतुस्त्रिशंदिति निर्दिष्टमिति ।

मुनिवचनेति । अत्र मुनिपदेन प्रथमो मुनिर्भरतः; द्वितीयश्चाऽग्निपुराणनिर्माता बोध्यः।

इष्टेति । अथेदानीं व्यभिचारिभावाः सलक्षणोदाहरणा निरूप्यन्ते । अत्र एकैकशो भावस्य विभावानुभावौ प्रदश्यौं तत्र कुत्रचिद् ग्रन्थकृता स्वयमेव लिखितौ तौः क्वचिन्मया।

इष्टस्य प्राप्त्यादिभिः । अत्र आदिपदार्थः तदुक्तमित्यादिनोद्धृतः ।

संस्कारेति । सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः। अत्राद्यपदार्थः एकसम्बन्धिज्ञानमपरसम्बधिनः स्मारकमिति नयेन सम्बन्धिज्ञानादिः । स्मृतिबीजं संस्कारः। तज्जन्यं ज्ञानं स्मृतिरिति स्वीकारे अनुमितिकरणं व्याप्तिज्ञानं तत्संस्कारोऽवान्तरव्यापारः इति वदतां मते संस्कारजन्यत्वस्य अनुमितावनुगमादनुमितेरपि स्मृतित्वापत्तिः। ततश्च मात्रपदमुपन्यसनीयं तत्र न केवलं संस्कार अपेक्षितः व्याप्तिज्ञानमपीति हृदयम् । अनुद्बुद्धादपि संस्कारात्मृतिर्मा जन्यतामिति संस्कारः उद्बुद्धत्वेनविशेषणीयः । एवञ्च उद्बुद्धसंस्कारमात्रजन्यं पूर्वानुभूतार्थविषयकं ज्ञानं स्मृतिरिति लक्षणं सम्पन्नम् । संस्कारध्वंसेऽपि संस्कारजन्ये एतल्लक्षणस्यानतिप्रसक्तिः ।

सायमिति । सायन्तनं सायंसामयिकं निमीलनोन्मुखं यदम्बुजं कमलं तत्सहोदरं तत्सदृशं लोचनं नयनं यस्यास्तस्याः । लोचनमपि निधुवनानन्देन निमीलितं भवति ।

अत्र स्मृतिभावे चिन्ताविशेषो मञ्जुमन्दहसितादिविषयिणी चिन्ता विभावः। भ्रुवोरुन्नमनं, गात्रस्य निश्चलत्वादयः स्तब्धत्वप्रभृतयोऽनुभावाः । पुरः स्फूर्तिकत्वात् बोधे प्रथमविषयत्वात्, आनन्दजनकत्वाच्च चमत्कारित्वाच्च तद्ध्वनित्वं स्मृतिरूपभावध्वनित्वम् ।

ननु तन्मञ्ज्वित्यत्र तच्छन्दाः मञ्जुमन्दहासादिषु स्वसंवेद्याव्यपदेश्यानन्त–गुणविषयकस्मृतेः प्रतिपादकाः, ततश्च स्मृतित्वेन स्मृतेर्वाच्यत्वात् कथं स्मृतिभावध्वनित्वमित्याशङ्काकायामाह–तदादेरिति । शङ्ककस्यायमाशयः। तदादेः बुद्धिस्था बुद्धिविषया ये प्रकाराः दिलीपत्वरघुत्वाजत्वधेनुत्वादयः तैरवच्छिन्ने तैर्विशिष्टे दिलीपादौ

शक्तिः। एवं तदादिभ्यः दिलीपत्वादिनानाधर्मैः दिलीपादीनां ज्ञानं सर्वैरभ्यूहितम् । तच्च ज्ञानं दिलीपत्वादेर्विभिन्नधर्मस्यानुगमकमेकं धर्मं विनाऽनुपपन्नं शक्यतावच्छेदकानामने– कत्वादिति शक्यतावच्छेदकानामनेकेषामनुगमिका एका बुद्धिर्ज्ञानं स्वीकृता । एवञ्च शक्यो दिलीपादिः। शक्यतावच्छेदकं दिलीपत्वादि । तन्निष्ठायाः शक्यतावच्छेदकताया अवच्छेदिका बुद्धिः स्वीकृता। तत्र सामान्यतो बुद्धित्वेन सङ्गृहीता बुद्धिविशेषभूता स्मृतिरपि शक्यतावच्छेकांशे निविष्टैव। एवञ्च स्मृतित्वेन स्मृतेः शक्यत्वात् कथं तस्या ध्वनित्वमिति। उत्तरयितुरयमाशयः। तदादिस्थले बुद्धेरनुगमकत्वं नाम उपलक्षकत्वमेव न तु विशेषकत्वम्। तथा च बुद्धिरत्रोपलक्षणीभूतैव न तु विशेषणीभूता। विशेषणीभूतस्यैव पदार्थस्य शाब्दबोधे भाननियमात् बुद्धेः शक्यतावच्छेदकांशेऽप्रविष्टत्वं ततश्च बुद्धिविशेषभूतायाः स्मृतेः शाब्दबोधेऽभानेनावाच्यत्वाद् ध्वनित्वमेवेत्येकं मतम् ।

बुद्धिस्थत्वमिति। बुद्धिस्थो नाम बुद्धिविषयः प्रकारताख्यविषयतासम्बन्धेन बुद्धिविशिष्ट इत्यर्थः । तत्त्वं बुद्धिविशिष्टे घटत्वादौ निष्टं बुद्धिस्थत्वं, तत्र विशेषणीभूता बुद्धिः । सा शक्यतावच्छेदकानामनुगमिका उपलक्षिका नास्ति किन्तु शक्यतावच्छेदिकैवेति नयेऽपि बुद्धिस्थत्वेन बुद्धिः शाब्दबोधे प्रविष्टा न तु स्मृतिः, स्मृतेः बुद्धिविशेषरूपत्वान्न तयोरेकत्वम्। तेन च स्मृतित्वेन स्मृतेरवाच्यत्वात्तस्या व्यक्तिवेद्यतैवोचितेति शेषः। इति ।

तस्याश्चेति । तस्याः स्मृतेः । वाक्यवेद्यत्वेऽपि तत्, तानि, सेति पदानां समूहो वाक्यमिति नये वाक्येन गम्यत्वेऽपि । पदस्यैव तदित्यादि प्रत्येकपदस्यैव कुर्वद्रूपत्वात् बहूनामनुरोधो न्याय्य इति नियमात् तत्, तानि, सेति प्रत्येकानां बहूनां पदानां व्यञ्जकत्वात् पदध्वनिविषयत्वमेवेति; कुर्वत् व्यक्तीकरणरूपफलोन्मुखं रूपं यस्य, तस्य भावः कुर्वद्रूपत्वं क्षेत्रोप्तवीजस्यैवोत्पत्तिर्न तु कुसुमलस्थस्येति अङ्कुररूपकार्यं प्रति कुर्वद्रूपं कारणमिति भावः।

एतेनेति । एकावयवसंस्थेन भूषणेनेव कामिनी

पदद्योत्येन सुकवेर्ध्वनिना भाति भारतीत्युक्त्या। परास्तं पराहतम्। सायन्तनाम्बुजस्य उपमानेन उपमानतया निर्देशेन । तस्याः कान्तायाः। आनन्दमग्नतायाः आनन्दसुधोदधौ ब्रुडनस्य प्रकाशो ज्ञानम् ।

दरेति । दरमीषत् आनमन् प्रह्वीभवन् । कन्धरबन्धो ग्रीवाबन्धनं यस्मिन् सङ्गे । ईषन्निमीलिते स्निग्धे स्नेहयुते विलोचने अब्जे इव यस्मिन् । अनल्पानामधिकानां निःश्वासानां भरः पूर्णता । भावे अप्प्रत्ययः ऋदोरप् । यस्मिन् । अलसानि अङ्गानि यस्मिन् इमानि चत्वारि सम्गस्य दिव्यक्रियाया विशेषणानि । चिरं चिरकालं याबत् ।

स्निग्घत्वं स्नेहयुक्तत्वं विलोचनयोरेव विशेषणं न तु अब्जयोः, तेन अब्जे इव विलोचने इत्युपमैव । निवेदनादव्यङ्ग्यत्वात्स्मरामीत्यनेन वाच्यत्वादित्यर्थः । अन्यस्य तु सादृश्यामूलकस्य तु ।

ननु भावोऽपि नास्ति, स्मरणालङ्कारोऽपि नास्ति, तर्हि पद्यमेतत्कस्योदाहरण–मित्याकाङ्क्षायामाह–किंत्विति । किन्तु शृङ्गारस्योदाहरणमित्यर्थः । ननु तदपि कथमित्यत आह–विभाव एवेति । एवकारस्याऽयंभावः । यादृशं सौन्दर्यं नायिकारूपस्य विभावस्य वर्त्तते तादृशमनुभावसञ्चारिणोः नास्तीति । अतोऽसुन्दरत्वादेव कथञ्चिदित्युक्तिः। अत्र कन्धराया दरानमनं, प्रफुल्लयोः स्नेहयुक्तयोर्निमीलनमनुभावौ, ताभ्यां व्यक्ता व्रीडा निःश्वासानामनल्पत्वेन, भरेण, अङ्गानामलसत्वेन च व्यङ्ग्या दिव्यक्रियायां तीव्रता, तया व्यक्तो श्रमश्च सञ्चारिणो भावाः।

कुचेति । सपुलकतनु यथा स्यात्तथा मामकीनं नखाङ्कमालोकमाना आलोचनं कुर्वती एव गवाक्षे विनिहितवदनं मां वीक्ष्येत्यन्वयः ।

अयं भावः । यस्मिन् समये कुचयुगलान्तःस्थनखाङ्कं पश्यन्ती सपुलकत्वञ्चानुभवन्ती आसीत् तस्मिन्नेव समये तादृशीं तां पश्यन्तं प्रियं सा वीक्षाञ्चक्रे । तदनन्तरं च सा चकितत्वम् ''अयमिदमवस्थां मामपश्यदि''ति त्रासम्, तत्कार्यमङ्गानां च नम्रीभावमधोमुखत्वादिकं, तथा लज्जया पुनर्दर्शनवर्जनार्थं कुटिलत्वं तिर्यग्भावं च भजन्ती सद्यः सद्म विवेशेति ।

एवञ्चात्र प्रियाकर्त्तृकं तादृगवस्थप्रियकर्मकं, प्रियकर्त्तृकं तादृगवस्थप्रियाकर्मकं च दर्शनं विभावः । अधोमुखत्वादिकम्, कुटिलत्वपुरःसरं सद्यः सद्मप्रवेशनं चानुभावौ।

चकितनतनताङ्गीत्यत्र पाठक्रमादर्थक्रमो बलवानिति न्यायात् पूर्वं चकितत्वं, नताङ्गीत्वं पश्चान्नतत्वमित्यन्वयोऽत्र विहितः । नतनताङ्गीत्यत्र नतपदयोरर्थभेदः । नता नगरपाद्यां स्यान्नतं

कुटिलनम्रयोरिति कोषानुसारम् ।

इदन्तु बोध्यम् । नायिकाकर्त्तृकेत्यत्र नायिका स्वकुचान्तर्वर्त्तिप्रियनखक्षतान् अवलोकयति इत्यन्वयः निजस्वात्मादिपदार्थानां प्रधानक्रियाकारकपदार्थे एवान्वय इति व्युत्पत्या समीचीनः प्रतिभाति । अतः नायिकाकर्त्तृकस्वकुचान्तर्वर्त्तीति पाठः श्रेयान् । नायिकाकर्त्तृकतत्कुचेति पाठे ''तत्पदार्थः पूर्वोक्तं कमप्यर्थमपेक्षते इति नयेन पूर्वं तेनेतिपदार्थः प्रियरूपः । तस्य नायकस्य कुचयोरित्यर्थोऽसङ्गत एव स्यादिति ।

प्रयोज्या जन्या । मोहः चित्तस्य निमीलनम् । कल्लोलिन्याः नद्याः कूले । किंचिदाकुञ्चिते तिर्यक्कृतेऽक्षिणी येन सः । कान्तया अपेतो रहितः । तैर्जनितस्य उपप्लवस्य उपद्रवस्य निवारणे दूरीकरणे कारणम् । धृतिः स्पृहायाः समाप्तिः सन्तोष इति यावत् ।

नन्वित्यनेन शङ्कते । चिन्ता नास्तीति वस्तुनोऽभिव्यक्तेः सद्भावे अस्य पद्यस्य धृतिभावध्वनित्वमर्थात् धृतिभावध्वनेरुदाहरणत्वं कथं स्यादिति शङ्का । उत्तरयति । तस्य चिन्ता नास्तीति वस्तुनः धृत्युपयोगितया धृत्यङ्गतया एवाभिव्यक्तेः; न तु स्वतन्त्रतया अङ्गित्वेनेत्यर्थः ।

शयितेति । अत्र नायिका विरहेण एतादृशी इयती दूना यत् प्रियस्य मधुर वीक्षणैरेव सत्कारं करोति न तु स्वागतं व्याजहार, न च प्रत्युत्थनं, प्रत्युद्गमं, चरणनिपतनम–भिवादमाश्लेषञ्च चकार इति तेषां निवृत्तिरस्ति । कारणाभावात् रत्यध्वगत्यादीनां कारणानामभावादित्यर्थः ।

दैन्यं नाम अनौजस्यं निस्तेजस्कत्वमोजसोऽभावेन सञ्जातम् ।

हतकेनेति । हतकेनेत्यत्र इवार्थे कन्, ततः हतसदृशेन । मयैव न तु अन्येन केनचित् । या मां वनवासेऽतिदुःखबहुलेऽपि स्थाने समये च नात्याक्षीत् सा सती पतिव्रता। सहसा अग्न्यादिदेवैः शुद्धात्वेन प्रमाणिता, रावणशोकवाटिकायां हनूमता महावीरेण सर्वतो भावेन प्रामाणिकेन पुरुषेण निर्दुष्टतया प्रत्यक्षीकृतेत्यादि विचारमकृत्वेत्यर्थः । परा सरस्वती परा विद्या । द्वे विद्ये वेदितव्ये परा अपरा चेति । तत्र परा विद्या श्रुतिरित्यर्थः ।

चिन्तेति । अत्र चिन्तेति पाठो न तु चित्तेति । चित्तगतमेव औत्सुक्यं भवति । नान्यस्मिन् । अतः औत्सुक्यं शुद्धं नास्ति चिन्तामिश्रितं तदिति द्योतयितुं तथा पाठः

साधीयान् । तथासत्त्वे एव चिन्तौत्सुक्यादिरूपविभावत्रयत इति नागेशोक्तिरपि साधीयसी स्यात् ।

जात्यैवेति । जन्मसंस्काराभ्यां समन्वयात् त्रयो वर्णाः द्विजातयः। संस्काराभावात् चतुर्थः शूद्रस्तु एकजातिः । इति स्मृतेः केवलजात्या । तेनैव ब्राह्मणेनैव । तथाविधं श्रुतिदौर्लभ्यजनकम् । तस्य रामस्य पतितेन श्रुतिरहितब्राह्मणेन । तस्याश्च सीतायाश्च श्रुत्या साम्यमिति शेषः । मयेति । योऽहं यस्याः सङ्गमे सुखमेवान्वभवम् न कदाचिदपि दुःखलेशमपि तेन मयेति उपदानलक्षणा । यस्याः सङ्गमे दुःखानुभवकर्त्तृत्वरहितत्वे सति केवलसुखानुभवकर्त्तृत्वं मत्पदस्य लक्ष्यतावच्छेकम् । या कठिने देशे समयेऽपि नात्याक्षीत् सेति उपादानलक्षणा । कठिनस्थानसमययोरपि अत्यागकारिणीत्वं लक्ष्यतावच्छेदकम् । तदेव दैन्यमेव तादृशलक्षणामूलध्वनिभ्यां, लेशतः अल्पतया प्रतीयमानया सा वनवाससखीत्येव रूपया स्मृत्या च परिपोष्यते ।

चिन्तेति । इदं तु बोध्यम् । चिति स्मृत्यामिति धातोः चिन्तेतिपदं निष्पन्नं स्वीकृतं चेत्, स्याच्चिन्ता स्मृतिराध्यानमिति कोषोऽनुकूलः । परं व्यभिचारिभावलक्षणकृद्भिः सर्वैरपि स्मृतिचिन्तयोः भिन्नत्वमुररीकृतम् । पूर्वत्र केवलसंस्कारो नियमेन अपेक्षितः। परत्र संस्कारनियम उपेक्षित इति । चिन्ताया मूलं निर्वेदजनकं वस्तु । इष्टस्यापहृतिरपहरणं विभावः ।

अधरेति । पल्लवस्य सर्वस्यापि पलाशस्य सौन्दर्यमस्तङ्गतमिति भावः । तदप्राप्तिः मृगीदृशोऽलाभः । ''कस्य पुरुषस्य कृते'' इत्येवं सामान्योल्लेखात् अनिर्धारितमनिश्चितं धर्मिणं पुरुषविशेषमवलम्ब्य जायमानायाः चिन्ताया एव प्राधान्यम् । यदि मृगीदृग् वाञ्छिता भवेत्, अथ च केनोपायेनेयं शीघ्रं लभ्येतेत्येवं रूपेण कालक्षेपासहिष्णुत्वमुपायान्वेषणपुरःसरं भवेच्च तदौत्सुक्यस्याऽपि प्राधान्यं स्यात् परं तथा नास्तीति मत्या सतोऽपि औत्सुक्यस्य प्राधान्येनाबोधनादित्युक्तम् ।

अव्यक्तानि अस्पष्टाक्षराणि असङ्गतानि असम्बद्धार्थानि वाक्यानि तैः । सुकुमारस्खलद्गत्येत्यत्र स्खलन्ती चासौ गतिश्च । सुकुमारा या स्खलद्गतिस्तया च । तन्निष्ठः क्षीबगतो मदः । तद्ध्वन्युपस्कारकत्वं मदध्वनेरङ्गत्वमेव स्वभावोक्त्यलङ्कारस्य ।

'ननु क्षीबृ मदे इत्यस्माद् धातोः क्षीबते माद्यति इत्येवं कर्त्तरि ''अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः'' इति निपातनात् क्षीबो मदयुक्तः इत्येवं साधु । ततश्च क्षीबपदेन मदयुक्तार्थकेन विशेषणविधया मदस्य वाच्यत्वमेव न ध्वनित्वम् । एवं च मत्तस्वभाववर्णनात्मके पद्येऽत्र स्वभावोक्त्यलङ्कार एवेति उदाहरणान्तरमाह–इदं वा पुनरिति ।

तदुपमेयतया अम्बुजोपमेयतया । पोषयत इत्यत्र ग्राम्योक्तिः, तादृशनिरूपणं चेति द्वयोः कर्त्तृत्वम् । बहुतरेति । बहुतरेण शरीरभवेन व्यापारेण जन्म यस्य । निःश्वासश्च अङ्गसम्मर्दश्च निद्रादिश्चेति तेषां कारणीभूतः ।

सुषुप्ताविति । मनसा सह त्वचो योगो जन्यज्ञानमात्रे कारणं, सुषुप्तौ हि त्वचं विहाय निद्रानाड्यां पुरीतति मनसा ज्ञानानुत्पादनम् । पुरीतदवच्छिन्नात्ममनोयोगः सुषुप्तिः। ततश्च ज्ञानराहित्येनैव यत्नस्य राहित्यमभावः, यत्ने हि ज्ञानस्य कारणत्वमस्ति । यत्नाभावे हि मन्दमपि स्पन्दितुं न क्षमासीदित्यस्य कथनस्य किमपि प्रयोजनं नास्ति । इत्यापत्तिः स्यात् । नास्ति अतिप्रयोजनं यस्येति अनतिप्रयोजनकं तस्य भावस्तत्त्वम् । ननु स्पष्टप्रतिपत्तये तत्कथनमस्तु तत आह–शीङेति । ''हृदये शयाना'' इत्येवं शयनकर्त्र्याः विशेषणविधया शीङ शीङ् धातुना अभिहिततया उत्कतया तस्या निद्रायाः व्यङ्ग्यत्वस्यानुपपत्तेरसङ्गतेश्च।

रूपेति । रूपेण, धनेन, विद्यादिभिर्वा प्रयुक्तः अर्थात् तन्निमित्तकं यत् आत्मन उत्कर्षस्य ज्ञानम् । अहं रूपादिभिः सर्वोत्कृष्टः इत्याकारकम् । तदधीनं ज्ञानहेतुकं यत्परेषाम् स्वस्माद्भिन्नव्यक्तीनामवहेलनं अवज्ञा–स गर्वः।

आमूलादिति रत्नसानोः सुरालयसुमेरोः । मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः इत्यमरः। मूलात् आ पर्यन्तम्, उत्तरस्यां दिशीत्यर्थः । मलयेन वेष्टितात् पयोधेः समुद्रस्य कूलात् तीरात् आ पर्यन्तम्, दक्षिणस्यां दिशीत्यर्थः यावन्तः यावत्संख्याकाः । काव्यस्य प्रणयने निर्माणे पटवः चतुराः कवयः सन्ति । ते सर्वेऽपि विशङ्कारहितं यथास्यात्तथा वदन्तु कथयन्तु । मृद्वीकाया द्राक्षायाः मध्यान्निर्यतो निर्गच्छतो मसृणस्य स्निग्धस्य स्नेहोत्पादकस्य रसस्य झरी प्रवाहः तस्याः, माधुर्याः भाग्यं भजन्ति यास्तासां वाचां वाणीनां काव्यानामाचार्यतायाः गुरुतायाः पदं स्थानमनुभवितुं प्राप्तुं मदन्यः मदतिरिक्तः धन्यः कोऽस्ति ।

परान् स्वेतरान् अधिक्षेप्तुं पराणि, यानि एतादृंशि । सर्वदिग्भवाः कवयो विशङ्कं वदन्तु, वाचामाचार्यतायाः पदमनुभवितुं मदन्यो धन्यः क इति रूपाणि वाक्यानि, तेषां प्रयोगः उच्चारणम् । इमं गर्वम् । असूयाऽपि अन्यकविगतकाव्यप्रणयनपाटवे दोषारोपोऽपि। असूया दोषारोपो गुणेष्वपि । लेशतः अल्पमात्रायाम् । गूढगर्वव्यभिचारितयाङ्गतां गतः। अयं एतत्पद्यगतगर्वस्तु प्रधानः प्रधानीभूतः । तस्माद्वीररसादस्य गर्वस्य विशेषो भेदः।

श्रमेति । श्रमादीत्यत्र आदिपदात् क्लान्तिः मदादिश्च ग्राह्याः। चेतसः पुरीतति नाड्यां प्रवेशात् सम्मीलनं निश्चलत्वम् । श्रान्तिक्लान्तिमदादयो विभावाः। दोषा रात्रिः। प्रातर्बोधितापीत्यन्वयः ।

शास्त्रेति । निशंकं यथास्यात्तथा तदर्थस्य शास्त्रीयार्थस्य अनुष्ठानमाचरणम्, संशयानामुच्छेदादयः । अत्र नीतिमार्गानुसरणेन अनुभवेन, प्रत्यक्षादिना वा शास्त्रादिविचारो विभावः। वितृष्णता–धृति–सन्तोषात्मनो बहुनिर्णायकतादयोऽनुभावाः।

रोगेति । रोगात्, प्रियस्य विरहादेर्वा प्रभव उत्पत्तिर्यस्य सः। तस्य प्रियस्य यः उदन्तो वृत्तान्तः, तत्परे तदभिलापनसंलग्ने । प्रियस्यानागमनादतिदीनां दृष्टिम् ।

भीरोरिति । भयङ्करसत्वदर्शनादयो विभावाः। चित्तवृत्तिविशेषो मनसः क्षोभ इत्यर्थः।

आलीष्विति । आलीषु सखीषु केलीरभसेन क्रीडावेशेन मुहुर्वारं ममालापं मत्सम्बन्धिनीं वार्त्तामालपन्ती कथयन्ती बाला । आरात् समीप एव मदीयां गिरं वाणीमुपाकर्ण्य श्रुत्वा सौदामिनीयां सुषमां शोभामयासीत् प्राप्नोत् । विद्युद्यथा क्षणं प्रभति परतस्तिरोभवति तथैव वचनाकर्णनोत्तरं सद्यः सद्मानुविवेशेति भावः । पत्या स्ववचनाकर्णनमित्यत्र "शेषे विभाषा" इति वार्तिकं सामान्याभिप्रायं मन्वानानां केषञ्चिन्मतेन तृतीयाऽपि, षष्ठी तु भवत्येव। यथा शब्दानुशासनमाचार्येण आचार्यस्य वा । अत्र तु शुद्धा लज्जा वर्त्तते । भीरोर्घोरसत्वादिरूपलक्षणस्याऽप्रवृत्तेः । औत्पातिकहेतुभिर्जन्यो मनःक्षोभो हि त्रासपदार्थः।

निद्रारूपो यो विभावः कारणं, तदुत्थं ज्ञानं सुप्तम् स्वप्न इत्यर्थः। वस्तुतस्तु निद्रास्वप्नयोरविनाभावः सम्बन्धः नियतसम्बन्धः इति यावत् । निद्रा स्वप्नस्य मुख्यं कारणं नास्ति । यतो हि सर्वे स्वपन्ति किन्तु नास्ति नियमो यत् सर्वे स्वप्नं पश्यन्ति एव। अतः निद्रा सहकारिकारणं स्वप्नस्य मुख्यं कारणं तु अदृष्टम् । अतो निद्राऽविनाभावोत्थं

ज्ञानं सुप्तमिति समुचितः पाठः प्रतिभाति ।

निद्रासहकृतमदृष्टं स्वप्नस्य विभावः । निद्रायां सुषुप्तौ हि मनसः हि, पुरीतति नाड्यां प्रवेशादव्यापारोऽतो ज्ञानं नहि भवति । ततश्च स्वप्नस्य स्वरूपमुक्तमेव ज्यायः ।

न त्वस्य स्वप्नस्य । अस्माज्जन्यमिदं जन्यं न इदं जन्यमनिदं जन्यं तस्य भावस्तत्त्वात् । अत्रेदंपदस्यार्थः स्वप्नः । तेन स्वप्नजन्यत्वाभावो नेत्रनिमीलनादाविति भावः । इत्यादि उक्तं तद् इति ध्येयमित्यन्वयः । इतीति किम्–स्वप्नापेक्षया अन्यथा प्रकारान्तरेण निद्रातः सिद्धानां जातानामपि तेषां नेत्रनिमीलनादीनाम् । एतस्मिन् भावे स्वप्नाख्ये व्यापकत्वात् सिद्धत्वात् ।

मृषा मिथ्या भाषणं भाषा तस्याः सिन्धो? समुद्र ! । अविरलं निरन्तरं यथा स्यात्तथा गलन्तो बाष्पाः अश्रूणि यस्यास्ताम् । निरस्तानि दूरीकृतानि भूषणानि आभरणानि यया ताम् । स्वप्नावाप्तेः पुरःस्फूर्तिकतया प्रथमं बोधविषयतया । प्रान्ते पार्यन्तिके बोधे । न ईष्टे समर्थ इत्यत्र कर्त्ता स्वप्नध्वननम् ।

अविद्यायाः मूलाविद्यायाः। ध्वंसेन जन्यममुं विबोधम् । तस्मिन् विबोधे अनौचित्यविषयकविगमे सति । परस्य विबोधस्य मुखं निरीक्षते । वारिवाहनादेन मेघध्वनिना। तन्नाशस्य स्वप्ननाशस्य । अस्य विबोधस्य । चेतनेति चेतनापदेन विबोधस्य वाच्यत्वादभिधेयत्वाद् ध्वनित्वं नास्तीति नोदाहार्यमित्यन्वयः।

परेण कृताया अवज्ञायाः तिरस्कारस्य । आदिपदाद् भर्त्सनायाः । प्राग्वत् यत्र २ लक्षणेषु पूर्वं जन्मेति जन्येति पदमुपन्यस्तं तद्वत् । जन्यपदात् सर्वेषां कारणानां विभावत्वम् । कार्याणामनुभावत्वम् । यथात्र प्रकृते परकृतावज्ञादीनां विभावत्वम् । मौनवाक्पारुष्यादीनामनुभावत्वम् ।

वक्षोजेति । वक्षस उरसः सकाशाज्जातयोरुत्पन्नयोः कुचयोरग्रं पाणिना आमृश्य स्पृष्ट्वा द्राग् सत्वरं यातस्य गतस्य प्रियस्य नायकस्य आननाब्जं मुखकमलं शोणाग्राभ्यां रोषात् रक्ताग्राभ्यां लोचनाभ्यां नयनाभ्यां जोषं जोषं निर्निमेषं दृष्ट्वा दृष्ट्वा जोषमेव तूष्णीमेव । भामिनी, (भाम क्रोधे) रुष्टा नायिका । अनुनयं विनयं वा हावभावादिकं वा अकृत्वा स्पर्शे रोष इति भावः । अवतस्थे किमेवं कृतवानिति भावयन्ती बभौ । आकस्मिकः

अकस्माद्भवः । भवार्थे ठक् । भेदकं वैलक्षण्यम् । विषयस्य वैलक्षण्यम् । अर्थात् द्वयोर्विषयौ भिन्नौ । कार्यवैलक्षण्यं दृष्ट्वा तद्ग्राह्यम् । एकत्र क्रोधे झटिति परस्य विनाशादौ प्रवृत्तिर्भवति । अपरत्रामर्षे परुषवचनम्, वैमुख्यादिकं पराङ्मुखत्वादिकम् । जनकं कार्यवैलक्षण्यमित्यन्वयः ।

व्रीडेति । हर्षशोकादेः कार्याणां मुखप्रसादमालिन्यादीनामनुभावानां गोपनाय आवरणाय क्रीडादिभिर्निमित्तैर्हेतुभिर्जनितो भाव अवहित्था ।

अनुभावानां कार्याणां पिधानार्थे गोपनाय कृतो भावोऽवहित्थमुच्यते इत्यन्वयः । तदवहित्थम् । भयेन, व्रीडया, धाष्ट्र्येन, कौटिल्येन, गौरवेण वा विभाव्यं जन्यमित्यर्थः ।

प्रसङ्गे इति । गुरुषु गुरूणां श्वश्रूप्रभृतीनां समीपे गोपानां प्रसङ्गे गोपालकानां चर्चायां यदुपतेः कृष्णस्य महिमानं श्रुत्वा उपाकर्ण्य काचित् कुलवधूः स्विद्यत्पुलकितकपोला जाता । स्विद्यन्तौ स्वेदयुक्तौ पुलकितौ रोमाञ्चितौ कपोलौ यस्याः सा । झगिति विषज्वालायाः जालं वमतः पन्नगपतेः कालियस्य फणायां क्रियमाणं साश्चर्यं सहितमाश्चर्येण ताण्डवविधिं नृत्यप्रक्रियां कथयतितराम् ।

अत्र कामोद्रेकेण स्वेदः पुलकश्च सञ्जातौ । तयोर्गोपनाय व्रीडया विषवमनकारिणः कालियस्य कथोद्भावितेति ध्येयम् ।

अधीति । अधिक्षेपेण आक्षेपेण अपमानेन वा आदिपदग्राह्येण भर्त्सनेन वा प्रभवः उत्पत्तिर्यस्याः सा । अस्य अधिक्षेप्तुः अपमानयितुः भर्त्सयितुर्वा किमनिष्टं करोमीत्याकारा स्वरूपा । चोरस्य धारणम् । चुरधातोः पचाद्यचि चोरः । अयं चोर इति धारणं निर्धारणं निश्चयः । परस्य कर्णस्य प्रभावमुत्कर्षम् । कर्णेन पराभूतं तिरस्कृतमत एव गाण्डीवं निन्दन्तम् । प्राग् पूर्वमुदाहृते वक्षोजाग्रमित्यत्रामर्षध्वनौ । तस्य क्रोधस्य । अस्या उग्रतायाः।

विप्रलम्भेन वियोगेन, महापत्त्या, परमानन्देन वा जन्म यस्य सः। अन्यस्मिन् वस्तुनि अन्यस्य अवभासो ज्ञानमुन्मादः ।

अन्यस्मिन् अन्यावभास इत्येवोच्यमाने शुक्तौ रजतज्ञानमपि उन्मादः स्यादिति तद्व्यावृत्तये जन्मान्तं विशेषणं लक्षणे बोध्यम् । नयनयोः काचकमलादि दोषेण वा रागेण वा शुक्तौ रजतज्ञानं भवति ततो नास्ति तथा ।

आलीजनस्य सखीजनस्य कराम्बुजमादाय करकमलं गृहीत्वेत्यन्वयः। व्याध्यन्तरापेक्षया अन्येषां व्याधीनामपेक्षया विलक्षणताऽस्येति विशेषस्य स्फोरणाय बोधनाय ।

कार्यसहेति । कार्याणां भावेभ्यो जन्यानां सहवर्तितया सहयोगितया शरीरप्राणयोः संयोगस्य हेतुत्वात् निमित्तत्वात् ।

भावः पदव्यङ्ग्यतामावहतीत्यत्र हन्तपदमत्यन्तोपकारकमिति बोध्यम् । स्वव्यञ्जकं मरणव्यञ्जकं यद् वाक्यं तस्मात्तदुत्तरवर्त्तिना । सन्दर्भो ग्रन्थः । तद् घटकेन तत्सम्पादकेन वाक्यान्तरेण अन्येन वाक्येन । अन्यथा प्रत्युज्जीवनवर्णनाभावे ।

नियमेनेति । चिन्ता निश्चयस्य प्रयोजिकेति नियमो नास्ति । अथ च विषयवैलक्षण्यं विषयभेदोऽपि चिन्तावितर्कयोर्भेदसाधक इति भावः ।

अर्थान्तरन्यास इति । आलम्बनं विना आश्रितस्य स्थितिर्नास्तीति रूपेण सामान्येन "सीतां विना रामस्य जीवितं कथमस्ति इति विशेषस्य समर्थनरूपोऽर्थान्तररन्यासालङ्कारः। अस्मिन्नेव वितर्के एव अनुकूलः साधकः ।

अर्थान्तरेति । अर्थान्तरे अन्यप्रकारेण वाच्यलक्ष्यसाधारणेऽर्थे सङ्क्रमितं परिणतं परिणतमिव अर्थान्तरलक्षणं वाच्यं यत्र ध्वनौ सः अर्थान्तरसंक्रमितवाच्यध्वनिः । यत्र वाच्योऽपि प्रकारान्तरेण लक्ष्यो भवतीति ध्येयम् । यथात्र प्रकृते दुर्योधनपदार्थः अर्थान्तरे कर्णदर्शनावधिजीवितत्वे, पाण्डवान् लाक्षागृहानलप्रवेशकारयितृत्वे, तानेव विषसम्पृक्तान्नभोजयितृत्वे, अगणित पाण्डवतेजस्त्वे परिणतम्, एवंभूतस्य दूर्योधनस्य इदानींमतिदुःखितस्येति ध्वनिरत्र विषादध्वनेरनुग्राहकः । परवीरस्य उत्कृष्टशूरस्य ।

अयोगात् असम्बन्धात् । तस्य व्यवसायात् दुर्योधनस्य उद्योगात् । सकलसैन्यस्य एकादशाक्षौहिण्याः क्षयेऽपि तेन दुर्योधनेन विपदोऽगणनात् अचिन्तनात् । मरणस्य शरणीकरणे सति मरणमेवेदानीं शरणं नान्योपाय इत्येवं परिस्थितौ परस्यापकर्षः तुच्छता जीवितं प्राणो यस्य उत्साहस्य । तस्याभावात् असत्त्वात् ।

आयीति । पवनवत् रयो वेगो येषां तेषां वायुसमानवेगानां निर्दयानां स्वस्य क्षतिं तादृशवेगेन सञ्चलनादनिर्धारयतां हयानामश्वानां गतिं प्रचारं श्लथय अवरुद्धां कुरु । अहमुत्तरः पाण्डवानां सङ्गरं युद्धं द्रष्टुं नो ईहे इत्यर्जुनं प्रति उक्तिः । प्रकर्षेण कुप्यन्तो ये

भुजङ्गाः सर्पास्तद्वत् भुजा बाहवो येषां तेषां बाहुजानां क्षत्रियाणां अमी निनादाः गर्जनानि मे श्रुतिविवरं कर्णयोश्छिद्रं यावत् दारयन्ति पीडयन्ति । त्रासभावे एव आनुगुण्यस्य आनुकूल्यस्य औचित्येन योग्यतया ध्वनिव्यपदेशस्य तद्व्यवहारस्य अयोग्यत्वात् अनुचितत्वात्।

अधुनेति । "अस्य वस्तुन ईप्सिततमस्य अधुनैव लाभोऽस्तु" इत्याकारा इच्छा औत्सुक्यपदस्यार्थः ।

निपतदिति । निपततां निर्गच्छतां वाष्पाणां संरोधात् मुक्तं त्यक्तं चाञ्चल्यमधीरत्वं यैस्तारकैः । तादृशास्तारका अर्धकनीनिकाः यस्य तत् । मृगीदृशो एणनयनायाः नयनमेव नीलाब्जं नीलकमलं कदा आलोकेयं पश्येयम् ।

अनर्थेति । अनर्थस्य महाविपत्तेरतिशयेन आधिक्येन जनिता सम्भ्रामाख्या कर्त्तव्यविमूढा चित्तवृत्तिरावेग उद्वेगः ।

लीलयेति । विहितं सिन्धोः समुद्रस्य बन्धनं यातायातसाधनं पुलं (सेतुः) येन सः दर्पेण अहंकारेण मत्समक्षं कस्त्रिलोकवीरः इत्येवंरूपेण दुर्विलसितः दुरभिसन्धिपूर्णः।

स्थैर्याभावेन चाञ्चल्येन । यथोद्वेगः प्रतीतो भवति तथा चिन्ता न प्रतीता । परन्तु किन्तु आवेगस्य चर्वणायां सत्यां अनुभवे सति तस्य आवेगस्य पोषकतया अनुगुणतया गुणत्वेन अप्राधान्येन चिन्ताऽपि विषयीभवति चेद्भवतु ।

चिन्तेति । चिन्तादिभिर्जन्या अवश्यमिदमिदानीं निश्चयेन कर्त्तव्यस्य कार्यस्य अर्थस्य प्रतिसन्धाने ज्ञाने विकला अक्षमा ।

पश्यतः विषयं परिस्थितिञ्च साक्षात्कुर्वतः, शृण्वत आकर्णयतोऽपि पुरुषस्य कार्येऽर्थे अविवेकः अक्षमत्वं जडता ।

तस्या जडताया विभावाः । सा जडता मोहात् मूर्च्छातः पूर्वं परतो वा पश्चाच्च । विदां विदुषाम् ।

हे सहचरि ! सखि ! यदवधि यस्माद्दिवसात् । दयितः प्रियः दैववशेन न तु स्वेच्छया । एतेन प्रेमाधिक्यम् । विलोचनाभ्यां दूरत, स्वार्थे तसिः । दूर एव दूरतः । एतेन प्रेमाधिक्यम् । विलोचनाभ्यां दूरत, स्वार्थे तसिः । दूर एव दूरतः तदवधि तस्माद्दिनात् । करणैः मदीयैरिन्द्रियैः निजासु क्रिया तासु तासु प्रमितिषु प्रणयः प्रमितिसाधनीभूतविषयसम्बन्धः

शिथिलीकृतः दूरीकृतः ।

मोहे मूर्च्छायां चक्षुरादिभिः इन्द्रियैः चाक्षुषादेरादिपदात् रासनादेः प्रत्यक्षस्याजननम् विषयैः सहासम्बन्धादिन्द्रियाणां; प्रत्यक्षस्य ज्ञानस्यासम्भव इति भावः । इह जडतायां तु प्रकारविशेषाणां विलक्षणानां विशेषणानां वैशिष्टयेन सम्बन्धेन बाहुल्येन स्पष्टतया चाक्षुषादेः प्रत्यक्षस्य अजननमिति तस्मात् मोहात् अस्या जडताया विशेषो भेदः । अत एव बाहुल्येनाजननादेव ।

कस्यापीष्टस्य वस्तुनः पूर्णरूपेण लाभात् अतितृप्तेरतिशयेन वाञ्छाया पूर्त्तेः, गर्भाद्, व्याधेः, श्रमादिभ्यो जन्या चेतसो मनसःक्रिया सम्पादनोन्मुखताया अभाव आलस्यम्। तेन ग्लानौ सामर्थ्याभावेन, जडतायां कार्याकार्यविवेकशून्यत्वेन हेतुना। ग्लानेः जडतायाश्च सकाशात् अस्य आलस्यस्यभेदो विशेषः ।

निखिलामिति । दूरात् दूरदेशादुपयातेन समागतेन प्रियेण कथाभिः आख्यानकादिः हेतुभिः निखिलां रजनीं यावद् विबोधिता जागरणं कारिता अहमधिकं वक्तुं न पारयामि न समर्था। अतः हे सखि ! मा जल्प प्रश्नं मा कुरु। तव रसज्ञा जिह्वा आयसी लौहमयी।

अपरो विशेषः, एको विशेषस्तु जडतालस्ययोः पूर्वमुक्तः । द्वितीयो भेदस्तु मोहात् पूर्वोत्तरवृत्तित्वमालस्यस्य नास्तीति । कथाभिरिति दिव्यक्रियाया गोपनीयबुद्ध्या उक्तं, ततश्च वाच्यं अविवक्षितं तदा श्रमोऽत्र व्यङ्ग्यः, सोऽपि आलस्यस्य पोषकोऽनुकूलः ।

परस्यान्यस्य उत्कर्षदर्शनादिभिः आदिपदात् श्रवणादिभिर्जन्यः । परस्य निन्दायाः कारणीभूतः । इमामसूयामेव ।

भङ्गस्तु धनुष इति शेषः। प्रकृतः साधारणो लघुः शिशुः। भग्नं हरस्य कार्मुकं धनुर्येन तस्य रामस्य पराक्रमं वीरत्वं सोढुमशक्तानाम् । अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते इत्यस्योदहरणभूतानां तत्रत्यानां सीतास्वयंवरमहसि समागत्योपविष्टानां राज्ञामुक्तिः वाक्यम् ।

श्रीमतो दाशरथेः भगवतो रामभद्रस्य यद्बलं सामर्थ्यं तस्य। प्राकृतपदं, शिशुपदं, ताभ्यां गम्या बोध्या ।

तृष्णेति। तृष्णया "चकार्थ एव चतुराश्चन्द्रिकाचामकर्मणि" इति प्रसिद्धेः चन्द्रिकापानस्य

आशया लोले चञ्चले विलोचने यस्य तस्मिन् चकोराणां व्रजे समूहे, प्राचीं दिशां कलयति गच्छति सति । किं च कैरवाणां कुमुदानां कुले निवहे मौनं मुञ्चति विकासं प्राप्नुवति सति । कामे धनुर्धुन्वति चापस्य कम्पनं कुर्वति सति । मानवतीजनस्य प्रणयकलहकुपितनायिकाजनस्य माने रोषे सपदि चन्द्रोदयप्रारम्भवेलायामेव प्रस्थातुकामे निरसनोद्यते सति । हे धातः । अधुना एवं विधव्यतिकरे विधौ चन्द्रमण्डलोपरि धाराधाराणां मेघानामाडम्बरः आच्छादनं विधातुं कर्त्तुमुचितः किं नु । नोचित इति भावः ।

तदीयेति । तदीयस्य धातृसम्बन्धिनः उच्छृङ्खलतादेर्दर्शनेन जन्या । तदीयोच्छृङ्खलतादर्शनं विभावः । अनुचितकारित्वरूपाया निन्दायाः प्रकाशः कथनम् "विधातुमुचितः । किं नु" इत्येवं रूपो वाच्यार्थः अनुभावः । कार्यकारणयोरिति । तुल्यत्वात् समानत्वात् । यो हि तदीयोच्छृङ्खलतादिदर्शनमसूयाया विभावः स एवामर्षस्य । यथा अनुचितकारित्वरूप–निन्दाप्रकाशोऽसूयाया अनुभावः, तथा स एवामर्षस्यापि । एवञ्च समानसामग्रीकतया अभिव्यक्तेनामर्षेण शबलिता मिश्रिता एव असौ असूया, न अविविक्ततया स्वतन्त्रतया प्रतीयते ज्ञायते ।

नन्वेवं स्थितिः 'कुत्र शैव' मित्यत्राऽपि स्यात्तर्हि गतं पद्ययोर्भेदेन तत्राह–न हीति । यथा तृष्णेति पद्ये विधातुरपराधोऽस्ति तथा 'कुत्र शैव'मित्यत्र भगवतो रामस्य नास्ति । येन कवेरिव वीराणाममर्षोऽभिव्यज्येत प्रकाश्येत । महोन्नतायाः क्रियायाः सम्पादनं निष्पादनं वीराणां स्वभावः निसर्गः ।

अत्र तृष्णेति पद्ये अप्रस्तुतस्य चन्द्रस्य वृत्तान्तेन प्रस्तुतस्य राजकुमारादेर्वृत्तान्तस्य ध्वननादसूयाध्वनित्वं नास्तीति न वाच्यम् । कुतः । एकध्वनेः ध्वन्यन्तरेण साकं विरोधा–भावात् । अन्यथा अविरोधित्वाभावे अर्थात् विरोधे तेषां च अवान्तरवाक्यध्वनीनां च । सामानाधिकरण्यमेकस्थानस्थायित्वम् । कुत्रापि प्रबन्धे ।

तदिति । यदनालेच्य अविचार्यैव कार्यकारित्वं कर्त्तव्यसम्पादकत्वं तच्चापलमिष्यते।

मैवमिति । मा एवं अहितसेवाव्रतित्वेन रूपेण मे मह्यं स्वाननं दर्शय । अहिते शत्रुविषये व्रतं भगवदनुक्तिकरणरूपो नियमो यस्य तत्सम्बुद्धौ हे अहितव्रत ! अत एव पापात्मन् ! पापमयान्तःकरण ! दुष्टाशय इति यावत् । अथवा अहितशब्दः

अहितानुरक्तिकरणरूपार्थे लाक्षणिकः अहितानुरक्तिकरणरूपं व्रतं यस्य तत्सम्बुद्धौ अहितव्रत! न हितं व्रतं (भगवदनुरक्तिरूपं) यस्य तत्सम्बुद्धिरिति तु न साधु व्याख्यानं नागेशमहाशयस्य । तादृशं व्रतं हितमेव । हिरण्यकशिपुनापि तु तादृशव्रतेनैवोच्चत्वं लब्धम् । तस्माद् यं भगवन्तमसौ हिरण्याक्षवधाद् अहितं शत्रुं मनुते तस्यैवायं प्रह्लादः भक्तिकारीति तं स हिरण्यकशिपुर्द्वेष्टि । अतोऽस्मदुक्तमेव ज्यायः । येनात्मना स्वेन मया त्वं सम्बोध्यः । शत्रुभक्तस्य नामाऽपि न गृह्णाति । भावितः जनितः।

भगेति । भगवति या अनुरक्तिः । तस्याः विघटने उपायं हेतुमपश्यतः अनालोचयतः। भगवद्विषये द्वेषेण उत्थापित जनितः।

ननु स्वकृतोपदेशमवज्ञाय अहितानुरक्तिरूपव्रताचरणेनापराध्यन्तं पुत्रं प्रति हिरण्यकशिपुः परुषं ब्रूतेऽतोऽमर्ष एवात्र व्यज्यत इत्याशङ्कायामाह–न चेति । अत्र अहितव्रतेति पद्ये अमर्ष एव व्यज्यत इति न वाच्यम् । कुत इति चेदाह–सदैवेति । सदैव जन्मप्रभृत्येव गर्भे नारदकृतोपदेशमाहात्म्यात्, चिरकालसंभृतत्वेन जन्मारम्भतो युवकत्वप्राप्तिपर्यन्तः कालश्चिरकालः । तेन सम्भृत एकत्रीभूतः । तस्य भावस्तत्त्वं तेन ।

इदंप्रथमतायाः इयमात्मवधविषयिणी इच्छा प्रथमा इदानीमेवोत्पन्ना इतः कालात् प्रागनुत्पन्नेति इदंप्रथमा तस्याः भावस्तत्ता तस्याः । अनुपपत्तेरसङ्गतेः । इदं प्रथमं यत्कार्यं तत् इदंप्रथमकार्यं तस्य । इदंप्रथमकारणेन प्रयोज्यतया जन्यतया । प्राचीनाया प्रागुद्भूतायाः चित्तवृत्तेर्विलक्षणाया एव विभिन्नाया एव ।

ननु अमर्षस्य चिरकालसंभृतत्वेऽपि आत्मवधेच्छाऽप्रयोजकतया प्राचीनस्याप्रकृष्टत्वं सिद्धं ततश्चेदानीममर्षप्रकर्षः स एवात्मवधेच्छाकारणमभिव्यज्यतामित्याशङ्कायामाह–न चेति। प्रकर्षो नाम सः, यो हि स्वाभाविकस्वरूपाद्विलक्षणो भवति विभिन्नो भवति । एवं च तस्य स्वभाविकाद् विलक्षणं लक्षणमावश्यकम् । तत्त्वेन च तस्यैव प्रकर्षस्यैव चपलतापदस्य अर्थत्वमभिधेयत्वमागतमिति भावः।

नीचेति । नीचपुरुषेषु अधममनुष्येषु आक्रोशनादिभिर्जनिता विषयेषु द्विषन्ती चित्तवृत्तिर्निर्वेदः । उत्तमेषु अवज्ञादिभिर्जनिता सा ।

ननु निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रस इत्युक्तेः ''यदि लक्ष्मणे'' –त्यत्र

पद्ये व्यज्यमानस्य निर्वेदस्य शान्तरसतापर्त्तिर्न वेति सन्दिहानमुत्तरति–नित्येति । इदं वस्तु नित्यमिदमनित्यमिति विवेकेन जन्यत्वस्य निर्वेदेऽभावात् न तत्र स्थायित्वं, स्थायित्वाभावाच्च असौ उक्तपद्ये व्यज्यमानो निर्वेदः रसव्यपदेशस्य रसपदव्यवहारस्य हेतुर्नास्ति ।

भवदिति । हे क्षपितमुर ! हे मुरारे ! भवतो द्वारि । क्रुध्यतोः क्रोधं कुर्वतोः जयविजययोः दण्डाहत्या दलन्तःकिरीटा येषां ते तथोक्ताः । विधिमहेन्द्रप्रभृतयः सन्ति । ये सृष्टिकर्तृतया, यागेषु प्रधानतया जगद्धुर्याःतेऽपि कीटा इव तुच्छा इत्यर्थः । युष्मन्नयनयोः तव नेत्रयोः परिपाते उत्कलिकया वितिष्ठन्ते भवता दृष्टा भवेम, भवतो दृष्टिपातेऽस्मासु जायेतेत्याशया द्वारि स्थितिं कुर्वन्ति । तत्र भवद्वारि अन्ये नाकाधिपतयः वराकाः के अतितुच्छा इति भावः । अत्र पूर्वं "भवद् द्वारि" इत्यत्र भवच्छब्देन यस्य मुरारेर्ग्रहणं कृतं तस्यैव नयनयोः सम्बन्धित्वेन ग्रहणं स्यादेवेति युष्मदित्यधिकं व्यर्थञ्च । विधिमहेन्द्रप्रभृतय इत्यत्र महेन्द्रस्योक्तत्वान्नाकाधिपतय इति पाठः समीचीनो न भवति । अत एवं पठनीयम् । वराकः कोऽन्योऽत्र क्षपितमुर ! नाकाधिवसतिः ।

अत्रेति । अपमानस्य क्रुध्यज्जयविजयदण्डाहतिदलत्किरीटत्वेन तिरस्कारस्य सहनम् । भगवत्कटाक्षाणां पातेऽभिलाषः । कटाक्षपातार्थं च भगवतो द्वारस्य निषेवणं तदादिभिः नाभिव्यज्यते इति । विधिमहेन्द्रादिपदमपि तत्तत्कल्पगतमेव न स्थायि इति तत्पदस्य कल्पकल्पान्तरस्थायित्वलाभार्थमपि तादृश स्थितेरुपपत्तेर्नाभिव्यज्यते रतिरिति भावः।

ननु भवद् द्वारीत्यत्र कविर्भगवन्तं स्तोतुं न प्रवृत्तोऽपि तु भगवदैश्वर्यवर्णन प्रवृत्त इति न कविगता रतिः प्रतीयते इति चेदाह–इदं वेति । करुणायाः भङ्गिभिः विच्छित्तिभिः तरङ्गितां सञ्जाततरङ्गां चञ्चलामिति भावः ।

अथेति । भावविषये विचारान्तरारम्भकोऽथशब्दः । अस्य भावस्य । असूयादीनां पञ्चम्यन्तपदाभिधेयानां षष्ठयन्तपदाभिधेयेष्वन्तर्भाव इति यावत् ।

सूक्ष्मे भेदे सत्यपि । नान्तरीयकतया । षष्ठ्यन्तपदाभिधेयस्य मात्सर्यादेरवश्यं सत्तेति नित्यसम्बद्धतया तेभ्योऽसूयादिभ्योऽनतिरिक्तस्यैव अपृथग्भूतस्यैव मात्सर्यादेरध्यवसायात् ज्ञानात्, मुन्योः सम्मतेभ्यः त्रयस्त्रिंशता भावेभ्योऽतिरिक्ताः मात्सर्यादयो भावास्त्रयोदशसङ्ख्यया गणिताः पण्डितराजेनेति ध्येयम् । त्रासे उद्वेगस्यान्तर्भावः

पण्डितराजमतम् । निर्वेदे उद्वेगस्यान्तर्भावः, ग्लानौ क्षुत्तृष्णादेरन्तर्भाव इति माणिक्यचन्द्रमतम् । गर्व आवेगजन्योऽसूयाया विभाव इत्यपि ज्ञेयम् ।

एषु विभावाः अनुभावाश्च भवन्ति तद्यथा ।

भावेषु केचन भावाः। केषाञ्चन भावानाम् । अष्टौ स्थायिनः, अष्टौ सात्त्विकाः, त्रयस्त्रिंशव्द्यभिचारिणः इत्येवं सङ्कलनेन एकोनपञ्चाशद्भावाः । भावत्वञ्च एषामिदमेव यद् लोकदशायामनास्वाद्यमपि वस्तुजातं काव्येषु उपनिबध्यमानं लोकोत्तरवर्णनाभिनयरागैः चित्तवृत्तयो भावयन्ति आस्वाद्यं कुर्वन्ति इति चित्तवृत्तयो भावपदवाच्याः। तत्र यासु चित्तवृत्तिषु स्थायिभवनयोग्यता त एव स्थायिनः। तथा चोक्तम्,

रसावस्थः परं भावः स्थायितां प्रतिपद्यते । इति ।

रसत्वं ये प्रपद्यन्ते प्रसिद्धाः स्थायिनोऽत्र ते । इति च । नान्ये । तथाचोक्तम्– स्तोकैर्विभावैरुत्पन्नास्त एव व्यभिचारिणः। इति ।

उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते । इति च ।

रत्यादयोऽप्यनियते रसे स्युर्व्यभिचारिणः इति ।

व्यभिचारिषु निर्वेदस्यैव स्थायित्वम् । तथा चोक्तम् ।

स्थायी स्याद्विषयेष्वेष तत्त्वज्ञानाद्भवेद्यदि ।

इष्टानिष्टवियोगाप्तिकृतस्तु व्यभिचार्यसौ । इति ।

निर्वेदः स्थायिभावोऽस्ति शान्तोऽपि नवमो रस इति च ।

नित्यानित्यवस्तुविवेकजन्या निर्वेदरूपा चित्तवृत्ती रसतां याति । आपदा, ईर्ष्यया, कुकर्मोद्भावनेन वा जन्या निर्वेदाख्या सा व्यभिचारिणी । एवं हि स्थाय्यादिपदव्यवहारो योग्यताधीनः । व्यभिचारिणो हि नित्यं व्यभिचारिण एव । तथाहि रसायनं सेवमानस्य ग्लान्यालस्यश्रमप्रभृतयो जन्ममध्ये न भवन्त्येव । यस्यापि कदाचित्कारणवशाज्जायन्ते तस्यापि कारणावगमे ह्रसमानाः संस्कारशेषतां नावश्यमुपयान्ति । रत्यादयस्तु कृतस्वकर्त्तव्यतया प्रलीनकल्पा अपि संस्कारशेषतां नातिवर्त्तन्ते । वस्त्वन्तरविषयस्य रत्यादेरनुच्छेदात्, वासनात्मतया तेषां स्थिरत्वाच्च । तस्मात्स्थायिभावरूपे चित्तवृत्तिसूत्रे स्यूता एवामी स्वस्योदयास्तमयवैचित्र्यं लभमानाः स्थायिनं विचित्रयन्तः अभितश्चारयन्तीति व्यभिचारिणः।

अत एव ग्लानोऽयमित्युक्ते कुत इति हेतुप्रश्नेन तेषामस्थायिता सूच्यते। राम उत्साहशक्तिसम्पन्न इत्यत्र तु कुत इति हेतुविषयकः प्रश्नो नोद्भवति इति रत्यादीनां स्थायिता । तस्मादेव च ''रत्यादुद्बोधका लोके विभावा काव्यनाटकयो'' रिति सङ्गच्छते । यतः स्थिरपदार्थस्यैव उद्बोध इति न्यायात् । ते च व्यभिचारिणः त्रयस्त्रिंशत् । यतः त्रयस्त्रिंशतैव स्थायी चर्वणायोग्यः स्यादिति नियमादन्येषां तेष्वन्तर्भाव आचार्याणामभिमतः । इति ध्येयम् ।

संयुक्ताभ्यां भुज्यते सेव्यते स्वात्माऽत्र इति लक्षणे सम्भोगे रतिश्रमकृता निद्रा, वियुक्ताभ्यां सम्भोगास्वादलोभेन प्रलभ्यते वञ्च्यते स्वात्माऽत्र इति लक्षणे विप्रलम्भे तु नायिकारतिभावनया तद्दर्शनादिलाभाय निद्राप्तीच्छेति । विप्रलम्भे मरणं चेद्वर्णनीयं तर्हि अचिरकालेन प्रत्युज्जीवामयं वर्णनीयम् । रसविच्छेदहेतुत्वात् साक्षान्मरणं न वर्णनीयम् । अतः प्राणत्यागात् पूर्वक्रिया पाशबन्धाद्यवसरगता चैतन्यावस्था एव वर्णनीया । तथात्र उन्मादापस्मारव्याधादीनां नात्यन्तकुत्सिता दशा काव्ये नाट्ये च दर्शनीया । इति शृङ्गारे विशेषः।

आत्मस्थो हास्यः उत्तममध्यमाधमेषु स्मितविहसितापहसितैस्त्रिधा । परस्थोऽपि स क्रमेण स्मितादीनां सङ्क्रमणात् हसितोपहसितातिहसितैस्त्रिधा । अत्र उपात्युपसर्गयोर्भेदेन उपहसितातिहसितयोरभेदः। यथा आम्लदाडिमादिरसास्वादोऽन्यत्रापि पुरुषे दन्तोदकविकारानुदर्शनात् सङ्क्रमणस्वभावस्तथाऽयमपि रसः । तथाहि–परं हसन्तं दृष्ट्वा स्वयं विभावमपश्यन्नपि हसँल्लोके दृष्टः । स्वयं गाम्भीर्यात् विभावदर्शनेऽपि कदाचिन्नैव हसेत् । परन्तु परकीयहासदर्शनात् तत्क्षणं हसति । अन्येऽपि रसाः सङ्क्रमणस्वभावाः। यथा स्वामिनं शोकाकुलं वीक्ष्य भृत्योऽपि तथा भवति । अत्र शोकाकुलः स्वामी एव विभावः। परं हास्ये हसतः पुरुषस्य यो विभावः स एव विभावो भवतीति विशेषः।

वीरे धर्मदानयुद्धत्रयं विपक्षगतं विभावरूपं स्यात् । स्वपक्षगतं चेदनुभावरूपमिति। इह विपत्पङ्कनिमग्नता–स्वल्पसन्तोष–मिथ्याज्ञानानि अपास्य यस्तत्त्व निर्णयरूपः असंमोहाध्यवसायः स एवोत्साहहेतुः प्राधान्येन । रौद्रे तु ममताप्राधान्यात् अनुचितयुद्धदानाद्यपीति मोहाध्यवसाय इति विशेषः।

स्त्रीनीचादीनां सहजमुत्तमानां कृतकं भयं सम्भ्रमो भयानको रसः । उत्तमा हि

भयाभावोऽपि गुरुराजादिभ्यो भयं कृतकं दर्शयन्तः सुतरामुत्तमाः स्युः । प्रभुभक्तिश्च सचिवादीन् स्वेच्छाचरणाद् भीषयति । ननु उत्तमाः किमिति स्वोत्तमेभ्यः कृतकं भयं सम्भ्रमं दर्शयन्तो मृदून् करकम्पादीन् दर्शयन्ति, किमिति च भयस्यैव कृतकत्वम् । सर्वस्यैव रसस्य कृतकत्वं सम्भवति । यथा अर्थार्थिनी गणिका कृतकां रति प्रदर्शयति इति चेत्, उच्यते । भये अर्थात् सम्भ्रमे हि प्रदर्शिते गुरुप्रभृतयो शिष्यादीन् विनीतान् मन्वते । मृदुचेष्टया च नाधमस्वभावानेतान् मन्वते । परं विनेयेभ्यः कृतकरत्यादेरुपदेशान्न किंचित् फलम् । यत्र तु राजादयः परान‌नुगृहीतुं क्रोधविस्मयादीन् दर्शयन्ति तत्र तेषां व्यभिचारितैव न स्थायिता । इत्थं सङ्क्षेपेण भावेषु निरूपितं किमपि भेदबीजम् ।

अथारभ्यते । तत्र रसाभासे । अनुचितं यथा स्यात्तथा विभावमालम्बते विषयीकरोति यः सः अनुचितविभावालम्बनो रत्यादिः। स्थायी एव रसः इत्युक्तेः। तस्य भावस्तत्त्वम् । एवं विग्रहकरणेन आलम्बनक्रियाकर्त्तृ रत्यादेः, विभावस्य चेत्युभयोरनौचित्यं प्राप्तं भवति। यो नायको नायिका वा अनुचितं नायिकारूपं नायकरूपं वा विभावमालम्ब्य रतिं तनुते तदा विभावानौचित्याद्रतिरप्यनुचितेति भावः। विवक्षितं च तदुभयमत्र ग्रन्थकारस्य; तदिदमुच्यते विभावादावनौचित्यं पुनर्लोकव्यवहारतो विज्ञेयमिति । तस्मादनौचित्येन रत्यादिर्विशेषणीय इति च । आलम्बनीयस्यानुचितत्वे दुष्टत्वे आलम्बनकर्त्ताऽपि दुष्टः। आलम्बनकर्त्तुर्दुष्टत्वे तदालम्बनीयमपि दुष्टमिति लोके सुप्रसिद्धम् । एवञ्च विभावाभासाद् रत्याद्या भासे चर्वणाभास इति रसाभासः। विभावाभासत्वं नाम विभावेऽनौचित्यम् । तच्च प्रतिषिद्धविषयकत्वादिरूपं लोकानां सामाजिकानां व्यवहारत आचारतो विज्ञेयम् । असमये स्वस्त्रियामपि रतिरनुचिता । समये उपयुक्ते परनायिकायामपि रतिरुचितेति ध्येयम् । तदुक्तं यत्र स्थले रत्यादिरूपे वा नायिकारूपे वा नायकरूपे वा तेषां सामाजिकानामयुक्तमनुचितं स्थलमिति धीः बुद्धिरिति । नायिका स्वा, अन्या, साधारणी इति त्रिभेदा । ततोऽनौचित्यं क्व स्यादित्युच्यते लोकानां व्यवहारत इति ।

विभावादावित्यत्र आदिपदार्थः रतिरस्ति । यतः आलम्बनो नायकादिस्तमालम्ब्य रसोद्गमादिति सिद्धान्तः। तदनुसारमालम्बनभूतस्य विभावस्यानौचित्यं प्राप्तं भवति । तज्जन्यरतेश्च। मूलेऽपि विभावालम्बनत्वमित्येवोक्तमत आदिपदस्यार्थो रतिः।

मुनिपत्नीति । मुनिपत्न्यादौ यदि कश्चिद्रतिं तनुते तत्र मुनिपत्नीरूपो विभावोऽनुचितोऽतो रतिरपि तस्यामनुचितैव इति तत्र रसाभासः। परं या नायिका बहुषु नायकेषु रतिं तनुते तत्र बहुनायकविषया रतिः । यत्र बहवो नायका विभावतां गता अपि अनुचिता नेति रतिरपि अनुचिता नेति भावः । यो नायकस्तां वाञ्छति सा न वाञ्छति अथवा नायिकां तं वाञ्छति स एव न वाञ्छति तामिति विभावयोरनुचितत्वं नास्ति चेद्रतिरपि अनुचिता नेति भावः । एवं च मुनिपत्न्यादिविषयकरत्यादेरनुचितत्वेन रसाभासस्योदाहरणतया सङ्ग्रहेऽपि । रतेरसङ्ग्रहादिति । बहवो नायकाः विभावाः उचिता इति । उभौ नायिका नायकश्च विभावौ उचिताविति रतेरनुचितत्वेन सङ्ग्रहाभावात् रसाभासोदाहरणता न स्यादिति । तस्मात् बहुनायकविषयाया अनुभयतिष्ठायो रतेः रसाभासोदाहरणताभावात् । इत्थं च रत्यादेरनौचित्येन विशेषणीयत्वेन च । प्राग्वदेव लोकानां व्यवहारादेवेत्युक्तिवत् ।

रसोपि आभासो इति द्वयोः सामानाधिकरण्यं सहज्ञानं न भवितुमर्हतीति भावः। यथा हेत्वाभासत्वं हेतुत्वेन समानाधिकरणं समानकालिकं समानदेशिकं वा न हि भवति। तथापि इमे सर्वेऽपि रसधर्मयोगादानान्दसंवलितज्ञानत्वसम्बन्धाद् रसा उपचाराज्ज्ञेयाः। स्थायी चर्वणाविषयो रस इति सिद्धान्तः। विभावादिव्यज्यमानहर्षाद्यन्यतमत्वरूपभावत्वं स्थयिनामभावाद्रसत्वमसङ्गतम् । देवादिविषयरतिश्च भाव एव न स्थायीत्यभिमानः।

ननु अनौचित्यादृते नान्यद्रसभङ्गस्य कारणमित्युक्तेरनौचित्येन रसो भज्यते केवलं, रसस्तु अस्त्येव । रससत्तामन्तरा भग्नता कुतः स्यादिति वदतां मतमाह–नहीति । विभावस्य रत्यादेर्वा अनुचितत्वेन न आत्महानिः न रससत्ताविनिर्गमः अपि तु सदोषत्वात् अनौचित्यं दोष इति कृत्वा तत्र रसे आभासत्वव्यवहारः। यथा कार्यक्षमे अश्वे अश्वाभासव्यवहारः।

शतेनेति । उपायानां शतेन शतमुपायान् कृत्वा । कथमपि असुव्ययो वास्तु वसुव्ययो वा परं सौधशिखरस्थिता राजरमणी निश्चयेन भोग्येति भावेन । सौधशिखरं सुधया श्वेतचूर्णेन स्वच्छीकृतराजप्रासादोपरितनस्थानं गतः प्राप्तः सुकृती । रहसि एकान्ते । सुधाफेनवत् अमृतफेनवत् स्वच्छैःपुष्पैः सुन्दरीकृते शयने मञ्चे शयितां सुखसुप्तां क्षामाङ्गी विबोध्य जागरय्य । पूर्वं जागरणसमये चकितनयना त्रस्तनयना कोऽयं मां विबोधयति इदमवस्थां; पश्चात् ज्ञातासङ्केततया हर्षेण स्मेरवदनां स्मितं कुर्वतीं राजरमणीं

सनिःश्वासं कष्टेन तादृशस्थलप्राप्तौ प्रयाससूचकनिःश्वासं प्रसारयन् श्लिष्यति आलिङ्गति।

अनुचितप्रणयामिति अनुचिते महाराज्ञी भूत्वाऽपि निषिद्धे प्रणयं कुर्वतीमित्यर्थः। निषिद्धेति । अस्या रतेः नायकनिष्ठस्य प्रेम्णः, आलम्बनं परप्रमदा निषिद्धेति रसस्याभास्त्वं दुष्टत्वम् । रतेर्नायकतिष्ठत्वेऽपि चकितपदेन त्रासप्रतीतौ नायिकायामभाव इति । अस्या राजरमण्याः तस्मिन् परपुरुषे । आदौ अर्ध जागरणसमये । अनन्तरं सम्यग् जागरणोत्तरम्। स्मेरवदनामिति विशेषणं हर्षं प्रकाशयन् तदीयां नायिकानिष्ठामपि रतिं व्यनक्ति शतमुपायान् कृत्वाऽऽगतस्य नायकस्य तु साऽस्त्येवेति भावः । व्यज्यतां नाम नायिकासम्बन्धिनी रतिः परं प्राधान्यं तु नायकनिष्ठाया रतेरेवेत्यन्वयः। कुत एतदित्याह–सकलस्य वाक्यस्य शतेनोपायानामित्यादिसमस्तस्य श्लोकस्य अर्थत्वात् प्रतिपाद्यत्वात् । नायिकानिष्ठा रतिस्तु स्मेरवदनेतिपदमात्रेण व्यक्ततया न वाक्यार्थः किन्तु पदार्थ एवेति भावः।

भवनमिति । गमनाय लवमपि आज्ञायतामित्याज्ञारूपे लाभे लालसेषु सतृष्णेषु । पथिभवनाद्बहिर्मार्गे स्थितेषु तरुणेषु । तदीयेन रूपेण सौन्दर्येण, यौवनेन च गृहीतं मानसं स्वान्तं येषां तैर्युवभिः । निजायाः सेवायाः कियद्दूरं भवती अस्माभिरनुगतेति अनुगमनरूपायाः। सफलताया सार्थक्यस्य विज्ञानाय विज्ञप्तये । गमनाय आज्ञापनरूपो यो लाभस्तत्र लालसेषु। परमस्य अधिकस्य परिश्रमस्य दूरादागमनरूपस्य स्मरणेन स्मृत्या सञ्जाता करुणा यस्यास्तस्याः। विलोचनाब्जमालां पातयाम्बभूवेत्यनेन विलोचनाम्बुजमालायाः परिक्षेपो वर्णितः । स च क्रियारूपतया अनुभावः । ''तरुणेषु'' इति बहुवचनेन । रतिर्बहुनायकविषयेति भावः।

भुजेति । तत्काले भुजपञ्जरे ग्रहणसमये भुजजाले । भुजपञ्जररूपे भुजे पञ्जरत्वारोपः। वेपते कम्पते । नववध्वा सह रतेर्मनागपि अल्पाया अपि स्पर्शाभावात् । नायके रतेः सत्त्वेऽपि नायिकायामभावादनुभयनिष्ठतेति भावः।

भुजेति । तत्काले भुजपञ्जरे ग्रहणसमये भुजजाले । भुजपञ्जररूपे भुजे पञ्जरत्वारोपः । वेपते कम्पते । नववध्वा सह रतेर्मनागपि अल्पाया अपि स्पर्शाभावात् । नायके रतेः सत्त्वेऽपि नायिकायामभावादनुभयनिष्ठतेति भावः।

तथा चोक्तं साहित्यदर्पणे तृतीये परिच्छेदे । उपेति । उपनायके एकस्मिन्, द्वयोर्वा

तयोः, बहुषु वा तेषु संस्थायां रतावित्यर्थकसमासकरणात् बहुनायकविषयायामिति पदं निरर्थकं बाध्यम् । यदि तु उपनायकपदेन कश्चिन्नायकसदृशगुणोऽन्तरङ्गो व्यक्तिविशेषो गृह्यते अन्यत्र बहुनायकेत्यत्र नायकपदेन मार्गे गच्छतामपि वा, यत्र कुत्रापि गतानामपरिनेतॄणां बहूनां यूनां ग्रहणं भवतीति चेत्तर्हि तदपि साधु । अयं भावः । नायकस्य नायिकायाश्च स्वोक्तगुणानुसारं सद्वृत्तत्वमपेक्ष्यते तद्धि येन हीनं भवति तदेवानौचित्यं प्रकृते गृह्यते । तस्य वर्त्तमानत्वे रसाभासो भावाभासश्चेति ।

बहुविषयाया इति । बहवः पञ्च पाण्डवा विषयाः यस्या रतेः । अपरिणेतारः । परिणयो विवाहः । तदकर्त्तारो बहवो नायका विषया यस्या रतेः । तस्या आभासतेति प्राञ्च आचार्याः । इदन्तु बोध्यम् । यर्हि लोकानां व्यवहारत एव अनौचित्यस्य ज्ञेयत्वं, तर्हि, कुतः पाञ्चाल्या बहुविषयाया रतेराभासत्वं, यतो नायिकाया नायकस्य च द्रौपदीपाण्डवयोरपेक्षितं सद्वृत्तत्वमक्षतमेव । अतोऽत्रशङ्कोत्थानमेवासमीचीनं, नव्याः प्राञ्च इत्युत्तरणमपि तथैवेति बोध्यम् । अन्यच्च–सर्वेऽपि विस्मृतिपथमिति पद्यस्य विवरणोपसंहासमये स्वयं ग्रन्थकृतो ‘‘यदि पुनरियं तत्परिणेतुरेवोक्तिस्तदा भावध्वनिरेवेति’’ वदतस्तु सुतरामसमीचीनमिति ध्येयम् ।

व्यत्यस्तमिति । क्षणं यावत् व्यत्यस्तं अस्तव्यस्तं लपति ब्रूते । अथो क्षणं यावत् मौनं मूकतां समालम्बते । स्वीकरोति । किं च सर्वस्मिन् विषये सर्वेषु पदार्थेषु इत्यर्थः निरालम्बनां निरुद्देश्यां दृष्टिं विदधाति । दीर्घं श्वासमूरीकरोति चिरं निःश्वसिति । अङ्गेषु मनागपि, लवामपि धृतिं न धत्ते नितरां चञ्चलो भवतीत्यर्थः । कुत एतदित्याह–वैदेहीति । हा कष्टं लङ्केश्वरो रावणः । वैदेह्याः सीतायाः कमनीयतया सौन्दर्येण कवलितः आक्रान्तो हन्त इति खेदे ।

उन्नेया इति । वैराग्यादिहीने पुरुषे शान्तः, ब्रह्मादिवधार्थसुत्साहः क्षुद्रे वीरः. उत्तमे पात्रे सहजं भयम्, निजकुकर्मवशलब्धदुर्गतिके करुणः । तत्त्वज्ञानिनि बीभत्सः, विशेषदर्शिनि अद्भुतः, अपकारिणि स्नेहः इत्यादयः सुधीभिरुन्नेयाः विद्वद्भिः स्वयमूह्याः ।

हरिणेति । हरिणशावकस्य बालमृगस्य नयने इव लोचने यस्याः सा । अत्र त्रिलोपे च समासगेति लक्षणानुसारं सप्तम्युपमानपूर्वपदे बहुव्रीहिउत्तरपदलोपश्चेति वार्तिकेन

समाससलोपाभ्यां साधारणधर्मोपमानेवादित्रयाणां लोपे लुप्तोपमा। अधिदेवता इव मे हृदयात् नैव अपयाति न निर्गच्छति । यस्य विषये ''विद्यया मृत्युं तीर्त्वा अमृतमश्नुते'' इति प्रसिद्धिः, सापि विद्या । अथवा न्यायादिशास्त्रं विद्या इदानीं खेदेन कलिता व्याप्ता विमुखीबभूव तत्कार्यं कर्त्तुमसमर्था जातेति ।

स्वेति । त्यागश्च अत्यागश्चेति त्यागात्यागौ स्वात्मनो यौ त्यागात्यागौ ताभ्याम् । जन्मजन्मान्तरतो विषयाः सेविताः, बाल्यात्प्रभृति च विद्या सेवितेति चिरकालसेवितत्वं विषयविद्ययोरुभयोरपि समानमतो विद्यायामेव चिरसेवितत्वोक्तिरसमीचीनैव । तस्मात् चिरसेवितेषु स्रक्चन्दनादिषु विषयेषु तादृश्यां विद्यायां च कृतघ्नत्वमिति पाठ एव साधीयान्। अन्यथा चिरसेवितत्वाभावे विषयेषु कृतघ्नत्वं केन हेतुना स्यादिति ध्येयम् । यत्किञ्चित्कालसेवितैर्विषयैर्यदि त्यागः सेवकस्य क्रियते तर्हि कीदृशी तेषां कृतघ्नता ।

ये विषयाः विद्या च चिरं सेविता अपि मां सेवकं त्यजन्ति या । नायिका च मया इदानीं यावत् नहि सेविता परं श्रुतैव, सा मां न त्यजति । अहो अनयोरन्तरं महदन्तरम्। अतः पूर्वत्र विषयविद्ययोः प्रयाताः, विमुखीबभूवेत्युक्तेः कृतघ्नत्वं, परत्र नायिकायामस्यां हृदयान्नैवापयातीति निर्देशाल्लोकोत्तरत्वं; ततश्च विषयविद्याभ्यामपेक्षया नायिकाया उत्कृष्टत्वाद् व्यतिरेकवपुः व्यतिरेकविषयिणीं स्मृतिमेव(भावं) पुष्णाति इत्यतः सैव स्मृतिरेव प्रधानम्। व्यतिरेकेति । उपमानादुपमेयस्य विशेषगुणवत्वेन उत्कर्षो व्यतिरेक इति ।

अधिदेवतोपमेति । यथाधिदेवता स्वाधिष्ठानं विहायान्यत्र कदापि न तिष्ठति तथैवेयं नायिकाऽपि स्वाधिष्ठानं हृदयं न विजहातीति त्यागाभावस्य सार्वकालिकत्वं व्यञ्जयन्ती वाच्योपमापि न प्रधानं, किन्तु अङ्गभूता स्मृतिमेव पुष्णातीति; यावत् ।

एषा स्मृतिश्च अनुचितविषयकत्वात् अतिप्रतिषिद्धगमनत्वेन अनुचितालम्बनकत्वात्।

प्रागिति । प्रागुक्तस्वरूपस्य विभावादिव्यज्यमानहर्षाद्यन्यतमत्वेन रूपेण उक्तस्य भावस्य शान्तिः । स च नाशः उत्पत्त्यवच्छिन्नः वर्त्तमानकालिकोत्पत्तिक्रियया विशिष्टो ग्राह्यः । तस्यैव उत्पत्यवच्छिन्नस्यैव व्यञ्जने सहृदयानां चमत्कारानुभूतेः ।

मुदिरालिः जलदावलिरुदियाय उदगच्छत् । तन्व्या नायिकायाः नयनाब्जकोणयोः शोणा रुचिः। रक्तिमेत्यर्थः। पतिवचनैरपायि अपगता । तादृशं ''मुञ्चसि''

इत्यादिश्लोकपूर्वार्धरूपं यत् प्रियस्य वचनं, तस्य श्रवणं विभावः। ननु प्रियवचनश्रवणस्य साक्षात्कार्यं नयनशोणिम्नो नाशो न, अपि तु तादृशप्रियवचनश्रवणेन सा प्रसन्ना जाता, प्रसन्नतया रोषनाशस्तस्माच्च शोणिमनाशः अत आह–तदिति । श्रवणेन अभिव्यक्तः प्रसादो वानुभावः।

वीक्ष्येति। भामिनी रुष्टा नायिका दयितस्य उरस्थले विपक्षाया शत्रुभूतायाः कामिन्या आलिङ्गनवशाज्जन्यं हारस्य मुक्तावल्या लक्ष्म चिह्नं वीक्ष्य सन्दश्र्य क्षणात् लक्ष्मदर्शनक्षण एव प्रियस्य अंसदेशे स्कन्धप्रदेशे वलयीकृतां वेष्टितां निजबाहुरूपां वल्लरीं लतामाचकर्ष। दयितवक्षोगतं तादृशदर्शनमित्यन्वयः।

ननु संयोगपूर्वको विभागो यथा सम्मतस्तथा उदयपूर्विका एव शान्तिः, एवं हि शान्तेरुत्तरमुदयस्य, उदयोत्तरं शान्तेर्वाऽऽवश्यकतेति कथं भावशान्तिरिह, भावोदयो वा इहेति वक्तुं पार्येत यतो विवक्तता एव तयोर्न मिलतीति स्वाशयेनाह–यद्यपीति अयमाशयः। भावेषु शान्त्युदयौ परस्परं सापेक्षौ । एकस्य शान्तौ परस्योदयः । परस्योदये एकस्य शान्तिरितिरिति एकेनैव भावोदयेन वा भावशान्त्या वा गतार्थतायां किमिति भावोदयः भावशान्तिरिति द्वौ पदार्थौ स्वीकृतावित्याशङ्कायामुत्तरति–तथापीति । द्वयोः पृथक् पृथक् चमत्कारोऽनुभवविषयः । इत्थभनुवानुरोधेन तयोर्विषयविभागः ।

यौवनस्य उद्गमेन नितान्तं शङ्किताः । शीलञ्च बलञ्च शौर्यञ्च कान्तिश्चेति । ताभिर्लोभिताः जानक्या नयननीरजयोः श्रियः ।

एकचमदिति। एका एकरूपा या चमत्कृतिः। तज्जनकं यद् भावानां ज्ञानं तद्विषयः तद्गोचरम् ।

नारिकेलेति। नारिकेलस्य जलं, क्षीरं, सिता, कदलम्। तेषां मिश्रणेसम्मेलने यथा विलक्षण आस्वादः। तथा भावानां व्यामिश्रणे विलक्षण आस्वादोऽनुभूयते ।

अत्र भावशान्त्यादीनां विषये इदं वक्ष्यमाणं वस्तु बोध्यम्, ये एते अनुपदमेव भावशान्त्यादिध्वनयः उदाहृत उदाहरणदिशा दर्शिता व्याख्याताश्च तेऽपि भावध्वनय एव अर्थात् तेषु उदाहरणेषु हर्षादयो भावा एव दन्ध्वन्यन्ते इत्येव ज्ञेयम् न तु तेषु भावानां शान्त्यादयोऽवस्था दन्ध्वन्यन्ते इति ।

कुत एतदित्याह–विद्यमानतयेति । अयंभावः । भवतीति पुंसि भवन् स्त्रियां भवन्ती विद्यमाना अवस्था प्रकारो यस्य स भवदवस्थः । तस्य भावस्तत्वं भवदवस्थत्वं विद्यमानत्वं भवन्ती अवस्थेति यावत् । एवमेव उदयन्ती अवस्था यस्य सः उदयदवस्थः । तस्य भावस्तत्वमुदयदवस्थत्वम् अर्थात् स्वसामग्रीवशादुद्गच्छन्ती अवस्था । विनश्यन्ती अवस्था यस्य सः । तस्य भावस्तत्वं विनश्यदवस्थत्वम्, अर्थात् विरुद्धसामग्रीबलात् शाम्यन्ती अवस्था । सन्दधती अवस्था ययोस्तौ सन्दधदवस्थौ । तयोर्भावस्तत्त्वं सन्दधदवस्थत्वम्, अर्थात् तुल्यबलोभयसम्भारमाहात्म्येन परस्परविमर्दः । मिश्रयन्ती अवस्था येषु ते मिश्रयदवस्थाः। तेषां भावस्तत्त्वं मिश्रयदवस्थत्वम् मिश्रणं; तच्च द्विविधम्, बाध्याबाधकभावमापन्नानां भावानां मध्ये विरोधिशक्तिस्थगितपरिपुष्टिकत्वरूपं बाध्यत्वं पूर्वपूर्वस्य । विरोधित्वरूपं बाधकत्वमुत्तरोत्तरस्येति प्रथमम् । उदासीनानां मध्ये परस्परसमानाधिकरणत्वमिति द्वितीयम् । एषु उपरि निर्दिष्टेषु विग्रहेषु तत्तदवस्थत्वं नाम सा सा अवस्था । एवं हि विद्यमानत्वरूपया आस्थया प्रकारेण भावानां चर्वणायां यथा भावेषु प्राधान्यं तथा उदयन्त्या, विनश्यन्त्या, सन्दधत्या, मिश्रयन्त्या अवस्थया प्रकारेण भावानां चर्वणायामपि भावेष्वेव प्राधान्यस्यौचित्यात् योग्यत्वत् । कुत अतदित्यत आह–चमत्कृतेरिति । चमत्कृतेरास्वादस्य तत्रैव भावेष्वेव विश्रान्तेः पर्यवसानात् ।

इदं रहस्यम् । ननु एषु उदाहरणेषु उदीयमानावस्थः, शाम्यदवस्थः, सन्दधदवस्थः, मिश्रयदवस्थः कः ध्वन्यते । भोः ! भावो ध्वन्यते । तर्हि भावध्वनिरिति व्यपदेशोऽस्तु कुतोऽवस्थानुसारं भावोदयादिरिति । यतो हि गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति नियमोद्घोषः इति ।

अस्त्येतत् किन्तु उत्पत्त्यादिरूपाणामवस्थानां भावानाञ्च प्राधान्यं तुल्यमिति केन व्यवहार इति विनिगमनाया अभाव इति शङ्कामभ्युपगच्छन्नाह–यद्यपीति । यद्यपि तथा नियमोद्घोषेऽपि उत्पत्यादीनां धर्माणां तत्सम्बन्धिनामुत्पत्यादिभिः सह सम्बन्धमनुवर्त्तमानानां धर्मिणां भावानां च चर्वणाविषयतायां भावनागोचरतायां समानायां सत्यां भावस्य वा उत्पत्यादेर्वा कस्य प्राधान्यमिति विनिगन्तुं निश्चेतुं न शक्यते इति भावोदयादिरित्येव व्यपदेशोऽस्तु का हानिः । अत्र समादधदाह–तथापि चर्वणायाः समानत्वेन प्राधान्यानिश्चयात्तथा

व्यपदेशस्य प्राप्तावपि; एकत्र निर्णीतः शास्त्रार्थः अन्यत्राऽपि तथैव निर्णय इति नयेन स्थितौ सत्तायां विद्यमानतायामिति यावत् भावेषु प्रधानतायाः क्लृप्तत्वात् शान्त्यादिष्वपि शान्त्यादिदशायामपि। भावशान्तौ शान्तिप्रतियोगित्वेन प्रकारेण, भावोदये उदयावच्छिन्नत्वेन, भावसन्धौ परस्परविमर्दनीयत्वेन, भावशबलतायां परस्परमिश्रणेन प्रकारेण व्यज्यमानेषु तेष्वेव भावेष्वेव तस्याः प्रधानतायाः कल्पयितुं समर्थयितुमौचित्यात् योग्यत्वात् ।

ननु स्थितौ भावेषु प्रधानतायाः क्लृप्तत्वादित्यत्र स्थितिर्नाम सत्ता । सा च आत्मधारणानुकूला व्यापृतिरेव। एवञ्चात्र स्थितौ भाव एव स्वात्मानं लभतेऽतो भावध्वनिरिति व्यपदेशो न्याय्यः। भावोदयादिषु तु भावः स्वसामग्रीवशादुदेति ततो भावे उदयनक्रियायाः, भावः विरुद्धशक्तियोगेन प्रशाम्यति ततो भावे प्रशमनक्रियायाः, भावौ तुल्यबलोभयसम्भारमाहात्म्येन सन्दधतोऽतः भावयोः सन्धानक्रियायाः, भावा मिश्रयन्ति बाध्यबाधकभावस्थले पूर्वपूर्वस्य बाध्यत्वेन उत्तरोत्तरस्य बाधकत्वेनैकत्रास्वादविषया भवन्ति, उदासीनतास्थले परस्परसमानाधिकरणा जायन्ते इति भावेषु मिश्रणक्रियायाः प्राधान्यम् । भावस्य चाप्राधान्यम् । इति कृत्वैव भावोदयादिनामोल्लेखोऽपि, इति शङ्कितुराशयं मनसि निधायाह–किंच। यदि उपर्युक्तहेतुभिः भावोदयादौ भावो न प्रधानम्, किन्तु भाव उपसर्जनं गुणीभूतः। यत्र एवम्भूतः। शान्त्यादिरेव आस्वाद्यत्वात् प्रधानमिति अभ्युपेयते स्वीक्रियते तदा शान्त्यादेः प्राधान्यात् व्यज्यमानाः ध्वन्यमानाः भावा येषु तेषु। अभिहिताः अभिधया बोधिताः तेषां भावानां प्रशमादयो येषु तेषु काव्येषु भावप्रशमादेर्ध्वनित्वं न स्यात् ।

तथाहीति दृष्टान्तदिशा व्यवस्थापयति। उषसीति। उषसि उषः काले। प्रिये वल्लभे प्रतिपक्षभूताया नायिकायाः सपत्न्याः सदनात् भवनात् स्वस्या अन्तिकं समीपमञ्चति प्राप्नुवति सति त्वरया सद्यः अन्तिकाञ्चनदर्शनमात्र एव सुदृशो मधुरनयनायाः नयनाब्जकोणयोः नेत्रपद्मप्रान्तयोररुणद्युतिः शोणिमा उदियाय उदयं जगाम ।

अत्रोषसीति पद्ये उत्पूर्वकेण इतिना इण्धातुना उदियायेत्येवंरूपेण भावोदयस्य वाच्यतयैव अभिधेयतया एव प्रत्यायनात् बोधनात् । न ध्वनित्वमिति शेषः ।

भावोदयस्य ध्वनित्वमिति शङ्कते–नन्विति। ननु उदयस्य उदयनक्रियाया उदियायेत्येवंरूपेण वाच्यत्वेऽपि भावस्योदयाऽवच्छेदकीभूतस्य अवाच्यत्वात् अभिधाया

अविषयत्वात् ध्वनित्वं व्यङ्ग्यत्वं सुस्थम् निश्चितम् ।

अतो ध्वनित्वं न स्यादिति किमुच्यते इति चेदाह–प्रधानस्येति । वाक्ये तिङन्तार्थस्य मुख्यविशेष्यतया बोधो भवतीति नियमात् उदयः प्रधानम् । तस्य च उदियायेत्यनेन वाच्यतया ध्वनित्वेन व्यपेदेशो व्यवहारे उपायो नास्ति हेतुर्नास्ति । एवं च प्रधानस्य उदयस्य ध्वनिव्यपदेशानौपयिकत्वे सति अप्रधानेन भावेन कृतस्य ध्वनिव्यपदेशस्य अनुपपत्तिरसङ्गतिः सुस्पष्टैव ।

अस्मन्मते तु भावेषु स्थितिदशायामिव शान्त्यादिष्वपि प्राधान्यस्यौचित्याद् हेतोः प्रधानस्य उत्पत्तिविशिष्टस्यामर्षस्य अभिधयाऽबोधनात् ध्वनिव्यपदेशो युक्तिसङ्गत एव ।

एवमति । एवमुदयवत् व्यज्यमानो भावः प्रतियोगी यत्र तस्य तादृशप्रतियोगिकस्य प्रशमस्य ।

क्षमेति । क्षमापणे क्षमाकारयितृत्वे एकपदयोः प्रधानस्थानयोः । पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रि वस्तुषु इत्यमरः । पदयोः चरणयोः प्रिये वल्लभे पतति सति प्रणामं कुर्वति सति सरोजवन्नयने यस्यास्तस्या नायिकायाः नयनयोररुणकान्तयः शेमुः। शमस्य अत्र वाच्यत्वेऽपि रोषस्यावाच्यत्वाद् ध्वनित्वं, तेन प्रधानस्यावाच्यत्वाद्युक्तो भावशान्तिध्वनिरिति व्यपदेशः।

तादृशेति । अरुणकान्तिप्रशमादिना व्यङ्ग्यस्य रोषप्रशमादेरपि वाच्यत्वम् । अरुणकान्तिप्रशमादिर्व्यञ्चकः, रोषप्रशमादिर्व्यङ्ग्यः । इत्येवंरूपस्य भेदस्य वैधर्म्यस्य आवश्यकत्वात् नियतत्वात् ।

नन्वस्तु वाच्यव्यङ्ग्ययोरन्वय इत्यत आह–न चेति । तन्न वाच्यमित्यत्र हेतुं कथयति–वाच्येति । आनुपूर्व्येण क्रमेण सिद्धतया । अन्यथा वाच्यान्वय बोधसमये वाच्यैः सह व्यङ्ग्यस्य अन्वयानुपपत्तेरस्वीकारे अर्थात् अन्वयो भवतीति स्वीकारे अरुणद्युतिर्व्यंग्योऽमर्षः सुदृशो नयनकमलकोणयोरुदियायेत्यन्वयो न स्यात् । यतो हि अन्तःकरणधर्मस्यामर्षस्य नयनकोणयोरुदयस्य सम्भव एव नास्ति । एवं च शमस्य वाच्यत्वेऽपि शाम्यदवस्थस्य रोषस्यावाच्यत्वाद्रोषध्वनित्वं सुस्थम् ।

उक्तं निराकुर्वन्नाह–मैवमिति । एवं वाच्यान्वयबोधसमये वाच्यैः सह व्यङ्ग्यस्यान्वयो

भवतीति नास्ति अर्थात् तथान्वयो नहि भवति । अभ्युपगमदिशा खण्डयति–एवमपि वाच्यव्यङ्ग्ययोरन्वयो भवतीति स्वीकारे तु निर्वासयन्तीमित्यादावपि पद्ये भावप्रशमध्वनित्वस्यापत्तेः, अवाञ्छितं भावप्रशमध्वनित्वं प्राप्तं स्यादित्यर्थः । भावस्य रोषस्य वाच्यत्वेऽभिधया बोध्यत्वेऽपि प्रधानस्य क्रियान्वयितया मुख्यस्य रोषप्रशमस्य व्यङ्ग्यत्वात् ।

निर्वासेति । अङ्गनानां प्रमदानां धृतिं विकाररहितस्थितिं निर्वासयन्तीं कामोद्रेकात् धैर्यच्युतिं कुर्वतीं हरेः शोभां कान्तिं धयन्त्याः पिबन्त्याः सादरं नेत्राभ्यां पश्यन्त्या एणदृशो मृगदृशो रोषः । चिरापराधस्य स्मृत्या मांसलोऽपि स्मरणेन नवीकृततया परिपुष्टोऽपि सन् क्षणप्राघुणिकः क्षणं यावत् स्थितिशाली अतिथिर्बभूव जातः । रोषो नष्ट इति भावः।

क्वचिद् भावस्य व्यङ्ग्यत्वमुत्पत्यादेर्वाच्यत्वं, क्वचिद् भावस्य वाच्यत्व–मुत्पत्यादेर्व्यङ्ग्यत्वमिति कलहशान्तिं निःसन्दिग्धशास्त्रव्यवस्यां कर्तुं शङ्कते–उभयोरिति। उभयोरपि भावस्य उत्पत्यादेश्च द्वयोरपि अवाच्यत्वमभिधयाऽनुपस्थाप्यत्वमपेक्षितमिष्टमिति चेत्, प्रागुक्ते पद्यद्वये क्षमापणेति उषसीति पद्ययोः द्वयोः क्रमेण शमत्वेन शमस्य, उदयत्वेन उदयस्य वाच्यत्वादनुदाहरणतापत्तेः । ननु मास्तु तयोरुदाहरणतेति इष्टापत्तिस्तु वाञ्छितार्थलब्धिस्तु सहृदयानामनुचितैव। तस्मात् अनुचितत्वात्। तस्य प्रशमादेः वाच्यताया न दोषः ।

ननु स्थितौ भावस्य प्राधान्यमिव प्रशमादिष्वपि भावस्यैव प्राधान्यात्सर्वत्र भावध्वनिरिति व्यवहारो जायतां किमिति भावशान्तिर्भावोदय इति विभिन्ननामोल्लेख इत्याशङ्कामपनेतुं ग्रन्थान्तरमवतारयति–इदं पुनरिति ।

वस्तुतस्तु उषसीत्यत्र शेमुरिति पदेन, निर्वासयन्तीमित्यत्र रोष इति पदेन सर्वेषां वाच्यत्वात् अनुदाहरणतैवेति प्राचार्याणां सिद्धान्तः । तथाहि–ध्वन्यालोककाव्य–प्रकाशालङ्कारसर्वस्वसाहित्यदर्पणादिषु ग्रन्थेषु सर्वत्र उभयोरपि अनभिधेयत्वे एव उदाहृताः भावशान्त्यादिध्वनयः। उदाहरणानि च तत्रैव द्रष्टव्यानि । ग्रन्थविस्तारभिया नोल्लिखितानि।

स्थायीति । ननु रसोदयादीनुदाहृत्यैव भावोदयादय उदाहरणीयाः । तथैव क्रमसङ्गतिः स्यात्तत्कथमुपेक्षिता इत्याह–रसस्येति । स्थायिमूलकत्वात् स्थायीभावो रसः स्मृत इत्युक्तेः,

स्थायिनः सर्वदैव सत्त्वादुदयादयोऽवस्था न भवन्तीति भावः । तत्रापि प्रशमादेस्तु नितान्तमसम्भवः स्थायित्वव्याघातात् । ननु चर्वणा निष्पत्या रसनिष्पत्तिरिव चर्वणाप्रशमादिनैव रसप्रशमः स्यादत आह–सम्भवे वेति । तथात्वे चमत्कारो न स्यात् चमत्काराधीना च व्यवस्था इति हेतोः स रसप्रशमादिर्न विचार्यते ।

सोऽयमिति । रत्यादिलक्षणो व्यङ्ग्यप्रपञ्चः रत्यादिस्वरूपः व्यङ्ग्यसंसारः। सूक्ष्मेणैव अत्यल्पेनैव समयेन कालेन प्रमात्रा प्रतीयते ज्ञायते इति हेतोः । अत्र इतिर्हेत्वर्थकः । पौर्वापर्यक्रमस्यालक्षणे सूक्ष्मः समयो हेतुः ।

न खल्विति । येन मानेन धर्मिणो रत्यादेः ध्वनिता, तेनैव मानेन असंलक्ष्यक्रमता न सिद्धेति भावः ।

अनुरणनेति । अनुरणनं नाम संलक्ष्यक्रमः । तस्य भेदानां गणनप्रस्तावे सङ्कलनप्रक्रमे। यदि रसादिः संलक्ष्यक्रमस्तर्हि आचार्यैस्तस्य द्वादश विधा एव कुतो दर्शिताः । यतोऽष्टादश विधा दर्शनीयाः स्युरिति भावः ।

रसीभवति अत अभूततद्भावे च्विः । तेन अरसः रसो भवतीति रसी भवति । असंलक्ष्यक्रमतया एवेत्यत्रत्यस्य एवकारस्य व्यावर्त्यं कथयति–न संलक्ष्यक्रमतयेति ।

जायमानेत्यस्य विभावादिसंयोगात् व्यज्यमानस्य । तेषामिति । तेषाम् अभिनवगुप्त–मम्मटभट्ट–विश्वनाथादीनाम् । तदुक्तीनामिति–अर्थशक्तिमूलस्य द्वादश भेदाः । तेनाऽयं द्वादशात्मकः इत्यादिकथनानाम् । न विरोधोऽर्थात् सङ्गतिर्जाता ।

उपपत्तिरिति । विभावादिभिरसंलक्ष्यक्रमतया व्यज्यमानो रत्यादिः रसः । संलक्ष्यक्रमतया व्यज्यमानः स एव वस्तुध्वनिर्न रस इत्यस्मिन्नर्थे ।

उपपत्तिर्युक्तिर्विचारणीया । अयमाशयः । अयं घट इत्यादिज्ञाने ज्ञाता, ज्ञानं ज्ञेय इति त्रिपुटी जागर्ति । अर्थात् घटस्य ज्ञाता देवत्तादिर्भिन्नः, घटादिविषयकं ज्ञानं भिन्नं, ज्ञेयो घटादिर्भिन्न इत्यादि भिन्नता सर्वत्र वरीवर्ति । तथा रसस्थले नास्ति । तत्र तु रसानुभवकाले प्रमातुः ''नीवीं प्रति प्रणिहिते तु करे प्रियेण, सख्यः शपामि यदि किञ्चिदपि स्मरामि'' इत्येवंरूपा दशा । अर्थात् देवदत्तोऽहं रसं प्रमिणोमि इति भावो विगलितो भवति । रसो ज्ञानस्वरूपः । ज्ञानस्वरूपस्य रसस्य ज्ञानं स्वस्वरूपानुभूतिरर्थात् ज्ञानातिरिक्तो

ज्ञेयो नास्ति ततश्च तत्र रसानुभवकाले त्रिपुटी विगलिता भवतीति कुतः क्रमस्य लक्ष्यता। वस्तुध्वनौ तु अयं घट इत्यदिज्ञानरीत्या क्रमः संलक्ष्यत एवेति ।

रसभावादिरर्थ इत्यत्रेति । ''रसभावादिरर्थो ध्वन्यमान एव न वाच्यः । तथापि न सर्वोऽलक्ष्यक्रमस्य विषयः'' इत्यभिनवगुप्तोक्तौ रसभावादिपदं रत्यादिरूपार्थपरम् । रत्याद्यर्थपरत्वाभावो हि ''तथापि न सर्वो रसभावादिरर्थोऽलक्ष्यक्रमस्य विषय'' इत्युक्त्या रसादेः संलक्ष्यक्रमत्वस्वीकारात् वस्त्वलङ्कारयोरिव अष्टादशत्वमप्रसङ्गः स्यात् । ततश्चोच्यते रसादिशब्दो रत्यादिपर इति ।

ननु विभावानुभावव्यभिचारिप्रतीतिसम्पदेव रसास्वादे निबन्धनम् । विभावादयश्चा (ललनोद्यानादयोऽ) र्थाः काव्यादेव प्रतीयन्ते । काव्यञ्च निराकाङ्क्षप्रतिपत्तिकारिवाक्यमेव न पदम् । ततश्च काव्यप्रतिपाद्यो विभावादिर्वाक्यार्थ एव न पदार्थ इत्यायातं, तेन विभावादिसंयोगान्निष्पद्यमानाः रसादयो वाक्यप्रकाश्या एव न पदप्रकाश्या इत्यनुपपत्तिं परिजिहीर्षुरुपक्रमते–तत्र वाक्यगतानामिति । कुर्वद्रूपतया मनोहारिव्यङ्ग्यार्थस्मारकतया नियतं विभावादिव्यज्यमानरसचमत्कारविधायकत्वं पदेष्वपि वर्त्तते इति कस्यचिदेव पदस्य ध्वनिव्यपदेशहेतुत्वम् । अयमाशयः । काव्यविशेषो ध्वनिरिति ध्वनिकारोक्त्या वाक्यं ध्वनिः, पदं न ध्वनिः । तथापि समुदाये वर्त्तमानो धर्मोऽवयवेष्वपि इति रीत्या रसस्यासाधारणनिमित्ततां प्राप्तविभावादीनां समर्पकस्य कस्यचित् पदस्य तादृशव्यपदेशे हेतुत्वमावश्यकमेविति । पदमपि चमत्कारि एव भवति । एवं रीत्या विशेष्ये पदे चमत्कारस्य अयोगः असम्बन्धः । तेन व्यवच्छिन्नं रहितम् । चमत्कारायोगव्यवच्छिन्नं तस्य भावस्तत्वम् ।

व्यञ्जकतावच्छेदकेति । अयं भावः । वर्णाःपदम् । क्वचिदेकोऽपि वर्णः पदमिति बहुत्वमविवक्षितम् । पदं व्यञ्जकं, व्यञ्जकता पदे, व्यञ्जकतावच्छेदकं वर्णानामानुपूर्वी अर्थात् पूर्वापरीभावेन विन्यस्ता वर्णाः एव । एवञ्च वर्णसमूहः पदमिति रीत्या पदस्य व्यञ्जकतायां वर्णानां पौर्वापर्यरूपानुपूर्वीघटकतया व्यञ्जकता अर्थात् प्राप्ता भवति, तेन पदगतव्यञ्जकतावच्छेदकस्य आनुपूर्व्याः या कोटिः श्रेणिस्तस्यां वर्णानां प्रविष्टत्वमेवेति भावः ।

पदसमूहो वाक्यम् । तेन वाक्यस्य व्यञ्जकतायां पदानां व्यञ्जकता अर्थात् प्राप्ता भवति । रचना पदसङ्घटना पौर्वापर्यरूपानुपूर्वी । सा च पदगता वाक्यगता च । एवं च तस्या अपि व्यञ्जकतावच्छेदकस्य वाक्यत्वस्य पदत्वस्य च कोटौ प्रवेश एव । अतः वर्णनां रचनायाश्च स्वतन्त्रतया व्यञ्जकत्वं नास्ति । तदेतदुक्तं ग्रन्थकारेण ''न तु व्यञ्जकत्वं यद्यपि सुवचमिति ।

तथापीति । पदवाक्ययोर्व्यञ्जकत्वकथनेन तदन्तर्गतानाम् वर्णरचनानां व्यञ्जकत्वस्य अर्थात् प्राप्तत्वेऽपि । पदानामानुपूर्वी वाक्ये एवं पदसम्बन्धिनी पदावयवका रचनेत्युक्तौ पदविशिष्टा रचना । वाक्यानामानुपूर्वी प्रबन्धे । एवं वाक्यसम्बधिनी वाक्यावयवका रचनेत्युक्तौ वाक्यविशिष्टा रचना । रचनाविशिष्टं पदं वाक्यं वा अर्थात् आनुपूर्वीं गतं पदं वाक्यं वा इति सङ्गतिरवधेया । अनयैव रीत्या पदवाक्यद्वयस्य रचनायाश्च परस्परं विशेष्यविशेषणभावः।

घटादौ दण्डचक्रादेः कारणत्वस्येवेति । यथा घटं वा पटं वां प्रति दण्डो वा चक्रं वा तुरी वा वेमा वा कारणं तथा रचना व्यञ्जिका, वर्णो वा व्यञ्जकः, पदं वा वाक्यं वा प्रत्येकं व्यञ्जकमिति भवतीति अक्षर सङ्गतिः ।

इदं तु बोध्यम् । दण्डचक्रचीवरकुलालमृत्तिकाः परस्परसापेक्षा एव कारणतां गताः। अत एव समुदितकारणतानिरूपणावसरे सर्वत्र दण्डचक्रादिदृष्टान्त उपन्यस्यते प्राचार्यैः । वैकल्पिककारणता तु तृणे, अरणौ, मणौ वा दृष्टा । तृणं वा वह्निजनकम्, अरणिर्वा वह्निजनकः मणिर्वा तथा । प्रत्येकं कारणतायाः दण्डादौ बाधिता एव, न हि एकेन दण्डेन, केवलेन च चक्रेण वा, कुलालेन वा, मृदा वा केवलया घटं निर्मातुं कश्चिदपि प्रभवति । तस्मात् पण्डितराजस्य मर्मप्रकाशे नागेशस्य च घटादौ दण्डचक्रादेः कारणत्वस्येव प्रत्येकमेवेति लेखो विचारणीय एव । प्रत्येकं रचनायां, वर्णेषु व्यञ्जकता प्राचार्यैः न स्वीकृता स्यात् । अथवा तादृशी सा अनुपपत्तिग्रस्ता स्यात्तदा विशिष्टकारणतामतमनुमतं स्यात् ।

वर्णेति । वर्णानां केवलमाधुर्यादिगुणाभिव्यञ्जकत्वमनुभवसिद्धं न तु गुणिनो रसस्य अभिव्यञ्जनपुरःसरं तेषां तत्त्वम् । एवमेव रचनायाश्च । कुत एतदिति हेतुमुपन्यस्यति– गौरवात् । गुण्यभिव्यञ्जनपुरःसरम् गुणाभिव्यञ्जकत्वमिति गुरुः कारणता । ननु अनायत्त्या

ग्रस्तत्वात्तथा स्वीकरणमावश्यकमिति गौरवं न दोषाय इत्यत आह–मानाभावात् । तत्पुरःसरं तदभिव्यञ्जकत्वे प्रमाणं नास्ति । ननु भोः, जलेन स्पर्शे सत्येव जलस्य शैत्यं वा औष्ण्यं वा ग्रहीतुं शक्यते, अथवा वस्तुनः परिमाणादिप्रत्यक्षीकरणसमये वस्तुविशेषमविज्ञाय परिमाणादेः प्रत्यक्षं दुर्लभमित्यादिकं प्रमाणं गुण्यभिव्यञ्जनपुरःसरे गुणाभिव्यञ्जनेऽस्ति तत्राह–न हीति । यदि तादृशो नियमो भवेत्तदा भवदुक्तं प्रमाणकोटीमाटीकेत, परं तथा नियमो नास्ति । कुत एतदुच्यते भोः अधस्तान्नियमाकारो दर्शित एवेत्यत्र आह–इन्द्रियत्रये व्यभिचरात् घ्राणरसनश्रोत्रेन्द्रियेषु त्रिषु तादृशनियमो नास्ति । गुणिनः पृथिव्या दीन् विनाऽपि गुणस्य गन्धादेः प्रत्यक्षमस्ति ।

इदं तु बोध्यम् । वर्णानां न रसाभिव्यञ्जकत्वमिति वदन् पण्डितराजः स्वयमेव "निखिलमिदं जगदण्डकं वहामीत्यत्र करूपतद्धितो वर्णः विररसस्य व्यञ्जक इति स्वोक्त्या भ्रान्तिमान् न तत्त्वदर्शी । प्राचार्याणामभिमतश्चायं वर्णानां रसाभिव्यञ्जकत्वस्य सिद्धान्तः। तथा हि–शषौ, सरेफसंयोगः, ढकारश्च । भूयसा बाहुल्येन प्रयुज्यमाना एते वर्णा शृङ्गारे विरोधिनः स्युः । तेन हेतुना वर्णा रसच्युतः । अथवा ते वर्णा रसच्युतो नेति व्यतिरेकविधया।

तेन उपर्युक्ता एव वर्णा यदा बीभत्सादौ रसे निवेश्यन्ते तदा तं रसं प्रकाशयन्त्येवेति अन्वयविधया वर्णानां व्यञ्जकत्वं सिद्धान्तयामास सानन्दमानन्दवर्द्धनाचार्यः । तथा चोक्तवान्=
शषै सरेफसंयोगो ढकारश्चापि भूयसा । विरोधिनः स्युः शृङ्गारे तेन वर्णा रसच्युतः॥
त एव निवेश्यन्ते बीभत्सादौ रसे यदा । तदा तं दीषयन्त्येव तेन वर्णा रसच्युतः ॥ इति च

सिद्धान्तमेनं सञ्जुगोपाभिनवगुप्ताचार्यः। तथा हि–यद्यपि विभावानुभावव्य–भिचारिप्रतीतिसम्पदेव रसास्वादे निबन्धनम् । तथापि विशिष्टश्रुतिकशब्दसमर्प्यमाणास्ते विभावादयः रसास्वादे निबन्धनानि भवन्तीति स्वसंवित्सिद्धम् । तेन वर्णानामपि श्रुतिसमयो (अभिधो) पलक्ष्यमाणस्य अर्थस्य अनपेक्षी अपि श्रोत्रैकग्राह्यो मृदुपरुषात्मा स्वभावो रसास्वादे सहकार्येव । अत एव च सहकारितामभिधातुं निमित्तसप्तमी कृता–

यस्त्वलक्ष्यक्रमव्यङ्ग्यो ध्वनिर्वर्णपदादिषु ।
वाक्ये सङ्घटनायां च स प्रबन्धेऽपि दीप्यते ॥ इत्यत्र पद्ये ।

न तु वर्णैरेव रसाभिव्यक्तिः। श्रौत्रैकग्राह्योऽपि च स्वभावो रसनिष्पन्दे व्याप्रियत

एव। अपदगीतध्वनिवत्, पुष्करवाद्यनियमितविशिष्टजातिकरकघ्राद्यनुकरणशब्दवच्चेति ।

नामनि ''रसवत्'' इति नामनि इति यावत् ।

इति श्रीमरुमण्डलधराधीशचक्रचर्चितपदपाथोज–सर्वतन्त्रस्वतन्त्र–महामहो–पाध्याय=

पण्डितप्रकाण्ड–श्रीरामजीलालशास्त्रिणां तनुजन्मना साहित्यार्णवकर्णधारेण राजस्थानकेशरिणा अभिनवमधुसूदनसरस्वतीपदभाजा साहित्याचार्येण आहिताग्निना श्रीमधुसूदनशास्त्रिणा विरचितायां मधुसूदनीविवृत्तौ प्रथममाननम् ।

श्रीरस्तु । शुभमस्तु ।

****